Sri

# SRILOKAGADYAM & STOTRANI

BY

SRI LAKSHMIDASA BHAGAVAN

Collected, Edited & Published

By

**Baladhanvi JAGGU SUDARSANACHAR**

**Sahitya Vedanta Vidwan**

*Rtd. Professor of Vishishtadvaita Vedanta*

*Chamarajendra Sanskrit College*

*Bangalore*

श्रीबालधन्वि वेङ्कटार्यग्रन्थमाला कुसुमम्—२५

*All Rights Reserved by the Editor and Publisher*

**Baladhanvi JAGGU SUDARSANACHAR**
Sahitya Vedanta Vidvan, Retd. Professor &
Head of the Department of Vishishtadvaita Vedanta,
Chamarajendra Sanskrit College, Bangalore

*Present Address* :

**"Bhakti Vilas", MELKOTE P.O.**
**Mandya Dist. (Karnataka)**

FIRST EDITION : 1979

**Price Rs. 30-00**

PRINTED AT :
PRABHA PRINTING HOUSE
22/A, Dr. D. V. Gundappa Road, Bangalore-4

॥ श्रीरस्तु ॥

श्रीमते रामानुजाय नमः ॥

श्रीवीरलक्ष्म्यै नमः ॥

श्रीलक्ष्मीदासाय नमः ॥

## ॥ श्रीलक्ष्मीदासानुगृहीतगद्यग्रन्थस्य मुखमुद्रा ॥

अस्ति किल रामसेतुहिमाचलकृतदक्षिणोत्तरसीम्नो रामकृष्णाद्यनेक भगवदवताराधिकरणतया बहुशस्तच्चरणपवित्रपांसोः भरतखण्डस्य मण्डनायमाने कर्णाटकदेशे वैकुण्ठसत्यलोकोत्तरबदरिकाश्रमदक्षिणबदरिकाश्रमेषु क्रमात् कृतसान्निध्येन भगवता नारायणेन निखिलचेतनोज्जीवनकामनयाधिष्ठितः सनत्कुमारदत्तात्रेयशाण्डिल्य श्रीरामानुजाचार्यश्रीपराशरभट्टारकवेदान्ताचार्यादि-मुनिगुरुजनचरणनलिनस्पर्शपावनबहुलशिलातलः स्वभावतस्सुन्दरोऽप्यष्टतीर्थ-सप्तक्षेत्रीकल्याणसरःप्रभृतितीर्थक्षेत्रैः परमपावनः, कावेर्याः उत्तरतस्सह्यगिरेः पूर्वतः शेषात्मकः दाशरथिबलदेववासुदेवादिभिरसकृदपि संस्तुतः वेदगिरि-नारायणाद्रियादवाचलयतिशैलनामभिश्चतुर्युगेषु प्रथितः पर्वतोत्तमः ॥

तत्र च कतिचिद्वसन्ति श्रीवैष्णवाः भगवतो नारायणस्य यतिराज-सम्पत्कुमारस्य यदुगिरिनायक्याः श्रीरामानुजार्यादिगुरुवराणां शिखरिशिखराग्र-स्थितस्य नरकेसरिणश्चाराधकाः परिचारकाः स्तोत्रपाठकाः नामसङ्कीर्तनपराः कुसुमतुलसीमालातीर्थादिसमर्पणपराः श्रीभाष्यभगवद्विषयाद्यनुसन्धानप्रवचना-दिना भगवद्गुणानुभवकैङ्कर्यरसिकाः मन्त्रजपादिभिराराधितेन भगवता कृत-सम्भाषाः कवयस्तद्गुणगानिरताः द्राविडाम्नायतदङ्गरूपचतुस्सहस्रीदिव्य-प्रबन्धपारायणपराश्च ॥

तेषु च भगवतो नारायणस्यान्तरङ्गपरिचरेण केनचित्कुतोऽपि कारणा-दानीतं राजधान्याः (महीशूरनगर्याः) किञ्चिद्दृश्याञ्जनम् । तच्च तद्दर्शन-शक्तिविशेषविशिष्टलोचनैर्बालैर्बालिकाभिर्वा तदेकाग्रचित्तदृष्टिभिर्विलोकितञ्चेत्

तत्र दृष्टैराञ्जनेयादिभिः प्रष्टृणामुत्तरं भाविफलादिकञ्च लिख्यत इति च तदञ्जनस्वभावः इति च लोकानुभवसिद्धमिति नापलपनीयमेव ॥

एवम्भूतमञ्जनं तदानेत्राप्रमेयनाम्ना भगवत्किङ्करेण ताम्बूलीदले बिन्दुमात्रं निक्षिप्तं सुदर्शननाम्नः कस्यचित्किङ्करस्य हस्ते दत्तं परीक्ष्यतामिदं भवतो गृहे इति चोक्तम् । स च दिवसः शालिवाहनशकमानेन १८७५मिते नन्दनवत्सरे आश्वयुजमासे शुक्लतृतीयेन्दुवासरस्वातीतारायुतः (२२-९-१९५२ क्रि. श.) । तेन च सुदर्शनार्येणानीय पञ्चषदिवसान्यावदन्तरेव पेटायां स्थापितम् । ततश्च परीक्षितुमारब्धम् । बहुभिर्मुहुश्चिरं दृष्टेऽप्यञ्जने न किञ्चिद् दृश्यते स्म । २७-९-१९५२ दिवसे सुदर्शनार्यपितृव्यपुत्रस्य वकुलभूषणनाम्नः धर्मपत्न्या यग्गम्मनाम्न्या दृष्टे तत्र किमप्यपूर्वं तेजोऽदृश्यत । ततस्सस्मार सा स्वबाल्यदृष्टमेवंविधमञ्जनं अनेकविषयप्रकाशकम् । ततः कुतूहलिना सुदर्शनार्येण दृष्टुं निर्बद्धा सा प्रारभतावलोकितुम् । तत्र च सा ददर्श कञ्चन पुरुषं सोष्णीषं श्मश्रुधारिणं सकवचं ललाटनिहितमषीस्थासकं दण्डपाणिम् । कस्त्वमिति तया पृष्टस्स व्यलिखदहमञ्जननाटकसूत्रधारः इति । मां वशीकुर्विति चासकृल्लिलेख । नैच्छत्सा गृहकार्यविघ्नभिया । पुनस्तर्जितापि अनिच्छन्ती तदञ्जनं द्रष्टुं रात्रौ शयनोपधानसमीपासीनेन तेन सामवचोभिराश्वासिता चोदर्कसूचनेन चाङ्गीचकाराञ्जनदर्शनम् । तदेव वशीकारोपाय इति चोक्ता ददर्श प्रत्यहम् ॥

अञ्जनतत्त्वबुभुत्सया तदानीय गृहे स्थापितवतः सुदर्शनार्यस्य गृहं 'भक्तिविलास'नाम्ना प्रथितम् । अञ्जनद्रष्ट्र्याः यग्गम्मनाम्न्याः गृहं 'सौभाग्यभवन'मिति प्रथितं तत्पार्श्वस्थितम् । अञ्जनदर्शनं तु प्रथमं भक्तिविलास एवाभूत् । तदा तत्रैव नियमः कृतः तेन सूत्रधारेण । भक्तिविलासादन्यत्राञ्जनं न नेयमिति च । पञ्चषदिवसानन्तरं एकगृहत्वात्सौभाग्यभवनेऽपि दर्शनमनुमतं तेनैव । अञ्जनं तु त्रिभिरेव स्प्रष्टव्यं नान्यैः । आनेता सुदर्शनार्य एकः । तत्पिता जरठ एकः । अन्या तद्द्रष्ट्री इति च नियमः । तच्च भक्तिविलास एव स्थाप्यमिति च । ततः कालनियमोऽपि कृतः । मध्याह्ने सौभाग्यभवने ।

रात्रौ भक्तिविलासे द्रष्टव्यम् । तत्राप्येकहोरामात्रमिति च । भक्तिविलासे गृहार्चनदेवताः प्राधान्येन लक्ष्मीनृसिंहमूर्तिः सुदर्शनचक्रमूर्तिः श्रीकृष्णः गोदादेवी च । सौभाग्यभवने तु श्रीनारायणमूर्तिः लक्ष्मीहयवदनमूर्तिश्चित्रगतश्च । भक्तिविलासे यदाञ्जनं तया दृश्यते तदा श्रीरङ्गनाथः वेङ्कटगिरिनायकः श्रीनिवासः करिगिरिनायको वरदराजो यदुगिरिनारायणः पराङ्कुशमुनिः परकालकविः भट्टनाथसूरिः कुलशेखरसूरिः पाणसूरिः गोदादेवी रामानुजमुनिः श्रीवत्सचिह्नमिश्राः कवितार्किकसिंहाः वेदान्ताचार्याः वरवरमुनिवर्यः अन्ये च केचिदाचार्यवर्याः आगत्य तद्गृहपतिना जरठेन लिखितं संस्कृतभाषामयं गद्यरूपं स्वस्वचरितं तत्सुतेन सुदर्शनार्येण पठितं श्रुत्वा श्लाघमानाः नाटके नटा इव पुनरपि सर्वं स्वचरितं तस्यै दर्शयामासुः । सा तु यथादृष्टं कथयामास सुविस्मिता । श्रोतॄणामस्माकं तु महदद्भुतमानन्दश्च प्रत्यहमुद्भूय बाह्यप्रपञ्चमेव व्यस्मारयत् ॥

अञ्जनदृष्टेषु सर्वेषूक्तेषु गोदादेवी तु स्वचरितश्रवणायागता आसीनाचासने प्रतिभार्गववासरमत्रागमिष्यामीत्युक्त्वा जरठेन कृतं लक्ष्मीस्तोत्रं शुश्राव स्वचरितं च । एकस्मिन्भृगुवासरे श्रीधन्विनूतनपुरीं तत्र देवालयं तत्र स्वलङ्कृतां गोदादेवीं च प्रदर्श्य ततः प्रस्थाय, यादवगिरौ यदुगिरिनायक्याः दिव्यालङ्कारालङ्कृतं मन्दिरं च प्रविश्य ततो यवनिकामपनीय शुक्लमाल्याम्बरधरा सर्वाभरणभूषिता चापादतलमस्तकं स्वपादतलविन्यासेन पावयन्ती राजवीथीं भक्तिविलासगृहवीथीं च गृहद्वारि स्थित्वा, इदमेव बालधन्विकुलीनस्य गृहम् ? इदमेव प्रविशामीत्युक्त्वा गृहपतेरनुमतिं लब्ध्वा अन्तः प्रविश्य भित्तौ लगितेषु चित्रपटेषु मध्ये जयचामेन्द्रभूपनाम्ना तद्देशाधिपतिना स्वहस्ताक्षरविन्यासपूर्वकं प्रदत्तां 'साहित्यरत्नम्' इति बिरुदाङ्कितां जरठस्य प्रशस्तिपत्रिकामनुवाच्य जरठं प्रशस्य तेनैव नाम्ना सम्बोध्य ममात्रावकाशो देय इत्यभ्यर्थ्य गृहदेवमन्दिरं प्रविश्य तत्र स्थितं गोदादेवीविग्रहमनुप्रविश्य ततो निर्गत्य जरठस्य कालक्षेपशालां प्रविश्य तत्र राजदत्तैः कौशेयादिभिरास्तृते चतुष्पदासने उपविश्य यत्किञ्चित्पत्रपुष्पादिना सन्तुष्यन्ती, जरठं "अहं तु गोदा, त्वं मम पिता

भट्टनाथसूरिः" इति प्रशस्य तत्कृतिषु लक्ष्मीस्तुतिं समयानुगुण्येनैकदेशतः श्रुत्वानुमतिमवाप्य तत्रैव देवमन्दिरं प्रविवेश ॥

अन्यस्मिन्भृगुवासरे यथापूर्वमागत्य यथाक्रमं सत्कृता, "अस्मिन् दिवसे ममाग्रजो रामानुजमुनिस्त्वम्" इति जरठं प्रशस्य, अद्य त्वां 'साङ्ख्यतीर्थ' इति सम्बोधयामीत्युक्त्वा यथापूर्वं देवमन्दिरं प्राविशत्। अपरस्मिन् भृगुवासरे 'वेदान्तविद्वन्' इति जरठं सम्बोध्य, अस्मिन्दिवसे "मम पितामहस्त्वम्; अहं तु तव पौत्री गोदा" इति प्रशस्य यथापूर्वं देवगृहं विवेश। तस्मिन्नेव दिवसे जरठस्य पौत्र्याः गोदेति नामकरणं प्रातरासीत्। इतरस्मिन्भृगुवासरे यतिराजमठाधिपतिना संयमिशेखरेण प्रदत्तया 'शास्त्रकविरत्न'मिति नाम्ना सम्बोधयामास ॥

एवं स्थिते कदाचिदञ्जनागता लक्ष्मीरेवमुवाच "इयन्तं कालं युष्मद्गृह एवाहमासम्। इतःपरमन्यत्रापि गन्तव्यं मया। नैकत्रावस्थानं युक्तं लक्ष्म्याः। सर्वे हि वीक्षणीया हि जगज्जनन्या" इति। एतावति काले सौभाग्यभवने विद्युद्दीपो नासीत्। भक्तिविलासे तत्प्रातिवेशिकस्य वात्स्यनरसिंहाचार्यस्य गृहे च विद्युद्दीप आसीत्। कदाचिदुक्तमेवं लक्ष्म्या। "इतःपरमहं सौभाग्यभवने नित्यवासं करिष्यामि। मम दीपो दीयताम्" इति। भक्तिविलासगृहिण्या कारणान्तरेण सपद्यनभ्युपगते दीपदाने वात्स्यनरसिंहार्यः परेद्युरेव भौमवासरे दीपं ददौ। ततःप्रभृति तस्मिन्नृसिंहार्ये लक्ष्म्याः कटाक्षाः विशेषतो विलासमातेनिरे। तथा हि— नृसिंहार्यगृहस्य 'लक्ष्मीविलासः' इति नाम कृतम्। तस्य स्त्रीशिशोः 'जयश्रीः' इति च नाम स्वयमेव कृतम्। प्रतिभार्गववासरं प्रथमतो लक्ष्मीविलासप्रवेशः स्वस्य तत्र फलपुष्पताम्बूलधूपदीपाद्यङ्गीकारश्च प्रतिज्ञातस्तथैवाचरितं च। किञ्च सौभाग्यभवनस्थितायाः वीरलक्ष्म्याः दीपारोपणतीर्थसमर्पणकैङ्कर्ये नृसिंहार्यो नियुक्तः। सुदर्शनाचार्यस्तु पुष्पमालासमर्पणे आराधने च नियुक्तः ॥

अञ्जनदर्शनप्रारम्भदिवसेषु भक्तिविलासगृहार्चनदेवता सुदर्शनमूर्तिरदृश्यताञ्जने। प्रथमं समुद्रमध्यादुत्थाय गगनतले वेगात्प्रसर्पन् परितो

ज्वालामालाकुलः किरीटादिसर्वाभरणभूषितः दिव्यसुन्दरसर्वावयवः कदाचिद्दिव्यचन्दनानुलिप्तवक्षाः कस्तूरीतिलककलितफालः, कदाचित् कवचधारी द्विभुजः कदाचिदूर्ध्वपुण्ड्रधारी चतुर्भुजः, कदाचिदष्टभुजः, कदाचित् षोडशभुजस्तत्तत्प्रहरणधरश्च भूत्वा भक्तिविलासं प्रविश्य तद्देवमन्दिरस्थिते सुदर्शनदेवे एकीभूय पुनस्ततो निर्गत्य जरठस्य शालां प्रविश्यालङ्कृते चतुष्पदासने उपविश्य कुसुमशर्करादिकमभिनन्दनपूर्वकं स्वीकृत्य अञ्जनसूत्रधारं स्वभटं निर्दिश्य, "अयं मम भटः युष्मदनुग्रहायाञ्जनद्वारा अस्मदादीन्सर्वान्देवान् सूरीनाचार्यानानीयास्यै प्रदर्श्य तन्मुखेन सर्वाननुभावयन्नत्यद्भुतकर्मकारी युष्मानत्रपरत्रचोज्जीवयिष्यति। एतच्छासनं सर्वं श्रद्दधानाः आचरन्तु सर्वे" इति अनुशास्य जरठमनुमान्य स्वस्थानं गच्छामीत्युक्त्वा देवमन्दिरे सुदर्शनदेवमन्वाविशत्॥

प्रत्यहमेवमेवागत्य स्वभटं सूत्रधारं प्रशस्य किञ्चिदुपदिश्य हितं स्वस्थानं प्राविशत्। प्रातिवेशिकेन लक्ष्मीविलासस्थितेन नरसिंहार्येण प्रत्यहमादित्यहृदयपारायणकरणादञ्जने सूर्यनारायणः आगत्य सूत्रधारं प्रशस्य "तच्छासनमनुपालयन्तु सर्वे" इत्यबोधयत्तदा तदा। प्रतिभार्गववासरमागतया वीरलक्ष्म्या च प्रशंसितोऽभूत्सूत्रधारः। कर्णाटदेशत्वादस्य कर्णाटकभाषया लिप्या च लिलेख प्रथमं सर्वं विषयम्। तदाञ्जनसूत्रधारेणोक्तम्। "अस्याञ्जनस्य मुख्याधिकारी सुदर्शनदेवः। अहं तु त[illegible]टः" इति। एवमन्वहं 'भंटः' 'भंटः' इति देशभाषया व्यवह्रियते स्म। कस्मिंश्चिद्दिवसे जरठः प्राह। इतःपरं 'भंटः' इति नायं व्यवहर्तव्यः। किन्तु सुदर्शनदासः इति" इति। ततस्तेन सूत्रधारेण स्वभोग्यतया तन्नामानुमोदितम्। ततःप्रभृति 'सुदर्शनदासः' इत्येव तस्य व्यवहारः प्रावर्तत॥

कदाचित् "अञ्जनद्रष्ट्र्याः किञ्चिन्नाम निधेहि" इत्युक्तः प्राह जरठः 'वरवर्णिनी' इति। ततःप्रभृति सा वरवर्णिनीत्येव व्यवहारमलभत। सर्वैरञ्जनाभिमानिभिर्देवैरनुमोदितञ्च तदेव। वात्स्यनरसिंहार्यगृहस्यैकं नाम निधेहि इत्युक्तो जरठः यावदनुगुणं नाम चिन्तयति तावदेव लक्ष्मीदेव्या 'लक्ष्मी-

विलासः' इति नाम कृतम् । अनुपदमेव सुदर्शनार्येण तद्गृहद्वारि कवाटे च तथैव लिखितम् । ततःप्रभृति तद्भवनस्य तथैव प्रथा ॥

अञ्जनसूत्रधारस्य प्रथमदर्शनसमये सोष्णीषत्वश्मश्रुलत्वनिटिलतलमषी-स्थासकादिदर्शनेन च सर्वेषां देवतान्तरत्वधीर्जाता । अत एवाञ्जनदर्शन-समयेऽपि जरठशालायाः द्वारबहिर्भाग एवावातिष्ठत । क्रमेण च तेन सर्वेषां शङ्कापरिहाराय निजस्वरूपं नित्यसूरित्वेन श्रीवैष्णवाग्रेसरत्वेन प्रदर्शितं तस्यै । तच्च रूपं प्रकटीकरिष्यते समये ॥

कतिपयदिवसानन्तरं कस्मिंश्चिद्दिवसे रात्रावञ्जनं दृष्ट्वा जरठशालातो निर्गताया वरवर्णिन्याश्शरीरमाविवेश द्वारबहिस्स्थितस्सूत्रधारस्तेजोरूपेणापूर्वेण । ततःपूर्वं वरवर्णिन्याः नानाविधभूतगणदर्शनं तज्जन्यभयादिकं तज्जन्यशरीर-ग्लानिहिंसाद्यनुभवः आहारादिजन्यपोषादिकं प्राकृतशरीरकार्यं सर्वमनुभूयमान-मासीत् । तेजःप्रवेशानन्तरं तु प्राकृतशरीरकार्यं सर्वं न्यवर्तत । केवलं वायवीयशरीरमिवातिलघुभूतं परतन्त्रमिवासीत् ॥

एकदा वरवर्णिनी सूत्रधारेण नियुक्ताभूत् । "कल्याणसरसि स्नात्वा त्वरितमायाहि ; कञ्चिन्मन्त्रमुपदेक्ष्यामी"ति । ततस्तस्यै लक्ष्मीमन्त्रस्तदङ्गतया मन्त्रद्वयं चोपदिष्टं तेन । ततः प्रत्यहं तज्जपः प्राचलत् । प्रतिभार्गववासरं मौनं भगवन्निवेदिते सात्विके वस्तुनि कबलद्वयमात्राहारश्च नियमितोऽभूत् । अष्टाचत्वारिंशद्दिवसानन्तरमिदं पद्यमुपदिष्टं तस्यै ॥

"शङ्खी चक्री विधृतमकुटः कुण्डली चोन्नसोऽयं
दंष्ट्री प्रांशुः कमलनयनश्शुभ्रमृत्स्नोर्ध्वपुण्ड्रः ।
गाङ्गेयाभो गलचलमहापद्मबीजाक्षमालो
लक्ष्मीदासो वसतु हृदि मे बद्धकौशेयकच्छः ॥" इति ॥

उक्तश्चाहमेवाचार्यस्ते । अनुसन्धत्स्वेदं पद्यं मद्विषयमधित्रिसन्ध्यमिति । तथैव सान्वतिष्ठत् । अथ प्रत्यहं प्रातरेकादशघण्टासमये सायं सप्तघण्टासमये च सौभाग्यभवने लक्ष्मीसमाराधनानन्तरं वरवर्णिनी चर्मचक्षुषैव साक्षात्कृत्य वीरलक्ष्मीं लक्ष्मीदासञ्च वर्णयत्येवं द्राविडभाषया ॥

" विशालकमलासनां नलिनशोभिहस्तद्वयां
अभीतिवरमुद्रिकाविशदसर्वरक्षाभराम् ॥
किरीटमणिमण्डितामलकशोभिवक्त्राम्बुजां
सुफालतिलकाञ्चितां स्मितनिगूढनासामणिम् ॥ १ ॥

विशालनयनत्विषा पिहितनीलभव्याञ्जनां
विभूषितविभूषणां मृदुमनोज्ञसर्वाङ्गकैः ।
धृतेन्दुधवलाम्बरां विविधरत्नकांच्या दृढं
भृशं तनुवलग्नकां कमलजेतृपादद्वयाम् ॥ २ ॥

कटाक्षलहरीसुधां श्रितजने किरन्तीं सदा
समस्तजननीं तथा मम च वीरलक्ष्मीं भजे ।
अहेतुकदयारसां सरसभाषिणीं सन्ततं
गृहीतवरवर्णिनीं प्रियविनीतदासां स्वतः ॥ ३ ॥

दिशागजकराग्रतः कनककुम्भतीर्थोक्षितां
श्रिताखिलफलप्रदां परमदैवतं दैवतात् ।
भ्रुवोर्नयनयोस्तथा विलसितैश्च मन्दस्मितैः
वशीकृतजगत्पतिं श्रितजनार्थसन्दायिनीम् ॥ ४ ॥

सौभाग्यभवने सम्पत्पुत्रपार्श्वे च दक्षिणे ।
हयग्रीवस्य पुरतो वामाङ्के च प्रदीपतः ॥ ५ ॥

हृदये वरवर्णिन्याः कुर्वन्त्यै नित्यसन्निधिम् ।
मङ्गलं वीरलक्ष्म्यै स्याद्भूयो भूयश्च मङ्गलम् ॥ ६ ॥

तस्याश्च दक्षिणे पार्श्वे शङ्खचक्रगदाधरम् ।
किरीटिनं कुण्डलिनं पद्मबीजाक्षमालिनम् ॥ ७ ॥

पुण्ड्रैर्द्वादशभिश्शुभ्रमृत्स्नाविरचितैश्शुभैः ।
शोभितं विनयानम्रं शुभ्रकौशेयकच्छकम् ॥ ८ ॥

दंष्ट्रिणं प्रांशुमत्यन्तकरुणावरुणालयम् ।
पद्मपत्रविशालाक्षमुन्नसं चारुदर्शनम् ॥ ९ ॥
स्वभक्तदर्शनानन्दबाष्पपूरितलोचनम् ।
लक्ष्मीदासं प्रपद्येऽहं शरण्यं शरणार्थिनाम् ॥ १० ॥" इति ॥

कदाचित्सुदर्शनदेवेन वीरलक्ष्म्या सूर्यनारायणेन चैवमाज्ञप्तावयंगृहत्रयस्थितास्सर्वे । "भो! भो! भाग्यशालिनः युष्मद्भाग्यवशादयं लक्ष्मीदासोऽञ्जनद्वारा अत्र समागतः । एतस्य महत्फलं षण्मासानन्तरं युष्माभिरनुभविष्यते" इति । तथैव १५-३-१९५३ दिवसे तैरेवाज्ञप्ता वयम् । "श्वः परश्वो वा श्रीलक्ष्मीदासविरचितः कश्चन गद्यप्रबन्धः प्रातरेकादशघटिकासमये लक्ष्म्याः देव्याः आराधनसमये निमेषमात्र एव काले वरवर्णिन्याः कर्णयोर्निपात्यते तेनैव । यावच्छ्रुतं तं भागं रात्रौ नवघटिकानन्तरं भक्तिविलासे वरवर्णिनी कथयिष्यति । यूयं तं भागं पुस्तके विलिख्य गृहे सुरक्षितं कृत्वा तं प्रबन्धमनुदिनं पठत । तदर्थमनुसन्दधतां युष्माकं कर्मग्रन्थिश्श्लथीभविष्यति । अत्र परत्र च श्रेयःपरम्परां प्राप्स्यथ । सर्वमन्त्रबीजाक्षरभरितोऽयं प्रबन्धः । चतुर्दशस्वपि भुवनेषु दुर्लभः एतादृशः प्रबन्धः । अत्र विषयेऽतीव श्रद्धालुभिर्भाव्यं भवद्भि"रिति । किञ्च "वरवर्णिनीपतिना वकुलभूषणनाम्ना महाकविना विरचितं यदद्भुतदूतं नाम महाकाव्यं तस्य व्याख्या च 'रत्नप्रभा'ख्या तद्विरचितैव तस्याः कर्णयोर्निपातयिष्यते यावद्भागं, तावती तत्पतिना तथैव सा लेख्या" इति च ॥

ततश्च १७-३-५३ दिवसे प्रातश्श्रुत्वा रात्रौ प्रारभ्यत वरवर्णिन्या स गद्यप्रबन्धः । तदा श्रीभाष्यकारेण श्रीरामानुजमुनिना तदनुचरेण श्रीवत्सचिह्नमिश्रेण परमसात्त्विकेन द्राविडाम्नायदर्शिना प्रपन्नजनकूटस्थेन पराङ्कुशमुनिना, द्राविडाम्नायषडङ्गभूतषट्प्रबन्धीनिर्मात्रा चतुष्कविशिखामणिना परकालसूरिणा सर्वतन्त्रस्वतन्त्रेण कवितार्किकसिंहेन वेदान्ताचार्येण वेदान्तरहस्यग्रन्थानां निबन्धकेन लोकाचार्येण तद्व्याख्यात्रा वरवरमुनिना च तत्प्रबन्धश्रवणकुतूहलिभिरहमहमिकया समागत्य वरवर्णिनीहृदयावस्थितायै वीरलक्ष्म्यै

नमस्कारोऽयमित्युक्त्वा सकृत्प्रणम्य सर्वेष्वासनेष्वलङ्कृतेषूपविष्टेषु तदाज्ञया, वेदान्ताचार्यास्तु तथैवोक्त्वा त्रिवारं चतुर्वारं वा प्रणेमुः। वीरलक्ष्म्या तु अलमत्यादरेण ; सकृत्कृतेनापि प्रणामेन तुष्याम्यहमिति निषिद्धा अपि मम मतमिदमाचरिष्यामीत्युक्त्वा यथोचिते स्थाने उपविविशुः। सर्वेषु तेभ्यो नमस्कृत्योपविष्टेषु वरवर्णिनी प्रारभत वक्तुं प्रबन्धम्। तत्र प्रथमं वीरलक्ष्मी-विषयको मङ्गलश्लोकः। ततश्चाष्टोत्तरशतदिव्यदेशेष्वभ्यर्हितस्य दिव्यक्षेत्र-चतुष्टयस्य नायकेभ्यः रङ्गनाथश्रीनिवासवरदनारायणेभ्यो नमस्कारप्रतिपादकं पद्यम् 'श्रीरङ्गमङ्गलमणिं' इत्यादिकम्। ततो रामानुजार्यविषयको मङ्गल-श्लोकः। ततो भक्तिविलासस्थितजरठविषयको मङ्गलश्लोकः। ततो यादवगिरि-वर्णनप्रसङ्गेनेदानीन्तनवर्णाश्रमधर्मवैपरीत्यवर्णनपूर्वकं "कलिवैभववर्णनं नाम प्रथममालिका समाप्ता" इति प्रथमभागस्समापितः। ततो द्वितीयमालिकायां श्रीरङ्गक्षेत्रवर्णनं दृश्यते। इत उपरि कथा कथं प्रादुर्भविष्यतीत्येतत्सर्वं स एव जानाति लक्ष्मीदासः। यस्मिन्दिवसे गद्यकाव्यमुदेति वरवर्णिनीवदनात् तत्परेद्युरेव वरवर्णिनीभर्तुर्वकुलभूषणकवेः काव्यस्य व्याख्या प्रादुर्भविष्यति। अधुना तु पञ्चदशसर्गात्मके काव्ये प्रथमसर्गे चत्वारिंशत्पद्यानां व्याख्या निष्पन्ना ॥

अपि च १९-४-१९५३ तमदिवसे श्रीभाष्यकारस्य भगवतो रामानुजाचार्यस्यावतारदिवसमहोत्सवस्समपद्यत। तस्मिन्नेव दिवसे श्रीरामा-नुजाचार्यैः प्रार्थितो लक्ष्मीदासः वीरलक्ष्म्याः मङ्गलश्लोकान्वरवर्णिनीमुखेन वक्तुमारभत। मङ्गलश्लोकस्तु प्रतिभार्गववासरं प्रतिभौमवासरं च एकैक एव प्रादुर्भवति। ते चाद्यावधि द्वादशैव श्लोकाः प्रादुरभवन्। गद्यप्रबन्धावतारस्तु षट्सु दिवसेष्वेकवारमेव। मध्ये विश्रान्तिः। एतत्सर्वमञ्जननिरपेक्षमेव वरवर्णिनी-वदनान्निस्सरति। याभिर्देवताभिः यैश्च सूरिगणैः यैश्चाचार्यैः यैश्च भूतगणैः यद्यद्वक्तुमिष्टं तत्सर्वमधिष्ठितैस्तैस्तैरेव वरवर्णिनीमुखद्वारैवोच्यते। अञ्जनदर्शना-रम्भप्रभृति एतावता कालेन यैरागत्य यद्यद्भाषितं तस्य सर्वस्य लेखने महा-भारतसमसंख्यतामारोहेत् ॥

अयञ्चोपोद्धातः वरवर्णिनीशरीराधिष्ठितया वीरलक्ष्म्या “मुखमुद्रां विरचय” इति नियुक्तेन जरठेन मुखमुद्राशब्दस्योपोद्धातार्थकतामजानता मौनार्थकतां मन्वानेन ‘मौन्येवास्मि’ इत्युक्ते सा प्राह। “न मद्वाक्यं रोचते ते। तव भक्तिभाजनं रामानुजमुनिः नियोक्ष्यति” इति। अन्येद्युर्भगवान्भाष्यकारो रामानुजाचार्यो वरवर्णिनीशरीरमधिष्ठायात्रोचत्। “जरठ! त्वमेव लिखास्य लक्ष्मीदासकृतगद्यप्रबन्धस्योपोद्धातम्।” इति। जरठेनोक्तम्। “यदि भवन्तो ममहृदयमधिष्ठाय लेखयन्ति, तदा भवतामाज्ञाबलेन लिखामि” इति। ततश्च तथैव लिखितः। अत्र चोपोद्धाते असत्यभूतः एकोऽप्यर्थो नास्ति। अपितु चाक्षुषप्रत्यक्षाभावेऽपि तत्सदृशेन श्रावणप्रत्यक्षेणानुभूतेष्वर्थेषु ये मम स्मृतिपथमारूढाः रामानुजार्यकृपया तावन्त एवार्थाः लिखिताः। अद्यावधि ग्रन्थकृता ग्रन्थनाम न निर्दिष्टम्। अपितु गद्यप्रबन्धः इत्येव। यदा निर्देक्ष्यते नाम तदाहमपि प्रकटीकरिष्यामि। इति शम्॥

**श्री बालधन्वि जग्गु वेङ्कटाचार्यः (जरठः)**
साहित्यरत्नं, आस्थानमहाविद्वान्, शास्त्रकविरत्नं,
साहित्यालङ्कार, साङ्ख्ययोग वेदान्तविद्वान्, साङ्ख्यतीर्थः

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

# भूमिका

जयतु जगदीशजाया जगतां जननी च वीरलक्ष्मीश्श्रीः ।
ब्रह्माण्डानि च यस्याः क्रीडायै कन्दुकाः कृता येन ॥ १ ॥

जगज्जनन्याश्शिष्योऽयं लक्ष्मीदासो जयेत्सदा ।
न्यस्तसर्वभरो यस्मिन्विष्णुर्विहरति श्रिया ॥ २ ॥

हन्त ! भोः !!

जनिभयजर्झरितनिजात्मनां ऐहिकमेव सुखजातं परमपुरुषार्थं मत्वा तत्रैव लीनानां अनन्तक्लेशभाजने भवसागरे निमज्जतां जन्तूनां समुद्धरणाय स खलु भगवान् सुरनरतिर्यगादिष्ववततार । अवतारकाले च तत्कटाक्षेण केचिदेव समुत्तेरुर्भवाम्भोधिम् । येषु चोदासीनस्स समभवत्ते सर्वेऽपि तस्मिन्नपचारेण निहीनतरजन्मादिप्राप्त्या अद्य यावत् क्लेशजातमनुभवन्ति । अतो भगवतस्सर्वावतारापवादतया तस्यैव पट्टमहिषी श्रीर्नाम्नी समवातरदद्यत्वे वरवर्णिनीशरीराधिष्ठानमुखेन ॥

यश्चावतारः परमे व्योम्नि दिव्यदम्पत्योः परस्परस्पर्धासल्लापमुखेनानादावेव काले सङ्कल्पितः । यमवलम्ब्यैव सर्वेऽपि नित्या मुक्ताश्चाधिष्ठातृत्वेनावतीर्णाः स्वावतारकालेषु भावितानि निजेप्सितानि निर्विशन्तः, तदानीमननुभूततयावशिष्टानि चानुभूय पूर्णकामा भवन्ति । येन च निखिलभगवदवतारकालेषु भगवति कृतोऽपरिहार्योऽवश्यानुभवैकनाश्यश्चापचारदोषः, भागवतापचारप्रभृतिसकलदोषगणश्च निखिलजन्तूनां परिह्रियते । यस्मै च स्पृहयन्ति चातका वलाहकायेव निखिललोकाः । यस्माच्चाकालकाल्याः भगवद्भागवतावताराः समनुभूयन्तेऽस्माभिर्विभवनिर्विशेषमद्यैव । यस्य च परिग्रहेण भगवती जगज्जननी कृतकृत्यतामवाप । यस्मिंश्च सति कथञ्चिदपि पूर्वोदितोऽपचारदोषो न संक्रामत्यद्यतनजन्तुषु ॥

अधिष्ठानं किं नामेति चास्मिन्नेव ग्रन्थे पञ्चममालिकायां (पृ. ३३) स्पष्टतरमेव प्रतिपादितम् । विगतात्मनि शरीरेऽन्येन जीवात्मनान्तः प्रविश्य तदिन्द्रियेषु स्वेन्द्रियाण्यधिष्ठाप्य नियमनं यत्तदधिष्ठानं नाम । यदि च यः कोऽपि चेतनश्चेतनान्तरमाविश्य नियमयति स आवेशः । आवेशावतारश्च द्विविधः । स्वरूपेणावेशः शक्त्यावेशश्चेति । व्यासजामदग्न्यादयोऽत्र दृष्टान्तभूताः । इदञ्च स्पष्टतरं प्रपञ्चितं वेदान्ताचार्यैः वरवरमुनिभिश्च सारास्वादिन्यां तत्त्वत्रयव्याख्याने च ॥

न भूतपूर्वोऽयमधिष्ठानावतारः । न च भावी कालान्तरे कल्पान्तरे वा । नापि श्रुतपूर्वः पुराणादिषु । तदिदंप्रथमोऽयमवतारः । भगवतोऽवतारेषु यद्यन्न साधितं, तत्सर्वमप्यस्मिन्नधिष्ठानावतारे श्रिया साध्यते । अतश्चैकादशोऽयमवतार इति रामानुजादिभिराचार्यैरधिष्ठानमुखेन तदातदा प्रशंस्यते । अस्याधिष्ठानस्य न कश्चित्किञ्चिदपि वा कारणं भवितुमर्हति । किन्तु भगवत्याः निर्हेतुककटाक्षमूलकोऽनादिकालकल्पितस्सङ्कल्प एव । वरवर्णिन्याः नयनरञ्जनमञ्जनमजनि व्याजमात्रम् । अञ्जनदर्शनादिक्रमश्च विशदीकृतोऽस्मिन्नेव ग्रन्थे ॥

अथ कदाचिदञ्जनस्वामी श्रीमान् हेतिराजः सुदर्शनः लक्ष्मीदासगुणगणकथनावसरे "चतुर्दशभुवनेष्वप्यद्वितीयः कविवरोऽयं दास" इति वर्णयामास । कविताचातुर्यमस्य पश्येमेति विचिन्तयत्स्वस्मासु द्वित्रेष्वेव दिनेषु अञ्जने सायं ६-५० घण्टावादनसमये समुपादिशत्प्रथममेव गुरुवर्यस्य श्री बालधन्विवेङ्कटार्यस्य विषये 'कृष्णाश्लेष' इत्यादिकं पद्यद्वयम् । यदुच्यते सम्प्रदायज्ञैस्तनियन्निति । स च दिवसः क्रिस्ताब्दे २९-१-१९५३ तमः । अनेन चैष सत्सम्प्रदायसिद्धां सारतमां चरमपर्वनिष्ठामनुष्ठानेन प्रतिष्ठापयति । ततोऽन्यस्मिन् ३१-१-१९५३ तमे दिवसे सायं ७-१५ घण्टावादनसमये समुपादिशद्वरवर्णिन्यै 'शङ्खी चक्री' इत्यादिकं श्लोकम् । ततः कुतूहलिभिरस्माभिः श्लोकस्स कः ? इति पृष्टस्स तूपादिशदञ्जनमुखेनास्मभ्यं तमेव श्लोकं ३-२-१९५३तमे दिवसे । यश्च सकलविघ्नविनाशकस्सर्वाभीष्टप्रदश्च

लक्ष्मीदासविषयको ध्यानश्लोकः । यज्ज्ञानादावेव काले कृपया स्वयमनुजग्राह वीरलक्ष्मीर्यद्विषयतया । यदनुसन्धानमात्रेण लक्ष्मीदासस्समीपे समुपस्थितो भवति सर्वेषां यथालक्ष्मीनिदेशम् ॥

अथ कदाचिद्भार्गववासरे (२०-२-५३ दिनाङ्के रात्रौ ११-१५ घण्टासमये) वीरलक्ष्मीः (संवादमुखेन) एकं वाक्यार्थमुपक्षिप्याञ्जने पप्रच्छ वृद्धं वेङ्कटार्यम् । "ह्यः लक्ष्मीदासः मामेवमपृच्छत् ।

कृत्वा स्वयं दुरितकर्म यथेच्छमम्ब !
शास्त्रं प्रदत्तमतिलङ्घ्य सुखेप्सयैव ।
त्वय्यर्पिताखिलभरोऽस्मि समुद्धरेति
भक्तिं विनाभिदधतीह नराः किमेतत् ?" इति ॥

अस्य प्रश्नस्यागामिनि भार्गववासरे दीयतामुत्तरमिति च । तस्योत्तरं वृद्धेनोक्तम् ॥

"अज्ञातमेव सुकृतं परिकल्प्य जन्तून्
रक्षिष्यतोः प्रतिभवं युवयोरिहाम्ब !
यद्भक्तिहीनवचनं च समुद्धरेति
तच्चाधिकं भवति पूर्वगुरूक्तसूक्तैः ॥" इति ॥

ततः तदुपरि प्रश्नः कृतोऽन्यस्मिन्भार्गववासरे २०-३-५३ दिनाङ्के रात्रौ १०-४० घण्टासमये ।

"एवं तर्हि जगत्यम्ब ! कोऽपि पापी न हि क्वचित् ।
अनुक्तश्रीशनामास्ति को वा क्लेशे विमूढधीः ॥" इति ॥

तस्योत्तरमेवं दत्तम् ।

"एकैकमुक्तिगमनेऽपि न हीयतेऽम्ब !
लीलाविभूतिरिह ते विविधाधिकारे ।
तत्पूरणाय कतिचिन्निहितास्त्वयैव
गीतं 'न मा'मिति पुरा पुरुषोत्तमेन ॥ १ ॥

कीर्तनं भगवन्नाम्नां द्वेषहेतुरभूत्किल !
हिरण्यस्य प्रिये पुत्रे न सन्ति कतिवेदृशाः ? ॥ २ ॥

दैवासुरविभागोऽपि गीतः कृष्णेन चासुराः ।
लीलाविभूतिं पुष्णन्ति दैवास्तत्प्रतिकोटिगाः ॥ " इति ॥

ततस्त्वभ्युपगतो वादः । निरूपितो निर्णयश्च, ३१-३-५३ दिनाङ्के सायं ७-३५ घण्टासमये ।

"यद्यप्यम्ब ! तवास्त्येव निर्हेतुकदयानघा ।
तथाप्यात्मगुणोपेतैर्नृभिर्भाव्यं श्रुतिध्वजैः ॥ इति ॥

अयमेको वाक्यार्थस्सुनिष्पन्नः । अन्यदा वरवर्णिनीशरीरात्मनोरपृथक्सिद्धतया तयोः पार्थक्यमशास्त्रीयं जानता वृद्धेन प्रश्नः कृतः । तस्योत्तरं ३-४-५३ दिनाङ्के रात्रौ १०-२७ घण्टासमये उत्तरं निरूप्य संशयः परिहृतः ।

"मदधिष्ठानतोऽप्यम्ब ! सदा त्वदनुभूतितः ।
बहिर्व्यापारशून्योऽस्मिन्नात्मासत्कल्प एव हि ॥ " इति ॥

एवं द्वितीयो वाक्यार्थः सुनिष्पन्नः । अन्यदा आत्मचक्षुषैव श्रियं दृष्ट्वा वर्णयन्त्यां वरवर्णिन्यां, "न चक्षुषा गृह्यते नापि वाचा" इत्यादिश्रुतिविरोधं भावयता वृद्धेनैवं प्रश्नः कृतः ।

"लक्ष्मीदास ! दयाम्भोधे ! छिन्धि नस्संशयं हृदः ।
बाह्यं किमान्तरं चक्षुर्यद्दिव्यत्वेन कीर्त्यते ॥ १ ॥

बाह्यत्वे श्रुतिवाक्यानां विरोधस्स्फुट एव हि ।
आन्तरत्वे कथं दृष्ट्वा वर्णयेद्वरवर्णिनी ॥ २ ॥ " इति ॥

तस्य च प्रतिबन्दितयोत्तरं न्यरूपयल्लक्ष्मीदासः ।

"रामकृष्णादयस्त्वम्ब ! पञ्चोपनिषदात्मकाः ।
प्राकृतैश्चर्मचक्षुर्भिः कथं दृष्टा निवेदय ॥ " इति ॥

मांसचक्षुषाऽभिदर्शने भगवतः स्वेच्छैव निदानमिति हृदयम् । एवं तृतीयो वाक्यार्थस्सम्पन्नः ॥

अन्यदा—भगवतस्सेनानायकाय विष्वक्सेनाय निवेदितं न केनापि स्वीकार्यमिति पाञ्चरात्रसंहितासु प्रतिपादितम् । अत्र विशयः प्रस्तुतः । 'श्रीमते विष्वक्सेनाय नमः' 'श्रियै नमः' इति गुरुपरम्परानुसन्धीयमानस्य दास्यनाम्ना लक्ष्मीदासशब्दाभिलपनीयस्य तस्य गुरुत्वेन तन्निवेदितं सर्वथा परिग्राह्यं वा ? उत सैन्याधिपत्यनियुक्तत्वेनापाङ्क्तेयतया तन्निषिद्धम् ? इति । तदा लक्ष्मीदासोऽपृच्छत् । विष्वक्सेनस्यास्ति किं नामान्तरमिति । तदास्माभिरुक्तम् । "रामानुजार्यैः गद्ये 'शेषशेषाशनगरुडप्रमुख' इत्युक्त्वा 'शेषाशनः' इति नामान्तर"मिति । तस्य कोऽर्थः ? इति पृष्टाश्च 'भगवन्निवेदितशेषभोजी' इत्यर्थः । 'त्वदीयभुक्तोज्झितशेषभोजिना' इति यामुनमुनिवचनात्" इत्यब्रूम । तर्हि सर्वेऽपि भगवद्भक्ताः शेषभोजिन एव । 'यज्ञशिष्टाशिनस्सन्तः' इत्यादिवचनात् । यागो नाम भगवदाराधनं खलु ? अतोऽस्यैव शेषाशनत्वे कारणं किमिति पृष्टा वयं निरुत्तरा अभूम । तदा स्वयमेव तस्यार्थं व्यवृणोत् । "भगवतस्सर्वान्तर्यामितया सर्वगत्वात्, विभूतिद्वयगतचेतनाचेतनेषु अन्तर्यामित्वेन यावन्ति रूपाणि तेन परिगृहीतानि, तत्र सर्वत्र विद्यमानायान्तर्यामिणे तस्मै सर्वं निवेदयितुं प्रभवत्ययमेकः एव । नान्यः कश्चन । अतस्तन्निवेदितशिष्टभोजी अयमेक एव । सर्वस्यापि निवेदनीयत्वेनान्यस्य शिष्टभोजिनः असत्वात् विष्वक्सेननिवेदितशिष्टस्य स्वीकर्तुरेवाभावात् पाञ्चरात्रवचनं प्रमाणतमम् । परिगृहीतुरभावादपरिग्राह्यत्वमर्थादापतितम्" इत्येवं चतुर्थो वाक्यार्थस्सम्पन्नः । एवं भगवतो गुणादिविषये चेतनसमाधिना धर्मित्वम् इत्यादयश्च शास्त्रानुभवयोरवेद्याः विषयाः निरूपिताः । एवमनेकदानेकधा संशयलहरीः तदा तदा पर्यहार्षीत् ॥

एवमधिष्ठानादिविचारे लक्ष्मीदासप्रोच्यमानवचनप्रामाण्यविचारेऽन्यत्र च विषये सन्दिहानाः अशीतिवृद्धाः चतुश्शास्त्रविशारदाः साहित्यरत्नशास्त्रकविरत्नाद्यनेकबिरुदावलिभूषिताः उभयवेदान्तप्रवचननिष्णाताः तथैवानुष्ठाननिष्ठागरिष्ठाः श्रीमन्तो बालधन्विवेङ्कटार्यगुरुवर्याः शास्त्रीयैरेतादृशैर्वाक्यार्थशतैः परितुष्टनिजान्तरङ्गाः स्वीयस्नुषात्वेन व्यवह्रियमाणं स्त्रीशरीरमधितिष्ठ-

मानस्य लक्ष्मीदासस्य वचनेषु विस्रब्धाः सर्वेष्वपि विषयेषु प्रामाण्यमङ्गीकृत्याप्ततमत्वेन तं परिजगृहुः ॥

कदाचिद्रामानुजमुनिः लक्ष्मीदासमवोचत्—"मया तावद्वैकुण्ठलोको यथा प्रत्यक्षमीक्षितस्तथैव गद्ये वर्णितः। त्वयाप्येतदधिष्ठानावतारस्मारकतया भगवत्याः वीरलक्ष्म्याः स्थानविशेषस्य श्रीलोकस्य वर्णना निबध्यतां ग्रन्थमुखेन" इति। परमकारुणिकस्स तु लक्ष्मीदासः रामानुजार्यप्रार्थनया भगवत्याः नियमनानुसारं च मासत्रयं (यावदनशनव्रती भूत्वा) चरितव्रतश्चकार गद्यप्रबन्धम्। कस्मिंश्चिद्दिने च वीरलक्ष्मीः प्रोवाच— "दासेन एकः गद्यग्रन्थो निबद्धः। स च ग्रन्थः अस्मिन्दिवसे रात्रौ वरवर्णिनीमुखवरादाविर्भविष्यति" इति। कोऽयं प्रबन्ध इति कुतूहलिष्वस्मासु १७-३-५३ दिनाङ्के रात्रौ दशघण्टावादनसमये शरीराधिष्ठिता गृहलक्ष्मीः भक्तिविलासे प्रथममेव सज्जीकृते स्वीये विष्टरे समुपविश्य गद्यप्रबन्धं व्याजहार। पराङ्कुशपरकालयतिवरादयस्सकललोकैर्लोकपालैश्च समं श्रोतृवर्गे समन्वितास्सम्प्रहृष्टाः गृहलक्ष्मीं प्रशशंसुः ॥

अद्य यावन्मुद्रितस्यास्य ग्रन्थस्यान्तिमो भागः ९-९-५६ दिनाङ्के प्रादुरभूत्। ग्रन्थस्य नाद्यापि नाम निर्दिष्टम्। एतदवधिकविषयप्राधान्यमवलम्ब्य मयैव 'श्रीलोकगद्यम्' इति नाम निहितम्। एकदा वीरलक्ष्मीः "ग्रन्थस्यायमेकः प्रघट्टः। महदस्त्यवशिष्टम्" इति प्रावोचत्। अतः कियद्वा ग्रन्थपरिमाणमिति न ज्ञायतेऽस्माभिः। रामायणे यथोत्तरं काण्डं परस्तादवातरत्तथैवावशिष्टो भागः कदा वा प्रादुर्भविष्यतीति तु न विद्मः ॥

ग्रन्थावतरणप्रथमदिवसे प्रादुर्भूतं "जगन्मङ्गलाय विराजते" इत्यन्तं भागं श्रुत्वा निरतिशयेनानिर्वचनीयेनाश्चर्येण सर्वे वयं स्तब्धाः मुग्धाः किमेतत्? कथमिदम्? क्व वा स्मः? कथं वाविदितसंस्कृतगन्धया निरर्गलमेवं व्याहृतम्? केयं वर्णनपरिपाटी? कीदृशोऽलङ्कारः? का वा शैली? इत्यादिकं भाषमाणाः रात्रौ यावद्घण्टाद्वयं जागृता एवाभूम। अश्रुतपूर्वाणां श्रीलोकादीनामस्मिन् ग्रन्थे वर्णनेन रसालङ्कारशैलीपाकादीनामन्यादृशत्वेन दिव्यलोकस्थितेरद्भुततर-

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते लक्ष्मीदासाय नमः

श्रीमत्यै वीरलक्ष्म्यै नमः

श्री भगवल्लक्ष्मीदासानुगृहीतम्

# श्री लोकगद्यम्

## प्रथममालिका

यस्याः कटाक्षलेशेन प्राणी प्राचीनबर्हिताम् ।
उपैति तां महादेवीं वीरलक्ष्मीं नमाम्यहम् ॥ १ ॥

श्रीरङ्गमङ्गलमणिं करुणानिवासं
श्रीवेङ्कटाद्रिशिखरालयकालमेघम् ।
श्रीहस्तिशैलशिखरोज्ज्वलपारिजातं
श्रीशं नमामि शिरसा यदुशैलदीपम् ॥ २ ॥

रामानुजमुनिर्जीयात् रामप्रियपिता गुरुः ।
इन्द्रनीलममूल्यं यो यादवाद्रौ व्यदर्शयत् ॥ ३ ॥

यादवाद्रिकुटीरोऽयमाम्नायान्तविशारदः ।
जीयाद्वेङ्कटवर्यश्श्रीशिङ्गरार्यतनूभवः ॥ ४ ॥

अहो ! यदुशैलस्य कोऽपि महिमातिशयः । यत्र विराजते श्रुतिप्रणयिनी प्रणवरूपिणी कल्याणी । यश्चाम्नाय इव मन्त्राष्टाक्षरैरष्टभिस्तीर्थ-रावेष्टयमानः त्रायते मन्तॄन् । यश्च नैसर्गिकेणात्मरामणीयकेन प्रकृति-सौन्दर्याभिलाषिणां चित्तमाकर्षति । ज्ञानिनां प्लावयति हृदयम् । उन्मूलयति मोहान्धकारम् । कन्दलयति ज्ञानज्योतिः । दलयति किल्बिषषण्डम् । विवर्धयति भगवति भक्तिम् । श्लथयति विषयेषु सक्तिम् । उच्चाटयति

दौर्जन्यम्। उल्लासयति च वैराग्यम्। यद्दिदृक्षया वैराग्यैकनिलयोऽपि यतिराजसार्वभौमो धर्मप्रवर्तयितापि दूरीकृत्य तुरीयाश्रमानुरूपं काषायाम्बरं सत्त्वगुणधवलं वासो वसानस्ततो निववृते।

यत्र च भगवान्नारायणः क्षीरपारावारात् दिव्यायामयोध्यायां वैभवेन राम इव सीतया, द्वारकायां कृष्ण इव रुक्मिण्या च लक्ष्म्या समधिगतार्चा-रूपोऽपि लब्धवैभव इव सौन्दर्यसौशील्यसौलभ्यगाम्भीर्यमाधुर्यकारुण्य-वात्सल्यादिनिरवधिककल्याणगुणगणविभवेन दृगासेचनकदिव्यमङ्गलविग्रहः पापीयसामपि मनांसि समावर्जयन्नावसति।

मारशरासनभङ्गुराभ्यां लावण्यमयविस्तीर्णनयनालवालकन्दलिताभ्यां भ्रूलताभ्यामभिरामं, मन्दस्मितं, मुग्धमुग्धकपोलचुबुकं, सकलजनहृदयालवाल-निरन्तरमोहान्धकारतमालनिकृन्तनकृतक्षुरप्रप्रतीकाशकस्तूरीतिलककलितविशा-लफालं, मुग्धमुग्धं मुखपुण्डरीकं दधानः संयमिसार्वभौमस्य भगवद्रामानुजार्यस्य चक्षुः हृदयं सर्वस्वं च यदुशिखरिशिखरसञ्चारी केसरिकिशोरः, भक्तबृन्दपरि-लालनीयः, सुकुमारः सम्पत्कुमारस्सादरं विहरति यत्र च भुवनभाग्यविशेषेण।

हन्त! द्रविणोदनैकमानसानां दूरीकृतभक्तीनां यादवाद्रिवासिनां मौर्ख्यम्। यन्मृदूपलाल्यं कृतार्चावतारतया परतंत्रं, सौन्दर्यरत्नखनिं जगत्सर्वस्वं रामप्रियं पुत्रिकानर्तं नर्तयन्ति कठोरमानसाः। अहो! कलेस्साम्राज्यं! यदनुपादेयाय स्पृहयन्ति मानवाः; न तूपादेयाय। अथवा किमेतैः कलिमलकलुषितस्वान्तैः मर्त्यमात्रकरीरैः। यमनवरतमपि जगदेकगुरुर्भगवान् भाष्यकारो बद्धपरिकरो बद्धाञ्जलिपुटश्च लालयति वात्सल्यातिरेकेण वत्सनिर्वि-शेषम्। हन्त! सकलमौलिलाल्यं प्रत्नरत्नं वानरकरगतमिव नरकरगतं भगवद्रत्नमिदम्।

यत्र चोदग्रगोपुरकैतवदीयमानजनताभयमुद्रो जरन्नरकेसरी दुर्जनगज-घटादमनदक्षोऽप्युदासीनवदासीनः चतुर्वर्गवदान्यः निजप्रशान्तरूपापहृतद्रष्टृ-जनतापत्रयो जगन्मङ्गलाय विराजते।

एवं भगवन्तं परमकारुणिकं कलिमलकलुषिते मध्यमलोके कृतावासमपि विस्मृत्य मानिनो मानवाः यथेच्छं प्रवर्तन्ते। महदिदमाश्चर्यम्। अथवा कलिः किं वा न कारयत्यकार्यम्। वर्णाश्रमाणां वैपरीत्यं कस्य वा नोद्वेजयति हृदयम्। तथाहि—

जन्मान्तरसहस्रोपचितसुकृतविशेषलब्धब्राह्मण्याः मानवाः लौभ्यविस्मृततद्वर्णमहिमातिशयाः कुक्षिंभरयः पशुवृत्तयः विज्ञानमात्रतृप्ताः भङ्गुरशरीरपोषणैकतानाः वितानविहीनाः धिक्कृतमातापितरः द्वितीयैकदेवताः विषयामिषगृध्रवः अलर्ककर्कशाः परित्यक्तस्वजन्मभूम्यभिमानाः प्रतिनगरं प्रतिदेशान्तरं प्रतिद्वीपान्तरञ्च पर्यटन्तः, तत्तद्देशानुगुणव्यत्याचारकृतादराः परलोकदूरीकृतदराः स्वकर्मानुरूपप्राप्तवित्ता अपि धनिजनानुकरणोत्सुकाः भोज्याभोज्यविवेकशून्याः स्वमतदूषकाः अन्यमतपोषकाः रुग्णप्रायाः स्तोकायुष्काः कालमतिवाहयन्ति।

अस्तां तावदिदम्। किं ब्रूमो ब्राह्मणस्त्रीणां दौर्जन्यम्। तास्तु—स्वेच्छाचारिण्योऽधिगतकतिपयाक्षराः पण्डितंमन्याः वेषभाषादिभिर्हूणतरुणीमनुकुर्वन्त्यः परित्यक्तगृहकार्यकलापाः पतिनियमितपाकक्रियाः निस्त्रपाः रजोदोषदूषिता अपि शास्त्रबद्धानपि दूषयन्त्यः प्रौढा अप्यकृतपाणिपीडनाः सर्वपुरुषसहवासस्वेच्छाप्रवृत्तयः स्वधर्मासक्तचित्तान् बालिश इति अरसिकः इति परिहसन्त्यः मनसापि स्मर्तुमशक्या इव प्रकाशन्ते मत्तकाशिन्यः।

एवं स्थिते ब्राह्मण्ये वैदिकमार्गानुयायिनः कतिपये विप्रोत्तमाः समधिगतवेदवेदान्तशास्त्राः संस्तुतद्रविडोपनिषदर्था अपि हृदयङ्गमवाग्वैभववशीकृतसकलजनहृदयाः निरतिशयद्रविणाशापाशनियन्त्रितस्वान्ताः वेदान्तवचोभिर्निस्स्पृहतामनूद्य विस्रब्धेभ्यो विप्रलब्धेभ्यो धनिभ्यो धनमाकर्षन्तः उपदेशमात्रतृप्ताः विवर्जितानुष्ठानाः नटा इव वेषमात्रप्रलोभितलौकिकहृदयाः केवलशरीरपोषणायैव यतन्ते।

उपरतेषु नन्देषु क्व वा क्षत्रियाः ? राजानस्तु—विद्यागन्धविहीनाः मदिरास्वादक्षीबाः प्राभवदृप्ताः वित्तमत्ताः स्वायत्तीकृतवर्णत्रयवनिताः दूरीकृत-परलोकभयाः जगदिदमात्मनस्स्वैरार्थं मन्वानाः नीतिधर्मविवर्जिततया दण्डयन्तो निरपराधं, पोषयन्तस्सापराधंजनमुत्कोचेन कौटिल्यनीतिविदो मानयन्तो दुष्टान् दूषयन्तश्शिष्टान् दैवाभिरक्षितप्रजाः परिपालयन्ति राजशब्दोद्धताः रन्ध्रान्वे-षिणो मत्कुणा इव परसारचूषणपराः।

वैश्यास्तु—वेश्याजना इव प्रसार्यासारवस्तुविशेषान् विपर्यस्तमानतया प्रलोभनैकशीलाः स्वपरनिर्विशेषमतयः वाक्चातुर्यविवशीकृतसकलजनहृदयाः बहिःप्रकटीकृतवस्तुसौन्दर्यमात्रापहृतसकलनयनाः स्वापतेयैकमानसतया धर्म-विमुखाः कृत्रिमवस्तुसंयोजनविवर्धितलोकभ्रान्तयः अनुत्पादितसदसद्वस्तु-तारतम्याः आरकूटमपि समाश्रितकूटतया हाटकं काचमपि रत्नं शाणीयमपि कौशेयं कलयन्तः असारमभोग्यमितरेभ्यस्स्पर्शयन्तः डाम्भिकाः निर्निद्राः वित्तगणचित्ताः जीवन्ति वाणिज्येन।

हन्त! शूद्राणां वैभवं किं कथयेयम्? कलिर्हि शूद्रसाद्यकृत्। तदधुना विशृङ्खलास्ते वृषलाः। तथा हि—विस्मृतनिजवृत्तयः अधिकार-लिप्सया सद्यो विद्याढ्या अपि क्षुद्रहृदयाः, कुत्सितकर्मोत्सुकाः द्वेषदूषिते-तरमताः वसुवसुमतीदत्तदृष्टयः अनवरतमपि धिक्कृतब्राह्मणाः अविदितात्म-शरीरविवेकतया लब्धाधिकारतया असहमानान्यमततया चाभिनिवेशप्रवर्तिता-देशाः कठोरमानसाः प्रवर्तयन्तो वर्णसांकर्यं, उन्मूलयन्तो धर्मकलापं, विवर्ध-यन्तः कापथसञ्चारं, उत्पाटयन्तोऽनूचानाचारं, क्षपयन्तः प्रजासौख्यं, परिदेव-यन्तः स्वाश्रितान्, क्षोभयन्तो देवतासपर्याः, मन्यमानाश्चात्मानमेव राजानं, उद्घोषयन्तश्च स्त्रीस्वातंत्र्यं, प्रकटयन्तश्च वेदाध्ययनकौतुकं उपन्यस्यन्तश्च यथेच्छं भगवद्गीतां, व्याहरन्तश्च स्वानुकूलं वेदान्तार्थान् तिरस्कुर्वन्तश्च दुर्गतान् शिक्षयन्तश्च निरपराधान् ब्राह्मणान् समुद्धरन्तश्च सापराधानप्यात्म-जातीयान् चण्डालानपि मण्डयन्तश्चाधिकारदानेन।

आश्रमाणान्तु प्रतीपता कुकूलानलकल्पा अनल्पं दहति हृदयम्। नाममात्रब्रह्मचारिणः पुरश्शिखाकलापकल्पिताकल्पाः यज्ञोपवीतं शरीरभारमिव मन्वानाः सीमन्तेन मुखमुण्डनेन सीमन्तिनीमनुकुर्वन्तः निर्वेददूरीकृतवेदाः विज्ञानप्रागल्भ्योद्धताः त्यक्तहोमाः धूमपायिनः अचिन्तितभोज्याभोज्याः कृतनगरकालयापनाः विषयलम्पटाः नानाविधवेषभाषाः कृत्याकरणाकृत्यकरणैकतानकरणाः प्रध्वस्तब्रह्मतेजसः घोटका इव पर्यटन्ति।

गृहमेधिनोऽपि भार्यामात्मसुखयन्त्रपुत्रिकाधियानुभवन्तः तदर्थं श्रममप्यविगणय्य रात्रिन्दिवं परसेवाहेवाकाः कापुरुषसहवासापहृतहृदयाः दयाबहिष्कृताः तिरस्कृतातिथिसत्काराः विधिविहितं नित्यकर्म मनसाप्यचिन्तयन्तः निर्मर्यादाः सदोदरंभरयः जायापक्षबन्धुदेवताः द्वेषदूषितमातापितरः धिक्कृतश्राद्धाः अपहसितदेवगुरुसपर्याः अपर्याप्तस्वापतेयमतयः कुमतयोऽतिवाहयन्ति कालम्।

हन्त! कलौ को वा स्पृहयति वानप्रस्थाश्रमाय। तथापि कलिकोलाहलमृग्यधान्यतया सर्वेऽपि दुर्गताः जनपदवासिनोऽपि वानप्रस्थाश्रमा एव।

हा! तुरीयाश्रमावस्थामप्यावेदयितुमप्यधुना जिहेति मे जिह्वा। जानाम्यहं द्रविणार्जनवेषोऽयमिति। स्मृतापि सन्यासिनां चर्या दहति मे हृदयम्। स्वभोगानुकूलं मन्यन्ते सन्यासाश्रमं सुतदारपोषणाशक्ताः मानवाः। विस्मृत्य सन्यासशब्दार्थमर्थपराः काषायदण्डमात्रेण सर्वप्रतीक्ष्यतामात्मन्यारोप्य मौनमुद्राभङ्गुरभ्रूभङ्गाः मठाधिपत्यगुरुगर्वचिन्त्यमानराजभावाः षड्समेदुरोदनभोजनपीवरशरीरभावाः आगुल्फलम्बमानमहाधनाः विचित्रपत्रभङ्गसुभगहृदयङ्गमनानावर्णशशोदरलोममृदुलराङ्कवालङ्कृतपूर्वकायाः सौवर्णपत्रभङ्गप्रान्तस्पृहणीयकौशेयोष्णीषप्रकटितस्वाधिकाराः आसेवितास्तीर्णमृदुलतल्पकोमलोच्चकाञ्चनासनाः स्पृहणीयोपधानसाचीकृतचरमाङ्गाः अनवरतमप्यक्षमालागणनकैतवसमार्जितशिष्यगणसंख्याः ख्यातिपराः असंख्यातवित्तमत्ताः सुकुमारतल्प-

पर्यङ्कमेवाधिशयानाः यथेच्छं भुञ्जानाः ममेदं मदीयमिदं कारयाम्यहमेव सर्वमपीत्यहङ्कारममकारान्धचेतसः शिबिकारोहणमेव परमप्रयोजनमात्मजन्मसाफल्यञ्च मन्यमानाः बन्धुतापरिवाराः मठधनपोषितसुतदाराः विराजन्ते। एवं शूद्रा अपि काषायमात्रसन्यासिनः। हन्त! चण्डालोऽप्येवमेव। अतएव दुर्दर्शं जगत्।

एवं वर्णाश्रमवैपरीत्ये, शूद्रेषु देशिकेषु आदेशकेषु कथं वा न भवेयुः क्षामडामरादयः। निस्साराल्पसस्या धरित्री। क्वचिदेव देवमातृकाः सर्वत्र नदीमातृका एव। ता अप्यकालस्तोकवृष्टितया दष्टतया च क्रिमिकीटकूटैः असारसमृद्धशालिशीलाः। सुरभयोऽप्यपर्याप्ताहाराः हतवत्साः बलादसारास्वादुदुग्धदोग्ध्र्यः। मानवाः त्यक्तहव्यकव्यास्सदा कदन्नापणपूरितनिजोदराः दूरीकृतबान्धवाः दुर्बलाः विचित्राश्रुतपूर्वाधिव्याधिबाधिताः बहुस्त्र्यपत्याः निरन्तरमपि भेषजविनियुक्तनिजद्रविणाः पक्षिण इव धान्यकणान्वेषणपराः कालमतिवाहयन्ति।

किं ब्रवीमि कलिवैचित्र्यम्। गुरुजनतिरस्कारं मन्वते स्वपौरुषम्। भार्याबन्धुजनसपर्यामेव जानन्ति देवतासपर्याम्। जायामन्दमधुरस्मितमेवामनन्ति देवताप्रसादम्। निजापत्यपोषणमेव कथयन्त्यतिथिसत्कारम्। प्रासादनिर्माणमेव मन्वते अन्नछत्रनिर्माणम्। दातृपुरुषभवनमार्गप्रदर्शनमेव श्लाघन्ते वदान्यतानिदानम्। निजपितृत्यागमेव कलयन्ति प्रागल्भ्यम्। निजदोषनिगूहनमेव जल्पन्ति चातुर्यम्। तर्केण पूर्वाचार्यमतान्यताकथनमेव जानन्ति पाण्डित्यम्। दूरीभूतविषया एव विरक्ताः। अलाभदूषितविषया एव वेदान्तिनः। वाचाटा एव मान्याः। बालिशा एव मौनिनः। साधुपीडनपरा एव वीराः। पश्यतोहरा एव धीराः। कृतगणिकासहवासा एव पटवः। परित्यक्तनिजधर्मा एव धृष्टाः। धर्मध्वजिन एव पूज्याः। अनार्जितद्रव्या एव त्याज्याः। कृतनिजदारपोषणा एव श्लाघ्याः। निरन्तरदेशपर्यटनपरा

एव प्रगल्भाः। धनिन एव देवताः। भगवदस्तित्वन्नादिन एव ज्ञानिनः। अकृतमांसाहारा एव व्रतिनः। तार्किका एव वाचस्पतयः।

एवं प्रलोभनशीलाः अकृत्यकरणकल्पितजीविकाः परित्यक्तभगवद्ध्यानाः सुतदारपोषणश्रान्ताः पानक्षपितमानाः विस्मयजननयंत्रनियन्त्रितसकलकार्यतया निरन्तरमलसाः पिहितदीर्घिकादिजलाशयतया धारागृहयन्त्रधाराजलकल्पितस्नानविधयः मन्दाग्नितया बुभुक्षायै पादचारिणः याचकजनदूरोत्सारणाय गृहद्वारनियन्त्रितशुनकाः लौम्यविस्मृतपरोपकारतया बहिर्वेश्माकल्पितवितर्दिकाः वृद्धा अपि तारुण्याभिमानेन मुग्धामुग्धाः दूरीकृतसन्मार्गाः धनपिशाचाक्रान्ताः भयग्रस्ताः कापुरुषपीडिताः सुखलिप्सया निरन्तरक्लेशानुभवेनैव जीर्णाः सर्वेऽप्यात्मानं धन्यं मन्यमानाः जीवन्ति।

**इति कलिवैभववर्णनं नाम प्रथममालिका॥**

---

# द्वितीयमालिका

सत्येवं दुस्तरकलिलीलाकल्लोलाभिहन्यमाने अपारे संसारसागरे हन्त! ऊषरे रसकदलीकाण्डमिव विलसति जगन्मात्रेव निजामृताप्यायितसर्वलोकया आश्रितचेतनतापापनोदनबद्धपरिकरया शैवालकेशपाशया भङ्गुरतरङ्गकभ्रूलतया चलाचलतमालपत्रया तटरुहकुन्दकोरकदन्तपंक्त्या कलरवमधुरकन्धरया सितफेनपृथुलमुक्ताफलमालया गण्डशैलतलसमुत्सेधपयोधरया आवर्तनाभिकूपया मन्द्रक्वणक्वणनमञ्जुलहंसकसुभगांभोरुहचरणया मत्तकाशिन्येव कावेर्या पर्यावेष्टयमानं नीलकल्पितोच्छ्रितायतसप्तप्राकारद्वाराग्रदेदीप्यमानमानोन्नतगोपुरपरंपरालिख्यमाननाकाङ्कणं, प्रतिकोणप्रतिष्ठापितबद्धाञ्जलिपुटवैनतेयप्रतिमाप्रकाश्यमानपरमपदवैभवं, सदा सन्निहितपरवासुदेवं मन्द्रमारुतान्दोलितचन्द्र-

पुष्करिणीतरङ्गशीकरासारपरिकल्प्यमानशैत्योपचारं केसरकुसुमपरिमलविरचितघ्राणतर्पणं पवित्रतमं श्रीरङ्गक्षेत्रम्।

यत्र च प्रकाशते श्रियःपतिरेकस्यापि ज्ञानिनो लाभायैव मत्स्यादिरूपधारणपरिश्रान्त इव विततभासुरफणामण्डलभोगीशभोगमधिशयानः मरकतमणिफलकविशालवक्षस्स्थलदेदीप्यमानभार्गवीनयननीलोत्पलवीक्षाद्विगुणितनीलिमाभिराममुखपुण्डरीकः मृदुलोपधानकृतकरतलकलितकोमलकपोलः निजाजानुबाहुताप्रदर्शनायेवाजानुप्रसारितबाहुदण्डः साक्षाद्दाशरथिकरारविन्दापचितसौरभसुमनोहरसुमनोऽभ्यर्चितनूपुराभिरामचरणारविन्दः दिव्यकिरीटकेयूरहारकङ्कणकाञ्चीदामाद्याभरणगणदर्शनीयदिव्यमङ्गलविग्रहः, क्षीरोदन्वति शेषशायीव भगवान् श्रीरङ्गनाथः।

यत्र च भगवान् परमकारुणिको लीलामात्रपरिगृहीतदिव्यमङ्गलविग्रहः भक्तजनतापरतन्त्रः सर्वज्ञोऽप्यज्ञकल्पः समाश्रितकल्पतरुः एकदा चतुर्वर्गप्रदानायेव चतुर्भुजः रथाङ्गशङ्खासिगदादिदिव्यायुधः मन्दस्मितमुग्धमुखपुण्डरीकः पुण्डरीकाक्षः मणिमयमकुटमकरकुण्डलग्रैवेयककेयूरहारकङ्कणकाञ्चीदाममणितुलाकोटिप्रमुखमुखरदिव्याभरणभासुरप्रतीकः वक्षःकवाटकोटिप्रतिष्ठापितेन्दिरासुन्दरविलक्षणसुषमः देदीप्यमाननिस्तलकौस्तुभभव्यशोभः उभयपार्श्वनिषण्णमहिषीकरकिसलयगृहीतकमलकोरकचामरप्रकाश्यमानसर्वेश्वरभावः अमितयवनपीडाभीतलोकाचार्यप्रेमाभिरक्षितः विचित्रगतिविशेषाभिनन्दितसकलजनहृदयः भगवद्रामानुजसर्वस्वं विभीषणस्य चक्षुः विराजते भक्तबृन्दाभीष्टदो राजाधिराजो रङ्गराजः।

यत्र च भगवज्जगद्रङ्गनाथरङ्गनाथाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्य शीलाद्यपरिमितशुभंयुभव्यदिव्यगुणगणा नित्यानपायिनी जगदेकजननी रङ्गराजप्रणयिनी कमलिनीवनविहारिणी कल्याणी नयननीलोत्पलधिक्कृतैणीनयनसुषमावेणी सुवेणी निजवल्लभहृदयावर्जनचणमृदुमधुरवाणी भक्तजनताभि-

मतार्थवर्षिणी करुणारूपिणी सादरमस्मज्जननी अस्मद्भाग्यवशाद्भार्गवी विराजते।

यत्र च समुच्छ्रिताः नारिकेलतरवः भगवते रङ्गनाथायेव निजस्कन्धसमीरितपृथुलफलकैतवसमानीयमानगगनगङ्गातीर्थोदकाः। यच्चाविरलकन्दलितहरितकदलीवनकालीकृतहरिदन्तरतया नित्योत्सवमयमिव हर्षयति जनमनांसि। यच्चोपवनपवनसमीरितसमीरणचम्पकचाम्पेयवासन्तीमालतीशतप्रासकरवीरह्रीबेरतारोशीरनागकेसरकेसरमल्लिकादितरुलतापरिमलकन्दलितामोदमेधते यच्च तुलसीवनोपकण्ठसञ्चरणचणचञ्चरीकसञ्चयचारुझङ्कारमुखरितं विराजते। यत्र च कवेरजानिरन्तरामृतलहरीसुहितकलमवल्लरीपरीतपर्यन्तभूमयस्सुखयन्ति मनुजहृदयनयनानि। यत्र च चतुश्शास्त्रविशारदाश्शारदानर्तनरङ्गरसनाः द्राविडाम्नायार्थानुसन्धानकन्दलितानन्दबन्धुराः भगवत्कैङ्कर्यधुरन्धराः धरासुराः विराजन्ते। यत्र च भगवान्भाष्यकारो भूतपुरीकृतावतारश्शेषशायिनो भगवतो रङ्गराजस्य लक्ष्मण इव जानकीजानेः निरन्तरकैङ्कर्यैकतानः असंख्यातान्तेवासिस्तोमसंसेव्यमानचरणनलिनः जगदनुजिघृक्षया बोधयन् परमपुरुषवैभवं भवपारावारमोहान्धकारतरणिः सप्रेम सुचिरमुवास॥

एवं श्रीपराशरभट्टार्यप्रभृतिभिर्ज्ञानिमूर्धन्यैः मान्थराचार्यवर्यैः संसेविते नित्यसूरिभूरितेजोभिर्भूसुरैर्भासुरे शठरिपुप्रमुखप्रपन्नभक्तबृन्दपरिष्टुते श्रीरङ्गे श्रीरङ्गे भगवतो भाष्यकारस्य मातृष्वसृवल्लभः श्रीमान् दाशरथिनामा शमदमादिगुणमणिरोहणगिरिः गरीयानुवास धरित्रीसुरोत्तमः॥

यश्च निरन्तरनिर्वर्तितधाराग्निसमाराधनस्तपोधन इव यथालाभसंतुष्टः श्रीरङ्गनाथकैङ्कर्यैकतुष्टः अनतिलङ्घितनिजाचारतया चित्रभानुरिव वर्चस्वी कृतातिथिसत्कारतया तेजस्वी च शुद्धमृत्स्नाप्रकल्पितद्वादशोर्ध्वपुण्ड्रः कण्ठलम्बिततुलसीनलिनाक्षमालः बाहुमूलकृतशङ्खचक्रचिह्नो व्यराजत।

यस्य चाभूत्पुष्पधन्वेव कमनीयकायस्तनूभवः। यञ्चानुजग्राह जातमात्रं मातृष्वस्रीयं भगवान् भाष्यकारः, "हन्त! वर्चस्वी शिशुरयं

भविष्यति सर्वतन्त्रस्वतंत्र इति। यद्बालोऽपि धन्वीव प्रतिभाशरासनप्रयुक्तेन शास्त्रवागाशुगेन वावदूकान् कुतंत्रानखिलानपि जेष्यति। तन्नाम्ना बालधन्वीति च। किञ्चैतद्वंश्याः प्रायशस्सर्वेऽपि शान्ता दान्ता रूपवन्तस्सकलशास्त्रपारदृश्वानो भगवद्भक्ताः दयाशीलाः अनन्तान्तेवासिसंस्तुताः लोककल्याणैकतानाः भविष्यन्ति" इति च।

यश्च बालधन्वी डिम्भतायामेव दुष्टकुदृष्टिगणान्मुष्ट्या घट्टयितुमिवोच्चाल्यमानदृढमुष्टिरदृश्यत। क्रमेण च सर्वव्यापिने भगवते श्रियःपतये साष्टाङ्गप्रणतिमभ्यस्यन्निवाधोमुखं ससार। तदनु क्रमशः क्षेत्रप्रतीक्ष्यतागौरवादिवानिहितचरणकिसलयः जानुकरतलसाह्येन बभ्राम भवनाङ्कणे। निरन्तरमपि हृदयकमलान्तर्वासिने भगवते नारायणाय समर्पयितुमिव लालाजलबिन्दुकैतवेन मौक्तिकमालां प्रतिपदमुदपादयत्। विविधपशुपक्षिगणानभिवीक्ष्य भगवतो वासुदेवस्य लीलाविभूतिवैचित्र्यमनुसन्धायेव ननन्द। क्रमेण दन्तकुट्मलकैतवविरलग्रथितकुन्दकोरकमालया रसनापीठां सरस्वतीमलञ्चकार। चञ्चरीक इव मञ्जुरवः परिभ्रमन् बहुजनकरकमलान्याससाद। क्रमशो हंस इव धौतगात्रः लोहिताभ्यां चरणाभ्यां सञ्चचाल मन्दंमन्दम्।

एवं व्यतीते च बाल्यलीलया काले पितृभ्यां यथाविधि तत्तत्कालनिर्वर्तितचौलोपनयनकर्मा निर्मर्यादब्रह्मतेजःपुञ्जस्सुकुमारस्सद्गुरुसात्कृतो विद्यापरिग्रहाय। अचिरादेव चिरवासनाशय्याप्रसुप्ता गुरुबोधितेव सर्वापि हृद्या विद्या ननर्त बालधन्विनो रसनायाम्।

तदनु समधिगतसकलतत्त्वसारः षोडशवर्षदेशीयः प्रतिभासमावर्जितकोविदहृदयः निजरूपन्यक्कृतप्रद्युम्नरूपवैभवः स तु बालधन्वी निगमप्रामाण्येनैव कतिपयैः पण्डितंमन्यैः मिथ्यावाददूषिते प्रपञ्चे तत्त्वज्ञानमात्रसुलभनिष्पदमोक्षलम्पटे सति उत्तरां दिशमधिगत्य सकलश्रुतिसार्थक्यवादेन चिदचितोस्सत्यत्वं भगवतो नारायणस्य तदन्तर्यामित्वं सकलकल्याणगुणाकरत्वं

हेयप्रतिभटत्वं श्रियःपतित्वं च संस्थाप्य केवलात्मानुभवापेक्षया निरवधिक-कल्याणगुणमणिरोहणगिरेः भगवतो लक्ष्मीवल्लभस्य दृगासेचनकदिव्यमङ्गल-विग्रहस्य परवासुदेवस्य नारायणस्य निरतिशयापरिमितसौन्दर्यादिदिव्य-कल्याणगुणगणानुभवसान्द्रामन्दानन्दसन्दायिनं परमपदाभिधानं अण्डाद्बहि-स्स्थानविशेषमेव मोक्षत्वेनोपपाद्य श्रीमान्परमपुरुषः पुरुषोत्तमो नारायण एव परतत्त्वमित्युद्घुष्य मिथ्यावावदूकान्निर्जित्य बालधन्वीति विश्रुतो बभूव।

एवं वाग्वैभवेन प्रतिष्ठापितविशिष्टाद्वैतसिद्धान्तो दान्तो नितान्त-सभाजनसभाजनभाजनमुपेत्य च श्रीरङ्गक्षेत्रं प्रतीक्ष्यः गुरुजनाशीःप्रसूनस्रजा परिष्कृतोत्तमाङ्गः अनङ्ग इव निजसौन्दर्येण परवशीकृतसुंदरीजनमनोनयनः गुरुजनानुमत्या श्रीमत्याः नाम्नामृतवल्ल्याः पाणिग्रहणेन गृहमेधी भूत्वा प्रतिदिनमनुष्ठितगृहस्थाश्रमविधिः भगवद्गुणानुभवेन दूरीकृतभवानुभवः, वितता-रामाभिरामतुलसीकैङ्कर्यपरः श्रावयन्नन्तेवासिभ्यो वेदान्तार्थान् भावयन् द्राविडाम्नायार्थान् संसारैकसुखसारमजनयत्पुत्ररत्नम्। तस्य च बालधन्वी यथाविधि रामानुज इति नाम चक्रे।

तस्य च पुष्पवन्ताविव द्वौ पुत्रौ व्यजायेताम् । ज्येष्ठस्य च सुरतरव इव पञ्च कुमारास्समुदभवन्। द्वितीयस्य च निधय इव नव तनूजा अजायन्त। एवं क्रमेण बालधन्विवंशश्शाखोपशाखं वटवृक्ष इवैधते स्म। तस्य च दशम्याः शाखायाः प्ररोहेषु दशमः प्ररोहः सकलनिरवद्यविद्या-विशारदः रङ्गनाथनामा विपश्चिदपश्चिमो विप्रोत्तमो व्यराजत। तस्य च नप्ता वेङ्कटार्यनामा कविवर्यः कृतमधुररङ्गनाथस्तवः श्रीरङ्गनाथतुलसीकैङ्कर्यधुरीणः चिरमुवास श्रीरङ्गक्षेत्रे। तस्य च नप्ता नरसिंहार्यनामा दुस्तरदौर्गत्यपीडितोऽपि भगवत्कैङ्कर्यैकतानस्तत्रैव न्यवसत् । तस्य च तनूजः शिङ्गरार्यनामा वैराग्यैकनिधिः गृहमेधी स्वबन्धुजनकलहकलुषितमनाः भगवता भाष्यकारेण श्रीमद्रामानुजाचार्येण स्वप्ने चोदितः निजपीठमुत्सृज्य डिम्भेन निजात्मजेन भगवन्नारायणसनाथमाजगाम यादवगिरिम्।

स तु समागत एव दूरादवलोक्य कल्पतरुकल्पमानन्दविमानं प्रमोदभरविस्मृताध्वपरिश्रमः दूराध्वनीनोऽमृतह्रदमिव कल्याणीतीर्थोदकमवगाह्य स्तोत्ररत्नमुच्चारयन् समासाद्य च भगवन्मन्दिरं प्रणम्योत्थाय बद्धाञ्जलिपुटः भक्तिभरप्रसृमरबाष्पदिग्धकपोलतलः प्रथमतो विभूतिद्वयनायकं भुवनतलस्थापितभगवदभिमतविशिष्टाद्वैतसिद्धान्तं दान्तं नितान्तगाम्भीर्यकान्तं ललाटाष्टमीकलानिधिसुधाप्लुतिकल्पयोः शुभ्रमृत्स्नोर्ध्वपुण्ड्रयोः भुवनरिरक्षया जीवात्मपरमात्मनोः मध्ये पुरुषकारभूतया श्रियेव श्रीचूर्णरेखया समलङ्कृतालिकपट्टं मृदुमधुरमन्दस्मितापदेशेन निरन्तरभगवत्कल्याणगुणस्मरणेन द्विगुणानन्दमिव प्रकटयन्तं जनायोपदिशन्तमिवाञ्जलिबन्धक्रमं स्वाश्रितानां पापीयसामपि समुद्धरणाय भगवति प्रपत्तिमिव कुर्वन्तं बद्धाञ्जलिपुटं प्रतिमारूपमप्यपरित्यक्तवैभवं भगवध्द्यानरीतिमिवोपदिशन्तं निश्चलोपविष्टं वकुलमालालङ्कृतं तेजःपुञ्जमिव ददर्श भगवन्तं यतिराजसार्वभौमं रामानुजम्।

दृष्ट्वा च सगद्गदं "न चेद्रामानुजेत्येषा चतुरा चतुरक्षरी। कामवस्थां प्रपद्यन्ते जन्तवो हन्त! मादृशः।" इति सविनयमनुसन्धाय स्वीकृततीर्थोदकः अमृताशीव निर्निमेषः प्रस्थाय किरीटचूडावतंसमकरकुण्डलग्रैवेयककेयूरहारकाञ्चीदामकटकोर्मिकातुलाकोटिप्रभृतिदिव्याभरणालङ्कृतं सद्यःप्रफुल्लपुण्डरीकडम्बरहरलोचनपुण्डरीकपरिहृतभक्तजनभवज्वरं लोचनमीनाभ्यां सह कलहायमानाभ्यामिवोन्मुखाभ्यां कुण्डलितमकराभ्यां परिष्कृतकर्णजाहं मधुरगंभीरमन्दहासप्रकाश्यमानपरत्ववैभवं दृष्टिदोषपरिहारायेव कम्बुकन्धरापिनद्धग्रैवेयकं, पृथुलकुसुममालापिहितोन्नतांसपीठसौन्दर्यं मुखकमलनिरतिशयोदारसौन्दर्यपारवश्यावनताभ्यामिव शङ्खचक्राभ्यां परिमण्डितपाणिपुण्डरीकयुगलं आश्रितभवभयापनयनाभयमुद्राभिरामदक्षिणपाणिपङ्कजं भक्तजनागमननिरीक्षानिरन्तरस्थितिपरिश्रमापनोदनायेव गदावष्टम्भैकतानवामकरकमलं वक्षस्स्थलस्थितलक्ष्मीविलासपरिहृतान्यदेवतापरतत्त्वशङ्कं उरस्स्थलडोलायमानतुलसीदामवनमालं प्ररूढप्रवालारुणप्रान्तक्षीरोदफेननिभशोणकौशेयप्रान्तधवलांशुकपरि-

कल्पितकच्छं प्रथममत्रैव जनास्सम्पतन्तीति तद्दिदृक्षया सदा सन्निहितया श्रिया स्पृहणीयाभ्यां दिव्यमञ्जीरमञ्जुलाभ्यां चरणारविन्दाभ्यां पवित्रीकृतधरित्रीतलं मूर्खाणामपि हृदयहारिणं जडानामपि समुपजनितदर्शनौत्सुक्यं नास्तिकानामपि प्रकल्पितद्विगुणितास्तिक्यं दृगासेचनकसौन्दर्यं नवजलधरश्यामलं आश्रितश्रमप्रशमनकल्पतरुं भगवन्तं नारायणमद्राक्षीत् ।

निर्वर्ण्य चापादचूडं भूयोभूयोऽनुभूय भवसागरसमुत्तीर्णोऽमृतह्रदनिमग्न इव निरन्तरभगवदनुभवनिरतिशयामन्दानन्दपरिप्लावितमानसः सगद्गदं बद्धाञ्जलिपुटस्सविनयं "सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः । महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ।" इत्यनुसन्धाय पुनः प्रणम्य च सभक्तिः परिगृहीततीर्थोदकः प्रस्थितश्च, भगवतो नारायणस्य प्रतिबिम्बमिव स्थितं सौन्दर्यराशिमिव विग्रहतामापन्नं गाम्भीर्यधोरणीदर्शनीयमुखपुण्डरीकं जननयनहृदयाकर्षणचणचुबुकाधरसन्निवेशं चुम्बनौत्सुक्यजननदक्षकपोलमण्डलमण्डितकुण्डलं निरतिशयसौलभ्यगुणविस्मारितपरत्वस्मरणस्तब्धमिव निश्चलं उभयपार्श्वगतश्रीभूबाहुलताविमर्दनकन्दलितसुखपारवश्यमिव मन्दस्मितापदेशेन प्रकाशयन्तं भगवन्तं यतिराजकुमारं सम्पत्कुमारमपश्यत् ।

दर्शंदर्शं चातृप्तनयनः सगद्गदबाष्पं साञ्जलिबन्धं "मद्दृष्टिदोषपात्राय सौन्दर्यनिधये हरे ! सर्वस्वाय यतीन्द्रस्य तुभ्यं भूयोऽस्तु मङ्गलं" इत्यनुसन्धाय ऊरीकृततीर्थोदकः बलादाकृष्टनयनः प्रस्थितश्च, भक्तबृन्दसंसेव्यमानं भगवन्तं भोगीशभोगासनासीनं श्रीमन्तं श्रीवैकुण्ठनाथं हेतिराजं सुदर्शनञ्च प्रणम्य ततो निर्गत्य साञ्जलिबन्धं, किरीटचूडामणिताटङ्कनासारत्नग्रैवेयककेयूरहारकाञ्चीकङ्कणनूपुरादिदिव्यभूषणभूषितां स्तोकावनतमुखपुण्डरीकां श्रुतिप्रणयिभ्यां करुणारसकुल्याभ्यामिव नयनकुवलयाभ्यामभिरामां भ्रूलतापत्रेणेव तमालपत्रेण परिष्कृतलावण्यपूर्णललाटफलकां अधोमुखलम्बमानभ्रूलताकुसुमसंकाशनासिकां तदधः प्ररूढेन बिम्बफलेनेवाधरोष्ठपुटेन स्पृहणीयदर्शनां पद्म-

प्रियात्वमुपदर्शयन्तीमिव करकमलयुगलधृतकमलयुगलां कमलनिषण्णां यदुगिरिनायकीं नारायणहृदयकमलवासिनीं श्रियमपश्यत् ।

दृष्ट्वा च सभक्त्युन्मेषं "ऐश्वर्यमक्षरगतिं परमं पदं वा कस्मैचिदञ्जलिभरं वहते वितीर्य। अस्मै न किञ्चिदुचितं कृतमित्यथाम्ब! त्वं लज्जसे कथय कोऽयमुदारभावः" इत्यनुसन्धाय प्रणम्योत्थाय सविनयं परिगृहीततीर्थोदकः प्रतिनिवृत्य भगवतो मन्दिरस्यानतिदूरे परिकल्प्य पर्णशालां तामधिवसति स्म।

**इति श्री बालधन्विकुलदीपस्य शिङ्गरार्यस्य**
**यादवगिरिप्राप्तिर्नाम द्वितीयमालिका॥**

---

# तृतीयमालिका

तदनु स शिङ्गरार्यो दुर्गत्योञ्छवृत्त्या कुटुम्बभरणव्यग्रस्तुलसीकैङ्कर्यैकतानो भगवतो नारायणस्य नामसहस्रपारायणकैङ्कर्यैकसुहितः तस्य कुमारस्य नारायण इति नाम चक्रे। स तु बालः क्रमेण विवर्धमानो निसर्गतो विनयभूषणः पित्रा यथाशक्ति विधिवदुपनीतश्च सद्गुरुसात्कृतोऽधिगताम्नायः द्राविडाम्नायनिष्णातः आकारेण हृदयेन च प्रशान्तः यतिवर्यकृतशङ्खचक्रलांछनाञ्चितभुजशिखरः भगवद्रामानुजचरणारविन्दैकप्रवणः शठारिप्रभृतिगुरुपरम्पराकथाः सश्लक्ष्णं समधुरं सचमत्कारञ्च कथयन्नावर्जयन् जनमनांसि अनेकजनप्रीतिभाजनं सन्नत्यवाहयत्कालम्। अथ सत्कुलप्रसूतया श्रीरङ्गनायक्यभिधया कन्यया समुल्लङ्घितप्रथमाश्रमः परित्यक्तश्रमः यथालाभसंतुष्टः सोऽपि भगवन्मन्दिरे भगवत्कैङ्कर्यसक्तो बभूव।

तदनु तत्पुत्रक्रमेण शाखोपशाखं ववृधिरे तद्वंश्याः। ज्येष्ठक्रमेण च सप्तदशको नरसिंहार्यः शमदमादिसद्गुणाकरः समुपजनयत्पुत्ररत्नम्। तस्य शिङ्गरार्य इति नाम चक्रे। स तु शिङ्गरार्यः बाल्य एव पांसुक्रीडादिकमपहाय मन्दिरगतं भगवन्तं श्रीशं श्रीनारायणं दर्शंदर्शं निरतिशयानन्दकन्दलित-पुलकोद्गमः सप्रेम तस्मै किमप्यात्मनो हृदयं निवेदयन्निव तन्मुखदत्तदृष्टिः तन्मय इव भगवत्सौन्दर्यानुभवैकतानः क्रमेण प्रवर्धमानः जन्मान्तरसंस्कार-प्रभावाद्भगवदेकमना बभूव।

हन्त! कृतं कर्म केनापि नोल्लंघ्यते किल! तदनुभवेनैव क्षपणीयम्। अस्य तु पञ्चमे वर्षे क्षीणायुष्कतया एवंभवितव्यतया च नरसिंहार्यः पिता कालवशमगमत्। माता तु पतिमरणपरिक्लिष्टा भगवति न्यस्तभरा कथं-कथमपि सुतपोषणरता कथमपि कारयित्वा चौलोपनयनादि कर्म निर्मर्यादा-मोदा कालमत्यवाहयत्। शिङ्गरार्यस्तु बहिश्शरीरेणेव हृदये भगवद्भक्त्यापि प्रवर्धमानोऽपगतमानः मितभाषणोऽमितविनयः विवर्जितजनसङ्गः निरन्तर-विद्याग्रहणैकतानः विहितकर्मणि सक्तः भगवन्मन्त्रपुरश्चरणपरिशुद्धात्मा स्वर्गवासीवामृताशी दौर्गत्यपीडितोऽपि यथालाभसंतुष्टः भगवत्कैङ्कर्यतुष्टः दृगासेचनकभगवत्सौन्दर्यानुभवहृष्टः पैतृके कुटीरे न्यवसत्।

एवं स तु यदुशिखरिशिखरविराजमानपारिजातमूलप्रच्छायावासरसिको रसिकः निरतिशयसाहित्यसागरसारास्वादमत्त इव स्वयमेकाकी निरन्तरमन-वद्यविद्याविनोदितहृदयो दयापरः द्वितीयपरिग्रहेऽग्नित्रयमिव पुत्रत्रयं स्त्र्यपत्य-द्वयञ्चालभत।

स तु शान्तात्मा भगवदनुग्रहमिव मूर्तं समुपजातमपत्यजातं दौर्गत्य-दुर्भरतया कथंकथमपि भगवति न्यस्तभरः पोषयन् जरन्मातृपदकमलसेवा-हेवाकः निरन्तरग्रन्थलेखनातिवाहितकालकलः दुर्दर्शदारिद्र्यपरिक्लिश्यमानतया वाचाटं परिग्रहं मृदुमधुरेण वचसा परिसान्त्वयन्नपत्यक्रीडावलोकनविनोदित-

मानसः "हन्त! दारिद्र्यं नाम कोविदमपि तुच्छीकरोति। प्रेमसंवर्धनीय-मप्यपत्यजातं पटच्चरेणाच्छादयति। भोजयति पर्युषितादिकम्। बहोः कालात्कथमपि तैलाभ्यङ्गनेन स्नापयति। बन्धुजनचित्तेषु निरादरतामुपजनयति। स्वाभिलषितवस्तुषूत्पादयत्यौत्सुक्यम्। स्वाप्नप्रपञ्च इव कदापि क्वापि दर्शयति स्पृहणीयविषयगणान्।" इत्येवमादीन्यन्यान्यपि विचिन्तयन् जन्मान्तरकृपणतैव निदानमेवंभवितव्यतायाः इति समाहितमनाः, सुतरां परित्यक्तविषयाभिलाषः यथालाभसंतुष्टः स्वप्ने च चोदितो भगवत्या यदुगिरिनायक्या छन्दोमयीं तद्विषयिणीं सूक्तिमुक्तामालां संग्रथ्य भगवत्यै यदुगिरिनायक्यै समर्पयामास।

एवं भगवद्गुणानुभवैकतानो भगवन्नामसहस्रपठनसन्तुष्टः तुलसीसमर्पणहृष्टः कुलक्रमागतं दारिद्र्यमपि सहजमिव सन्तोषमनुभवन् भगवति न्यस्तभरतया निजापत्यवर्गपोषणश्रममप्यविगणय्य कालमत्यवाहयत्। अथ यथाकालं यथाविधि यथाशक्ति ज्येष्ठस्य पुत्रस्य नारायणः इति द्वितीयस्य वेङ्कटः इति तृतीयस्य नरसिंह इति नाम चक्रे।

स तु नारायणार्यः प्रवर्धमानो मानोन्नतः यथाशक्ति समधिगतविद्यो हृद्यगम्भीरगानैकतानः चित्रकलाकुशलः रसिकाग्रणीः श्यामलगात्रः समुपनीतश्च शिङ्गाम्बापाणिग्रहणेन गृहमेधी बभूव। तदैव वेङ्कटार्योऽप्युपनीतो दुस्तरदारिद्र्यपीडितोऽपि कथंकथमपि निरवद्यविद्याग्रहणैकतानः निजभ्रात्रा समं महाचार्यचरणैकप्रवणस्तप्तशंखचक्रलांछितभुजशिखरः श्रीवैष्णवाग्रणीस्तेजस्वी व्यराजत।

हन्त! को वेत्ति कालः कदा कं वा स्वायत्तीकरिष्यतीति। स तु न गणयति वैदग्ध्यम्। न चिन्तयति सौन्दर्यम्। न भावयति वयः। न स्मरति कुलम्। न परिशीलयति सुशीलताम्। न विचारयत्याचारम्। नानुसन्धत्ते शालीनताम्। हृदि न करोति परोपकारिताम्। नावलोकयति

भगवद्भक्तताम्। श्येनपातं निपत्य दुष्टमिव शिष्टमपि नयति खलु। स तु शिङ्गरार्यः तदन्वातुरः परमपदमगात्।

नारायणार्यस्तु सशोकं यथाविधि निर्वर्तिततदुत्तरक्रियः सुतात्यय-प्रवर्धमानशोकानलदह्यमानचित्तां जरतीं पितामहीमवेक्षमाणो भृशं दुःखितस्स-मवलोकयन्ननुजौ, क्रमेण शिङ्गाम्बागर्भाम्बुधौ पुत्रत्रयमाम्नायत्रयमिवालभत। नारायणार्यस्तु दारिद्र्यक्लेशमपि विस्मृत्य पुत्रावलोकनप्रहृष्टः पृथुकावघातानु-भूयमानश्रमायाः निजजनन्याः साह्येन पालयन्नर्भकान्, ललाटधृतेन पृथुला-वदातमृत्स्नोर्ध्वपुण्ड्रेण प्रकटयन् भगवद्रामानुजाचार्यदासतां, प्रतिदिनमपि भगवन्मन्दिरे रात्रिन्दिवं भगवतो नारायणस्य धुरि साञ्जलिबन्धं स्तोत्राणि गायन् बहुवारं निर्वर्तितश्रीरामपट्टाभिषेकः निरन्तरश्रीरामायणमहाभारतपारायणामल-मानसः, राजहंसपक्षसदृक्षवळक्षचीनांशुकविराजमानः भगवद्रामानुजाचार्यानु-ग्रहेण कुलक्रमागतं पद्मालयालंक्रियमाणचरणनळिनयुगळं भगवन्तमर्चारूपिणं नारायणं सादरमाराधयन्मनसा, भगवल्लीलाविभूतिवैचित्र्यमनुभवन् निर्धनतया यथासौकर्यं यथाशक्ति कदापि क्वापि ज्येष्ठपुत्रस्य शिङ्गरार्य इति द्वितीयस्य रामानुज इति तृतीयस्य वकुलभूषण इति नाम कृत्वा कथंकथमपि उपनयन-कर्मापि निर्वर्तयामास।

वेङ्कटार्यस्तु कठोरदौर्गत्याशनिपाताभिहन्यमानोऽप्युररीकृतविद्यार्जन-तत्परतया क्षुधुपशमनायानायासलभ्यं भगवन्मन्दिरोदनमेवाभिलषन् प्रारब्ध-निर्वर्तनैकतानतया निरन्तरमप्युपनतं क्लेशमप्यविगणयन् निजपितृपादसकाशा-दधिगतकाव्यप्रपञ्चतया साधु व्युत्पन्नः, सहृदयो रसिकाग्रणीः कविताचातुर्य-प्रकटितनिजवैदग्ध्यः, श्रीमत्कुप्पणार्यसकाशाधिगतसकलशास्त्रार्थः पण्डित-प्रकाण्डः, साधुप्रवचननिपुणः, नानादेशाधिगतबिरुदः, द्राविडाम्नायपारदृश्वा, दिगन्तविश्रान्तयशोराशिधवलितः, द्विजराज इव सकलकलापूर्णः, सवितेव तेजस्वी, गुरुरिव वृषानुवर्ती, कविरिव बलितत्परः, भगवन्मन्त्रजपक्षालित-दुरितः, द्वितीयपरिग्रहे त्रिवर्गकल्पं पुत्रत्रयमलभत।

यश्च शैशवे पितामही जरती निजोत्सङ्गगतं लालयन्ती शिरसि विलसन्तमावर्तविशेषं समवलोक्य सप्रमोदं अनवद्यया विद्यया भविष्यत्ययं यशस्वीत्यनुजग्राह। येन च विरचिताः बहवो ग्रन्थाः। यस्माच्च बहवोऽप्यन्तेवासिनस्समधिगतनिरवद्यविद्याः मुमुदिरे। स तु यथाकालं यथाविधि ज्येष्ठक्रमेण पुत्रत्रयस्य सुदर्शन इति नरसिंह इति नारायणः इति च नाम चक्रे।

मातृदेवस्य नारायणार्यस्य तु सहोदरबद्धप्रेम्णः ज्येष्ठकुमारः विद्याग्रहणे तावदलसोऽपि रसिकाग्रणीः पितामहानुग्रहबलादिव क्रमेण व्युत्पन्नः रूपेण निजपितामहमेवानुकुर्वन् प्रांशुः भगवद्गुणानुभवकन्दलितबाष्पविलुलितायतलोचनः विनयनम्रः, मृदुमधुरालापः, विरचितभगवद्विषयकसरसमनोहरकाव्यप्रपञ्चः, नानादेशपर्यटनद्विगुणीकृतनैसर्गिकलोकानुवर्तनपाटवः, बहुस्त्र्यपत्यपरिक्लिष्टोऽप्येकपुत्रसुहितः विलसति। द्वितीयस्तु रामानुजार्यः मनोजवसः गृहमेधी भगवत्कैङ्कर्यतत्परः, बहुस्त्र्यपत्योऽप्येकपुत्रसंवर्धितप्रमोदः, स्तोत्रगानेन भगवन्तं मन्दिरगतं नारायणमानन्दयन् सुमधुरगानं श्रीरामायणमहाभारतपठनावर्जितजनमनाः यदुशैल एव विराजते।

तृतीयस्तु वकुलभूषणः वने समुत्पन्नोऽपि भगवदवनपात्रं शैशवादामयपीडितोऽपि कथंकथमपि प्रवर्धमानः रूपेण ज्येष्ठभ्रातरमनुकुर्वन् नारायणार्यस्य हृदयं शिङ्गाम्बायास्सर्वस्वं वेङ्कटार्यस्य प्रेमभाजनं नरसिंहार्यस्य प्रीतिपात्रं मन्दमतिः निरन्तरभगवत्प्रतिमाक्रीडातत्परः पितृव्यपादपरिचोद्यमानोऽपि विद्यापराङ्मुखः दारिद्र्यानुगुणवेषः लोकव्यवहारानभिज्ञमातृकतया श्रमजीविन्या जरत्या पितामह्यैव सादरमीक्ष्यमाणः सर्वदा भगवन्मन्दिर एव पर्यटन् भगवन्नारायणदृगासेचनकसौन्दर्यपरवशहृदयः क्रमातिक्रान्तबाल्यः निसर्गतो मानी विद्यागन्धविहीनतया पदेपदे पितृव्यपादैः सविप्रतीसारं तर्ज्यमानः भगवतो नारायणस्य पुरतो बद्धाञ्जलिपुटः, "भगवन्! देहि मे विद्यां; देहि मे धनं; इति सगद्गदबाष्पमावेदयन्, न हि तावदीदृक्सौन्दर्यं; न च

रूपम्; नान्योऽस्ति मादृश इति मनस्येवात्मानं भावयन्, सर्वान् परिहसन्, दरिद्रोऽपि धनिजनवेषग्रहणोत्सुकः भयप्रकृतिः दयापरः अनवरतमपि हन्त! दीनोऽस्मीत्यनुचिन्तयन् दौर्गत्यानुगुणकर्मपराङ्मुखः, दारिद्र्यप्रवर्धितक्रोधः, पित्रा प्रीत्या पितृव्येन च रुषा मन्दः इति निन्द्यमानः, मात्रा च कमलसवर्णः इति श्लाघ्यमानः पितामह्या विद्यामभ्यस्येति तर्ज्यमानः संस्कारजन्यरासिक्येन मोदमानः, दारिद्र्येन क्लिश्यमानश्च यादवाद्रावेव कालमत्यवाहयत्।

हन्त! को वा जानाति कदा कुत्र कथं वा कमनुग्रहिष्यति भगवानिति। एवं पर्यटन्तं वकुलभूषणं पितृव्यो वेङ्कटार्यः कदाचित्सान्त्वोक्त्या कदाचिद्भर्त्सनेन कदाचिदनुतापेन कदाचिद्रुषा च समाहूय तमब्रवीत्। "तात! शृणु मे वचः। हितमत्या ब्रवीमि। न तु द्वेषेण। पुमांस्तु विद्यया यादृशं गौरवं लभते, न हि तादृशं रूपेण कुलेन द्रविणेन शौर्येण देशभ्रमणेन वस्त्रेणाभरणेन च। विद्वांस्तु सर्वत्र पूज्यते। कुरूपोऽप्यकुलीनोऽपि दरिद्रोऽपि दुर्बलोऽपि एकत्रस्थितोऽपि पटच्चरपरिधानोऽपि निराभरणोऽपि विद्यया सर्वदृष्टिगोचरो भवति। सा तु जीविकामपि संपादयिष्यति। आपादयिष्यत्यात्मगुणान्। जनयिष्यति लोकव्यवहारकुशलताम्। दर्शयिष्यति सन्मार्गं दीपशिखेव। प्रत्यक्षीकरिष्यति मनसि सत्पुरुषचरितानि ज्ञानिमतिरिव। सन्निधापयिष्यति धनानि। कल्पयिष्यति जगद्बन्धुताम्। किं बहुना! भगवद्गुणानुभवयोग्यतामप्युपजनयिष्यति। तद्विद्याग्रहणैकतानो भव। मा भूः पशुकल्पः। बोधयाम्यहं निरन्तरमपि तदेकतानो भव" इति।

तदनु क्रमेण स तु वकुलभूषणः विद्यायै स्पृहयन् अनारूढविषयोऽपि कुतुकी वेङ्कटार्यस्य बोधनाचातुर्येण दिष्ट्या च विद्यार्थी बभूव। हन्त! क्रमशः कुट्मलदशायामन्तर्लीनं सौरभमिव कुसुमं विकासावसरे वकुलभूषणस्सहृदयस्संस्काररूपेणान्तर्गतं रासिक्यं बहिरुज्जगार। स तु रसिकशिरोमणिः

"मयापि कर्तव्यं सत्तमं काव्यम्। सम्पादनीयं राजसभाजनमध्ये राजसभाजनं। पितृपादैः भगवन्मन्दिरे सुमधुरगानं पठ्यमानस्य महाभारतस्य प्रोच्यमानं वेङ्कटार्येण श्रावंश्रावमर्थं मयाप्येवं वक्तव्यं" इत्यनवरतमपि मनस्येव चिन्तयन् प्रतिवस्तु दत्तदृष्टिः दर्शंदर्शं तत्स्वभावं भगवत्सृष्टिवैभवं भावयन् दूरीकृतदुर्जनसहवासः स्वयमेकाकी प्रकृतिसौन्दर्यावलोकनापहृतहृदयः प्रायेण विविक्तदेशे तिष्ठन्, मनसैव भूमण्डलं पातालमपि सुरलोकञ्च धावन्, सकलजन्तुवर्गस्वभावावलोकनकुतूहलाक्रान्तहृदयतया तत्र तत्र तिष्ठन्, भगवत्सपर्यादर्शनानन्दितान्तरङ्गः, फणिपतिनिर्मोकनिर्मलचीनांशुकपरिधानः, षोडशे वर्षे कथमपि पित्रा समुपनीतश्च, तारुण्यानुगुणं गमनेन विलोकनेन वचनेन चेष्टमानो मानोन्नतोऽपि परिहासकुशलः परानुकरणनिपुणः गुरुषु प्रवणः पितृपादपादसेवाधुरीणः, पितृव्यस्य वेङ्कटार्यस्य सकाशादेव निरवद्याः हृद्याः विद्याः समधिगत्य भगवतो हयग्रीवस्य प्रत्यग्रानुग्रहभाजनं चाभूत्।

क्रमेण तस्य वकुलभूषणस्य भावनाप्रपञ्चानुगुणं सर्वमपि निर्वर्तयामास भगवान् कृपानिधिः हयग्रीवः। स तु मन्दंमन्दं भयप्रकृतिरपि काव्यकरणाय पुराणकथनाय द्रविणार्जनाय सभासूपन्यासाय च प्रायतत। स रसिकाग्रणीः शाकुन्तलावलोकनद्विगुणितभावनाविशेषतया निसर्गतो रसिकतया च सौन्दर्यलावण्यगांभीर्यादिगुणस्पृहणीयायै कमनीयकान्तिकोशायै कन्यकायै स्पृहयन्, सद्द्रविणमागता अपि अनतिसौन्दर्यलावण्यगाम्भीर्यादिगुणाः काश्चित्कन्यकाः कटाक्षेणापि वीक्षितुमसहमानो मानगम्भीरो मनसीत्थमचिन्तयत्।

हन्त! केयं बालिशता! दुर्गतोऽस्मि। वृत्तिविहीनोऽस्मि। अपरिचितनगरगन्धोऽस्मि। कालेकाले भोजनमपि दुर्लभम्। मुधाभावनातूलिकया रासिक्यवर्णैः हृदयपटे लिख्यते तादृशी कन्यका। किं बहुना! केवलया भावनयैवातिवाह्यः कालो मया। मम तावद्दुर्लभा तादृशी कन्यका। सत्येवमपि कथमपि तादृश्येव परिणेतव्या कन्यकेति। हन्त! किमिदं मौर्ख्यम्? बालकस्य शशिमण्डलादानस्पृहेव, पङ्गोर्गङ्गावगाहनेच्छेव, कुब्जस्य

प्रांशुलभ्यफलादित्सेव, नैसर्गिकदारिद्र्यलघूकृतस्य मे तादृशकन्यकास्पृहेति, मनस्येव स्वयमुपहसन्, ब्रह्मचार्यपि विडम्बितशृङ्गारिवेषः, शाकुन्तलादिरूपकावलोकनकन्दलितकुतूहलः, यदुशैलप्रकृतिसौन्दर्यपरवशीकृतमानसः, यदुशैल एव सानन्दमुवास वकुलभूषणः।

एवं व्यतीतेषु कतिपयेषु वत्सरेषु शिङ्गाम्बायामपि रतिसदृशस्नुषायै स्पृहयन्त्यां, नारायणार्येऽपि दैवसङ्कल्पानुगुणमागमिष्यति कन्यकेत्यवलम्बितौदास्ये, कदाचित्कृष्णाभिधः कश्चन जरद्विप्रः माण्डव्यक्षेत्रादागत्य पुरवर्त्मनि पर्यटन्तं वकुलभूषणं सादरमित्थमकथयत्।

तात ! शुभंयुवार्ताहरोऽस्मि। कथयामि ते कमपि विषयम्। भवानपि विवाहयोग्यवयस्कोऽस्ति। द्रविणेन दरिद्रोऽपि न रूपेण। तदहमावेदयामि। विनयवती, अन्वयवती रूपवती कान्तिमती लावण्यवती शीलवती गुणवती कापि कन्यका मया दृष्टा माण्डव्यक्षेत्रे। अनुपदमेव भवान्मे स्मृतिपथमधिरूढः। भवदनुगुणेयमिति। अचिरादेव तत्पितराव-कथयम्। अस्ति यदुशैले रूपवान्गुणवान्शीलवानन्वयवान्विनयवान्विद्वान् भवत्कन्यकानुगुणो जग्गू वकुलभूषणः श्रीवैष्णव इति। तदवकर्ण्य तौ तु स तु दुर्गत इति चिन्त्यते। भार्याभरणसमर्थेन किल भाव्यं जामात्रा। स्वयमेवाशनाय खिद्यन् कथं वा रक्षेद्भार्याम्। तच्चिन्त्यते कथमिव देयेयमिति। यद्यपि स विद्वान्। अद्य खलु न गणयन्ति गीर्वाणवाणीप्रवीणान् जना इत्यकथयताम्। तदानीमहं न्यवेदयम्। न हि तथा वक्तव्यम्। स तु भाग्यवानिव प्रतिभाति। भवत्कन्यकासम्बन्धादुत्तरत्र सुखी भविष्यति। तदलं चिन्तया। दीयतां तदियम्। को वा जानाति पुरुषभाग्यम्। यद्यनुमतं भवतां यतिष्येऽहं मङ्गलकार्यायेति।

तदनु तावुभावपि यथा भगवत्सङ्कल्पः तथा प्रचलिष्यति। समुद्यम्यताम्। भवतु भवदायत्तं मङ्गलकार्यम्। इत्यनुमेनाते। तद्भवानपि सम्मतिदानेन

निर्वर्तयत्वस्मन्मनोरथम्। पुनरपि गमिष्यामि माण्डव्यक्षेत्रम्। कथयिष्यामि चोदन्तमेनमिति। वकुलभूषणस्तु कर्णामृतमेनमुदन्तमाकर्ण्य, स्यान्नाम; सात्वेकवारं द्रष्टव्या मयेत्युत्तरयामास।

तदन्वनवरतमपि तन्मनस्कतया, निर्निमित्तं तत्र गमनमनुचितं हास्यास्पदञ्च। तत्किमपि कारणं प्रख्याप्य गन्तव्यं मया दारावलोकनाय। साक्षादात्मनो गमनं नितरां लोके हास्यास्पदमेव। तत्किङ्करोमि? सा तु कथं द्रष्टव्या? पिता तावदत्रादत्तदृष्टिः। मया तावदनेकवारं श्रुतं सा तु स्पृहणीयरूपेति। किमु द्रविणं मामनुयाति? तदलं द्रविणाशया। कथमपि सैव परिणेतव्या। भगवज्जनार्दनयात्रोत्सवदर्शनकैतवेन तत्र गत्वा द्रक्ष्यामि तामिति चिन्तयन् प्रतीक्षमाणः सन्निहिते काले यात्रोत्सवे सुहृद्भिस्समं प्रतस्थे तत्क्षेत्रम्।

प्रस्थितश्च तच्चिन्तितानवबुद्धाध्वपरिश्रमः समासाद्य तत्र भगवज्जनार्दन-महोत्सवदिदृक्षया गतागतजनसम्मर्दमध्यगतः सा तु का वा स्यात्? कुत्र वा स्यात्? कथं वा स्यात्? अपि नाम दृष्टिपथमायाति? अपि नाम मां जानाति स एवायमिति? सा तु मयाप्यदृष्टपूर्वा। तयाप्यहमप्यदृष्टपूर्वः। तत्कथं वा परस्परप्रत्यभिज्ञा जायेतेति बहुधा चिन्तयन्, तत्र तत्र दत्तदृष्टिः सैवेति निजसुहृदा प्रदर्शितां, कस्यचिद्गृहवितर्दिकास्तम्भदन्तपाञ्चालिकां, जनसम्मर्दावलोकनानन्दप्रफुल्लनयनयुगलां, दौर्गत्यानुगुणवेषभूषणामपि सौन्दर्यभूषणां, निजसखीगणपरिवृतां, तां कन्यकां ददर्श। दृष्ट्वा च कथमपीयं परिणेतव्येति चिन्तयन्, परिसमाप्ते च यात्रोत्सवे विदितोदन्ताभ्यां तत्पितृभ्यामाहूतस्तावाभाष्य प्रकाशितस्वाशयः तद्गतमानसस्समाजगाम यदुशैलमेव। तदनु पित्रे निवेद्यानभिलषितद्रविण एव कतिपयेषु व्यतीतेषु मासेषु माण्डव्यक्षेत्र एव शुभे मुहूर्ते यथाविधि साग्निसाक्षिकं ससंभ्रमं जग्राह तत्पाणिपुण्डरीकम्।

**इति वकुलभूषणविवाहमहोत्सवो नाम तृतीयमालिका॥**

# चतुर्थमालिका

हन्त! किमिति ब्रूमो जगद्वैचित्र्यम्। तत्राप्यनिर्वचनीया किल मनुजानां विचित्रता। सत्वरजस्तमोगुणवैषम्यकन्दलितविकारकारितान् जगद्व्यापारान् वर्णयितुं नाहमपि शक्नोमि।

केचित् बहिर्वेषमात्रसन्तुष्टाः साक्षादहमेव ब्रह्मेति मन्वानाः बहिर्वेष-विहीनान् बहुधा तुच्छीकुर्वन्तः, तद्गतसमीरेऽप्यपवित्रतां शङ्कमानाः मानाभिनु-न्नानुकम्पाः कठोरमानसाः स्वयमकृत्यकरणलम्पटाः भगवति न्यस्तभरा इव प्रलपन्तः त्यक्तबहिर्वेषमपि मैरेयपानैकतानमपि कृतद्वीपान्तरयानमपि धनिनं स्ववर्णमात्रेण द्रविणस्पृहया सहपंक्तौ भोजयन्तः, ज्ञानीति विद्वानिति विस्रम्भेण प्रह्वभावेन सन्निहितं तु दीनं वेषविहीनं अपरिशुद्ध इति तिरस्कुर्वन्तः, परान् पशूनिव पश्यन्तः वाङ्मात्रवैराग्याः बिडाला इवाखुं परस्वं कालनिरीक्षणे-नापहरन्तः, सर्वमप्यैहिकं नश्वरं हेयमिति व्याहरन्तो विषयैकसक्ताः, निरंतर-हृदयसञ्चारितपारिशुध्याभिमानाः, अरिषड्वर्गकारिताकृत्यसहस्रा अपि सहस्रोस्रसमानमात्मानं मन्वानाः, स्वेन कृतमकार्यमपि सत्कार्यत्वेन कथमपि प्रख्यापयन्तः, निसर्गतस्साधूनवहेलयन्तः, निजस्वभावानुगुणव्यवहारमेवोत्तमं श्लाघमानाः कालमतिवाहयन्ति।

केचित् दूरीकृतबाह्याडम्बराः अनाघ्रातशास्त्रगन्धाः गुरुजनवचने विस्रब्धाः निरस्तदम्भसंरम्भाः अनधिगतविद्यागन्धतया परोपदेशपराङ्मुखाः स्वकर्तव्यकार्यपर्याप्तचित्ताः मनसाप्यचिन्तयन्तः परदोषान् दुर्जनैः कृतामप-कृतिमपि विस्मृत्य तदनुसरणैकतानाः, कल्यभाषणपराः कल्योत्थानपटवः कल्याणमाशंसमानाः निजमानसावासितवासुदेवाः कथमपि रहसि भगवदा-राधनधुरन्धराः मृदुमधुरभाषिणः स्मितसौम्यमुखाः भोग्यं हृद्यं वस्तु परेभ्यो दत्वा मौनिनः परेषामृद्धिमभिनन्दन्तः समाश्रितप्रह्वभावाः परेषां कठोरां

गिरमवकर्ण्य खेदमनुभवन्तः विषमेऽपि सत्यवादिनः परेषां मनःखेदमसहमानाः कठोरहृदयानपि कथमपि श्रममप्यविगणय्यानुसर्तुमुत्सुका भवन्ति।

एतादृशसद्गुणपरायणा वकुलभूषणसहधर्मिणी स्वभावेनेव वयसापि रूपेण मुग्धा पुष्पवती लतेवोपघ्नतरुं वकुलभूषणमाश्लिष्यामोदबन्धुरा श्वशुरौ सेवमाना दारिद्र्यानुगुणाहारापि मोदमाना स्वगृहकार्यैकताना च निजवल्लभापेक्षया उत्तमान्वसुप्रभृतिभिरवलोक्य श्रीरनुगृह्णातु मत्पतिमप्येवमेवेति लक्ष्मीमभ्यर्थयमाना, हन्त ! दुर्गतास्मि। अतश्च मां केऽपि न गणयन्ति। केन वर्तनेन सर्वेषां मनोनुकूलतां गमिष्यामीति चिन्तयन्ती क्लेशानुभवेनैव कालमत्यवाहयत्।

हन्त! भोः! मर्त्याः! हितमावेदयामि। न तु प्रियम्। सादरं शृणुत। जगति किं वा शाश्वतम्? मदीयमिदं; ममैतत्; नालमेतैः; अन्यदीयमप्याहर्तव्यम्। यत्किञ्चिदपि परेभ्यो न दातव्यम्। इति बहुधा संकल्पपरम्परापीडिताः अनधिगतात्माभिलषिताः मात्सर्यमात्रफलाः निष्फलमनुजजन्मानः क्षुद्रपश्वपेक्षया क्षुद्रा भवन्ति मानवाः। जगदिदं सृष्टं भगवता सर्वसाधारणं किल ! मदीयमिदमिति स्मर्तुमपि सर्वथा नावकाशः। तत्तत्कर्मानुगुणं यथोचितमनुभवितुं सन्निहितं भवति वस्तुजातम्।

एवं ज्ञात्वा मनुजसामान्यं परोपकारनिरतं भवेत्। जगच्छरीरः खलु भगवान्। परोपकारेण यथा भवति भगवदाराधनं, न तथा स्नानेन, न जपेन, न तपसा, न बाह्यकर्मानुष्ठानेन, न वेदान्तादिविद्यया, न परोपदेशेन, नाचारेण। किं बहुना! त्यक्ताहङ्कारममकारेण दयार्द्रहृदयेन दानपरेण दूरीकृतक्रोधेन मनुजेन भाव्यम्।

जगति निजप्राचीनकर्मानुगुणमेव विषयानुभवो मानवानाम्। न तु स्वाभिलषितानुगुणम्। कोटीनामधिपतिरपि बहुविधविषयानुभवकृतसङ्कल्पोऽपि सन्निहितविषयोऽपि रुग्णो भग्नसङ्कल्पः हन्त! एककबलं भोक्तुमपि न

पारयति। तस्य परिजनस्तु दृढगात्रस्तदीयं निरायासमनुभवति विषय-जातम्। अहो! भ्रान्तिवैभवम्। स तु धनी मदीयमेतत्सर्वम्। संपाद-नीयमन्यदपि। जगत्यहमेवाढ्यानामग्रणीरस्मि। कदा भवेयं वैश्रवणकल्पः। इत्यामयपीडितोऽपि दूरीकृतभोगोऽपि अविदितसुखगन्धोऽपि निर्निद्र एव द्रविणार्जनचिन्तासन्तानायासितः नितरामाशापाशनिगलितः, कालमति-वाहयति। यस्तु पूर्वस्मिन् जन्मनि करणत्रयेण परपीडातत्परः स त्वेवमनु-भवत्यस्मिन् जन्मनि। तत्करणत्रयेणापि परपीडापराङ्मुखेन मर्त्येन भाव्यम्।

तदनु सा वकुलभूषणमहिषी चिन्तातरङ्गकलुषितान्तरङ्गा "जगति वन्ध्यायाः जनिर्वन्ध्या किल? तया दत्तं न प्रतिगृह्णन्ति सत्पुरुषाः। मङ्गल-कार्येषु नैव गणयन्ति पुरन्ध्र्यः। धिङ्माम्। यद्दारिद्र्यमनपत्यता च बन्धुजनौदास्यपात्रं कलयतः। गर्हणीयं ममेदं जन्म" इति बहुधा विचिन्तयन्ती बाष्पकलुषितविशालनयनकुवलया दुःखमयीव कालमत्यवाहयत्।

अथ कदाचित् सधवया निजभगिन्या श्रीवेङ्कडाम्बया सह सधवा दाशरथिनिर्मापितपूतसेतुयात्राचिकीर्षया प्रतस्थे। प्रस्थिता च पूतमानसा तत्र तत्र पुण्यक्षेत्रेषु भक्तार्थमर्चारूपेण विराजमानं नानारूपिणं बहुनामानं भगवन्तं प्रणिपत्य दर्शंदर्शं सन्तुष्टहृदया भक्तपराधीनतामनुचिन्त्य बाष्पगद्गद-कण्ठी क्रमेण भवसागरसेतुं श्रीरामसेतुं समासाद्य तत्र च विधिवत्कृतावगाहन-स्नाना पत्या समं प्रक्षालितदुरितनिचया सप्रमोदमाससाद यदुभूधरमेव। आसाद्य च भगवन्तं दिव्यमङ्गलविग्रहं पुण्डरीकाक्षं नारायणं सम्पत्कुमारञ्च प्रणम्य यदुगिरिनायकीं श्रीभाष्यकारं रामानुजार्यञ्च सभक्ति प्रणिपत्य समधिगततत्प्रसादा चाभवत्।

तदनु सेतुयात्रायाः क्षिप्रफलप्रदत्वं सूचयन्तीव सा बभार गर्भम्। एवं प्रवर्धमानगर्भभरालसा पतिसर्वस्वा गर्भपीडितापि निस्सहायतया स्वगृह-कार्यैकरता दौहृदकन्दलिततर्षापि मन्दाक्षेणाप्रकाशिताशया कर्तव्यकार्यकरणेन

खिन्नमुखी केवलनिश्वाससहाया अनुज्झितकल्याणीतीर्थावगाहना लावण्यमयी, क्षीरक्षालितदन्तपुत्रिकेव गृहदीपशिखेव प्रकाशयन्ती निजकुटीरं केतकीगर्भ-पत्रसंकाशकायकान्तिः, पतिपरायणा मितभाषिणी निजचिकुरवेणीकरणेऽप्य-न्यानपेक्षिणी कालमत्यवाहयत्।

यथाकालं पितृगृहे ससंभ्रमं निर्वर्तितपुष्पावतंसोत्सवा विधिवत्पति-गृहनिर्वर्तितसीमन्तोत्सवा च सन्निहिते प्रसवकाले पत्यनुमत्या शुभान्विते दिवसे जगाम सव्यस्रोतस्विनीम्। गतायाञ्च तस्यां वकुलभूषणो यदुक्ष्माधर एव शुभोदर्काय प्रतिदिनमपि सुदर्शनशतकस्तोत्रपारायणपरो बभूव। एकदा शुभोदर्कभावनया परिपठन् सुदर्शनशतकं निमीलिताक्षो वकुलभूषणः केनापि दिव्यरूपेण महापुरुषेण करकमलाभ्यां दीयमानं पुरुषशिशुं ददर्श।

तत्क्षणमेव प्रमोदभररोमाञ्चितसर्वगात्रो बाष्पधाराप्रसिक्तकपोलतलः भावयन् भगवत्कृपाकटाक्षपरीवाहं निर्वर्तयामास पारायणविधिम्। अपरेद्युः प्रासूतास्मद्दुहिता शुभे मुहूर्ते पुरुषशिशुरत्नमिति सव्यस्रोतस्विनीसमायातं लेखमद्राक्षीत्। अनुपदमेव वकुलभूषणः कल्याणीतीर्थनिर्वर्तितमङ्गलस्नानविधिः सव्यस्रोतस्विनीं प्रयातः शिशोः यथाकालं यथाविधि सेतुयात्राफलतया सुदर्शनशतकपारायणफलतया च रामसुदर्शन इति नाम चक्रे। स तु शिशुश्शुक्लपक्षबालचन्द्र इव क्रमेण ववृधे। अथ तस्यां समजनि पुत्रिका-रत्नमेकं पुत्रद्वयञ्च।

एवं स्थिते कदाचित् यदुक्ष्माधरे वाराहक्षेत्रे भगवतो वराहस्य केऽप्यचूचुरन्नाभरणानि। तद्ग्रहणाय भगवत्कैङ्कर्यपरेणाप्रमेयनाम्ना द्विजेन समानीतमञ्जनम्। तत्र च कैश्चिदनवलोकितविषयतया वेङ्कटार्यज्येष्ठपुत्रेण सुदर्शनेन स्वगृहमानीय तदञ्जनं वकुलभूषणभार्याहस्ते प्रदत्तं पश्येति।

**इति अञ्जनप्राप्तिर्नाम चतुर्थमालिका॥**

---

# पञ्चममालिका

हन्त! जगति सुशीलानां परच्छन्दानुवर्तिनां परोपकारिणां परसन्तोषाभिलाषिणां परप्रयोजनैकदत्तदृष्टीनां नैव सुखं किल साधूनाम्। वेङ्कटार्यगृहे तावदियन्तु साधुशीला परनिदेशाधीना वकुलभूषणमहिषी वामकरधृतनागवल्लीदलमध्यनिहिताञ्जना भ्रूदेशकृतदक्षिणपाणिः निश्चलकाया निरन्तरैकाग्रचित्ता निस्तरलतारका द्रष्टुमारभत तदञ्जनम्।

चिरं निरीक्षमाणायां तस्यां अस्मिन्नाविरासीत्प्रथमं रमणीयाकारः प्रासादः। तदवलोक्य च सस्मितं वर्णयामास। समुन्नतशिखरदेदीप्यमानकाञ्चनकलशाभिरामः विचित्रचित्रचित्रितस्तम्भगम्भीरः आयतप्रतीहारमनोहरः विशालवितर्दिकास्पृहणीयः वातायनसहस्रसुभगः वैजयन्तीविराजमानकलशकोटिः लम्बितविविधवर्णपट्टकौशेययवनिकापरम्परः मुक्तातोरणतारकितः सन्दृश्यते प्रासाद इति।

एवमेव पश्यन्त्यां तस्यां प्रतिहन्यमाननयनयुगलं किमप्याविर्बभूव तेजः। तदनु क्रमेण तस्य च तेजसो मध्यादाविरासीद्विविधफलकुसुममनोहरमहीरुहनिवहाभिरामः आरामः। तस्मिंश्च कोऽपि प्रांशुः कुटिलभुग्नभुजशिखरलम्बमानचिकुरगहनमस्तकः विशालललाटमध्यविनिहितसिन्दूरस्थासकः दक्षिणश्रवणजाहाशिखरप्रोतरजतवलयः स्थूलस्थूलकपोलफलकः पद्मरागकुण्डलमण्डितगण्डमण्डलः विशालतरनयनयुगलः समुन्नतघोणः पृथुलश्मश्रुकलापपिहितोष्ठपुटः पीनग्रीवावेष्टितरज्जुकपरिलम्बितचतुरश्रफलकः कृतव्यायामतया पीवरस्थपुटिताजानुबाहुदण्डः स्थूलकलधौतवलयालङ्कृतमणिबन्धः समुत्कीर्णजङ्घाकाण्डः पृथुलसक्थियुगलः पांसुलपादः तनुवलग्नलग्नलवित्रः समदृश्यत कृष्णवर्णो वनपालः।

स तु चरणनिकटनिपतितं खनित्रमादाय कञ्चित्कालं उपवनक्षेत्रखननेन परिश्रान्तः पुनरपि निपात्य तत् खनित्रं गोत्रातले किञ्चित्कुञ्चित-

तर्जनीसंमार्जितललाटतटकन्दलितस्वेदबिन्दुसन्दोहः पिशुनयन् कतिपयकृतानुयोगानां श्रमजीवित्वमेवेति संज्ञामात्रप्रकाशितस्वाशयस्तथैवान्तर्दधे।

तदनु वकुलभूषणकृतानुयोगानुगुणमुत्तरं दातुं कोऽपि पण्डितप्रकाण्डसमुचितवेषः राङ्कवोष्णीषपरिष्कृतोत्तमाङ्गः ललाटतटधृतस्थूलचन्दनस्थासकः बहुमूल्यराङ्कवावेष्टितपूर्वकायः रुद्राक्षमालामनोहरग्रीवः करकलितपुस्तककन्थासंभारः, विशदांशुकरचितकच्छः प्रविवेश विप्रवरः। स तु सस्मितं पुस्तकानि विस्तीर्य यथोचितफलमुत्तरयन्निष्क्रान्तः।

अपरेद्युस्सायंसमये करगृहीताञ्जनायां तस्यां वेङ्कटार्यानुयोगस्य प्रत्युत्तरं दातुं कापि प्रसाधितचिकुरकलापा ललाटकृतकुङ्कुमतिलका हरिद्रानुलिप्तकपोलफलका धवलदुकूलालङ्कृता पयोधरतटडोलायमानधवलकुसुममालालङ्कृता स्पृहणीयनयना कल्याणीं प्रदक्षिणीकृत्य गृहाभ्यन्तरमागता करयुगलधृतस्तनमण्डलशायितनारायणचित्रफलका तरुणी प्रविश्य विनिवेश्य च पीठे तं चित्रफलकं तदुभयपार्श्वविनिहितसमुद्दीपितहय्यङ्गवीनपूर्णदीपस्तंभयुगला साञ्जलिबन्धं तस्थौ।

सा तु समधुरहासं विधाय कर्पूरनीराजनं सूचयित्वा च शुभोदर्कं सचित्रफलका तत्रैवान्तर्हिता बभूव। एवं तदञ्जनं पश्यन्त्याः वकुलभूषणभार्यायाः कोऽपि पूतिगन्धो नासेन्द्रियमाचकर्ष। तत्प्रभृति निरन्तरमप्यञ्जनदिदृक्षा बलवती समुत्पन्ना। निजवल्लभायाप्यनिवेद्यैव सा वेङ्कटार्यगृहवासिभिस्सकृदाहूता अञ्जनदर्शनैकताना बभूव।

एवमञ्जनदर्शनैकचित्तायां तस्यां भूताञ्जनतया तदधिदेवताः भूतगणाः विभावर्यामाविरासन्नस्याः पुरतः। केचित् शार्दूलमुखाः अलातपिङ्गारालघोरनयनाः स्थूलोदराः तीक्ष्णतरकुटिलायतविशदकरचरणनखरराजयः दंष्ट्राकरालविततव्यायतवदनकुहराः जिह्वापल्लवलिह्यमानसृक्कभागाः समुन्मुखाग्रदीर्घघोणश्मश्रुकलापाः कटिघटितव्याघ्राजिनाः। केचित् ऋक्षमुखाः सान्द्रप्ररूढा-

रालनीलशिरोरुहभयङ्कराः नक्षत्रसदृक्षरूक्षतारकाक्षाः स्थूलाञ्जनगिरिसदृशाकाराः निबिडरोमस्थगितदेहाः परिधृतलतापलाशाः। केचित् घूकमुखाः धूम्रदीर्घशिरोरुहाः भुग्ननिशितत्रोटिकोटिकरालाः चण्डदीर्घप्रज्वलन्निस्तलपिङ्गलाक्षाः कृशदीर्घकङ्कालप्रायदोलायमानभुजाः वक्षस्स्थलपरिदृश्यमानस्थूलास्थिपञ्जराः कृशतरोरुजङ्घाकाण्डतया स्थूलजानुग्रन्थयः सिराप्रायचरणाः पतत्रपरिधानाः। केचित् क्रमेलककन्धराः पिचण्डिलाः केचित्कपोलवदनाः केचिन्मूषकमूर्धानः केचिदेकाक्षाः लम्बाधराः, केचिद्वक्रघोणास्स्थूलचुबुकाः, केचित्फेरवमुखाः केचित्पञ्चमस्तकाः निर्मांसाः, केचिद्वृकवक्त्राः पिङ्गलरोमराजिस्थगितगात्राः दंष्ट्राकरालाः, केचित्कपोलनेत्राः रक्तवर्णाः, केचिदुरोवक्त्राः पीतवर्णाः, केचिदेकपादाः केचिदुच्छूननेत्राः दीर्घघोणानिश्वासाः, केचिदलातनेत्राः ज्वालाजिह्वाः, केचिद्रुधिरारुणश्मश्रुजालाः केचिन्मार्जारमस्तकाः केचिदेककर्णाः केचिल्ललाटनेत्राः केचिदम्बूकृतभाषणाः विरलायतदन्ताः, केचित् घोणाशीर्षाः खोडाः केचित्कुटिलकटयः स्थूलपादाः विचित्रचर्मपरिधानाः भयङ्करारावाः भीकरावलोकनाः नानाविधाकाराः बहुविधगमनाः क्रूरकर्माणः नानाविधमृगमुखाः विविधपक्षिवदनाश्च विचित्राकाराः विचित्रव्याहाराः विचित्रनादाः साट्टहासाः सहस्तताडनाः सनर्तनाः विचित्रवर्णाः हृदयविदारणदर्शनाः।

तेषु गणेषु प्रमुखः एकैकः प्रतिदिनमपि विभावर्यां स्थित्वा च शयानायाः वकुलभूषणमहिष्याः शिरोदेशे "वशीकुरु माम्। सर्वमप्यभिलषितं पूरयामि। पश्य मे परिजनान्। एते सर्वेऽपि तव भृत्या भवन्ति। पठ मन्त्रमेतम्। दासो भवेयम्। ते कुटीरं प्रासादं करिष्यामि। सर्ववस्तु भोग्यमपि स्मरणमात्रेण सन्निधापयिष्यामि। लोकमेनं भवदधीनमाधास्यामि। किमनेन दौर्गत्येन? कुतो वा मुधा क्लेशमनुभवसि? स्वायत्तीकुरु माम्। दुर्लभं तावदिदमञ्जनं दिष्ट्या सन्निहितम्। तदिदानीं सुसमयोऽयम्। मा मुञ्च माम्। वर्तते च महत्प्रयोजनम्। मुग्धासि। मा निवेदय पत्यै।

वशीकुरु माम्।" इति बहुधा सप्रार्थनं पीडयामास ताम्।

एवं प्रार्थितायामपि तस्यामङ्गीकृतमौनायाममर्षद्विगुणीकृतघोराकृतिः लेलिहान इव व्याघ्र इव हर्यक्ष इव च बहुविधाकारो भीषयंस्तर्जयन्भर्त्सयन् कामरूपतया स्पृहणीयरमणीरूपस्सान्त्वयन् लालयन् आनन्दयन् "अम्ब! वशीकुरु माम्" इति प्रार्थयामास।

सा तु भीतभीता कम्पमाना विवर्णपुलकाङ्कितगात्रा निर्निद्रा स्वात्मनि लीनेव सङ्कुचितावयवा यष्टिरिव शयनीये निपातितविग्रहा लघूकृतान्तर्मस्तका नीयमानेव गगने केनापि पात्यमानेव वसुमतीविवरे केनापि प्लाव्यमानेव क्वापि निरुद्धोच्छ्वासा पाञ्चालिकेव पराधीनदेहा किंकर्तव्यतामूढा मूकेव बधिरेव पङ्गुरिव कुणिरिवान्धेव निश्चेष्टा नष्टेव बभूव।

एवमेकोनत्रिंशद्दिवसान् प्रतिदिनमपि पीड्यमाना रजन्यां उभयपार्श्वशायितापत्यद्वया पत्युः प्रवासितया स्वयमेकाकिनी निस्संवेशा शयनपातितशरीरा सा तु—उदग्रोच्छ्रितपिङ्गलकेशकलापां रेखातरङ्गकुटिलालिकां लम्बमानपुञ्जीभूतालातपिशङ्गभ्रूयुगलाम्, परिभ्रमच्चक्राकारघोरज्वलनसन्निभाक्षिपक्ष्मविक्षेपप्रक्षिप्तस्फुलिङ्गां, स्थूलभुग्ननासिकां कुटिलायतशूर्पकर्णां शुष्कस्तनभस्त्रिकां स्थूलतरबाहुदण्डां सक्थितललम्बमानोदरीं कृशतरोरुजङ्घाकाण्डां रक्तवस्त्रपरीतगात्रीं करद्वयविधृतप्रज्वलद्दीपिकादण्डप्रकाश्यमानभयङ्करदंष्ट्राकरालवक्त्रकन्दरां कामप्यद्राक्षीत्।

तामवलोक्य च तत्क्षणमेवोपविष्टा निजापत्यरक्षणाकुला स्वेदजलस्नपितगात्री निजगात्र एव विलीनेव पुलककबलिता वातप्रणुन्नकदलिकेव प्रकम्पमानगात्रयष्टिः, "किं करोमि? का स्विदियं भीकरमूर्तिः? दहतीव दीपिकाभ्याम्। हन्त! कीलितेव प्रांशुशरीरा तिष्ठति। पतिरपि न सन्निहितः। पार्श्वगृहस्थं सुदर्शनं वा समाह्वयेयम्? बत! प्रतिबद्धा रसना। वदनाद्वाण्यपि न निस्सरति। स्तम्भितेवास्मि। भगवन्! मामनाथां भवदीय-

मिदमपत्यं पाहि कारुण्यजलधे! नान्या गतिः।” इति बहुधा विचिन्तयन्ती शुष्कजिह्वा बाष्पपूर्णविशालविलोचना दीनदीना तामेव पश्यन्ती कीलितेव निश्चलगात्री भगवध्द्यानैकताना घनतरतुहिनमध्यगतेवास्वाधीनप्रतीका स्पर्शनमात्रेणाधः पतन्तीव तूष्णीमासीत्।

तदा तु सा घोररूपा परिभ्रमत्क्रूरतारका दीपज्वालाभ्रमणेन भीषयन्ती मन्दंमन्दमुपसृत्य “वराकि! वशीकुरु माम्। नो चेदपहरामि प्राणान्। दीपयामि दीपिकाभ्यां त्वाम्। भस्मीकरोमि भवनमिदम्।” इति घोरघोषा निजगाद।

वकुलभूषणमहिषी तु अस्वाधीनशरीरा खिन्नमुखी धवलगात्रयष्टिः मूर्छितेव किमप्यजानती भित्तितलसाचीकृतदेहा भुग्नलम्बमानकन्धरा आकूणिततारका समुत्क्रामत्प्राणतया तिमिरावमग्नेव क्लिश्यमाना, तत्क्षणमाविर्भूतां तेजोमयमण्डलमध्यवर्तिनीं देदीप्यमानहीरमयकिरीटपरिमण्डितदिव्योत्तमाङ्गां, विशालललाटतटस्पन्दमानकुटिलकुन्तलां, मृगमदतिलककमनीयालिकां, नम्रस्निग्धासितकामकार्मुकसंकाशभ्रूदर्शनीयां, सौम्यविशालमसृणगम्भीरनयनकुवलयां, प्रसरन्मरीचिभासुरहीरताटङ्कपरिष्कृतकोमलकर्णपाशां, कनकचम्पकनीकाशनासिकां, निसर्गारुणमृदुलस्पृहणीयकोमलकपोलां, निसर्गारुणमृदुमधुरबिम्बाधरां, कम्बुकन्धरां, विचित्रमणिमयदिव्यकङ्कणगणदर्शनीयाभ्यां पाणिसरसिजाभ्यां धृतस्तोकविकसितसरसिजयुगलां, कोमलारुणदक्षिणपाणिकिसलयदर्शिताभयमुद्रां, प्रलम्बितवामबाहुदण्डां, क्षीरोदफेनधवलदुकूलालङ्कृतां, दिव्यरत्नमयनूपुरमनोहरपदसरोरुहां, शुद्धजाम्बूनदसवर्णां सर्वाङ्गीणदिव्याभरणसुन्दरामिन्दिरामद्राक्षीत्।

अनुपदमेव तत्पार्श्वे नातिदूरे तेजोमध्यादाविर्भूतं, दिव्यरत्नमकुटपरिष्कृतविनयानतोत्तमाङ्गं, चामीकरपट्टिकानिभविशालललाटकृतसितमृत्स्नादिव्योर्ध्वपुण्ड्रं, लम्बमानश्रवणजाहघटितदीप्रकुण्डलद्युतिभासुरविशालकपोल-

फलकं, दयार्द्रगाम्भीर्यधुनीकुल्यायमानविशालनयनपुण्डरीकं, समुन्नतनासावंशं कुन्दकोरकस्पृहणीयदंष्ट्राङ्कुरदर्शनीयारुणाधरं, स्थूलपद्माक्षमालालङ्कृतकम्बुकन्धरं शरच्चन्द्रमरीचिरुचियज्ञोपवीतं, दीप्रशङ्खचक्रसुभगपृथुलनिस्तलदोर्दण्डयुगलं, कङ्कणाङ्गुलीयकमनोहरपाणिसरोरुहद्वयबद्धाञ्जलिपुटं, शेषभोगभासुरकोमल-मनोहरकौशेयविरचितागुल्फलम्बमानकच्छं, तदुपरि पीताम्बरकृतपरिकरं, तप्तजाम्बूनदसच्छायकायकान्तिं, प्रांशुं, दृगासेचनकरूपं, कमपि दिव्यपुरुष-मप्यपश्यत् ।

तत्क्षणमेवोत्फुल्लनयना सा तु बद्धाञ्जलिपुटा बाष्पदिग्धकपोलतला समुन्मुखी इतिकर्तव्यतामूढा पीयूषह्रदनिमग्नेवातिशयानन्दलघूकृतगात्री गद्गदिकानिरुद्धकण्ठी "पाहि मामम्ब !" इति मन्दमब्रवीत् ।

तदा सा तु भगवती कमलालया सगम्भीरमन्दस्मितं निजपार्श्वगत-मुज्ज्वलं निधिमखिलमपि कोमलयाङ्गुल्या प्रदर्श्य चात्मानं "वत्से ! संसारवर्ध-कोऽयमपेक्षितस्ते ? किमाहोस्विदहम्" इति मन्दमप्राक्षीत् ।

पृष्टा सा तु वकुलभूषणमहिषी रमायाः रूपलावण्याद्यपहृतहृदया तुच्छीकृतहेयतरैहिकभोग्यभोगा, जगदिदं निरयमिव मन्वाना परवशेन्द्रियग्रामा तामेव सकलविधबन्धुं सुखमैहिकं ज्वलनमिव च जानती बद्धाञ्जलिपुटा तद्दर्शनविलक्षा सगद्गदं सपुलकं सबाष्पञ्च "अम्ब ! देवि ! मातः ! प्रसीद प्रसीद मामभिषिञ्च कृपाकटाक्षपीयूषवर्षेण । मास्तु निधिरयम् । भवदीय-कोमलारुणचरणकिसलयसेवा तावदस्तु । मामुद्धर । विमोचय मे बन्धन-मिदम् । पुनरपि मां मा पातय क्लेशबहुले भवसागरेऽस्मिन् । धन्याभवम् । अनुगृहीताभवम् । कृतकृत्याभवम् ।" इत्युन्मत्तेव मत्तेव निर्निमेषा तामव-लोकयन्ती सदैन्यं प्रार्थयामास ।

तदवकर्ण्य सा तु दयामयी तत्क्षणमेवाप्याययन्ती भ्रूसंज्ञयैव पार्श्वे स्थितं विनयनम्रं बद्धाञ्जलिपुटं तं दिव्यपुरुषमादिश्य तत्रैवान्तर्दधे ।

मञ्जुलस्य मुकुन्दाभिधस्य महीध्रस्य च मध्ये, विचित्रस्वर्णस्पृहणीयसमुड्डीयमानमनोहरनादहृदयङ्गमविहङ्गमदर्शनीयां, दुरवगाहगुहाभ्यन्तरविराजमानभयङ्करकेसरिशार्दूलभीकरारावमुखरितां, विततफणामण्डलदीप्रस्फीताभोगभोगभयङ्करभुजङ्गमसहस्रलतापर्यन्तां, विविधविचित्रताण्डवमण्डितविततचन्द्रकमण्डलव्यजनायमानमयूरवारकेकारावशब्दायमानां, विचित्रसत्वसमुपजनितभयां, हरितद्रुमैरिन्द्रनीलमणिमयीमिव, कुसुमैस्तारामयीमिव, चन्द्रकमण्डलैरिन्द्रचापमयीमिव, लेलिहानैर्लतामयीमिव, उलपनिकरैर्जीमूतमयीमिव, पतनोत्पतनपरैर्विचित्रवर्णैः पतत्रिभिः प्रकीर्यमाणविविधकुसुममयीमिव, विविधनादगानैर्गानमयीमिव, त्रियोजनशतायामां शतयोजनविस्तारां काञ्चनद्रोणीमद्भुतदर्शनामपश्यत् ।

तत्र च द्रोण्यां रजतद्रवभासुरां प्रतितरङ्गनिकरसमुत्सर्पत्प्रभाप्रकाशितोपकण्ठनीलकण्ठविवलितकण्ठस्निग्धनीलवर्णश्यामलितसलिलां, सौदामनीसङ्काशकाशमानपीनमीनसमादानदत्तावधाननानाविधविद्योतमानसलिलचरपतत्रिव्रात कलनादशब्दायमानां कनककमलिनीशिखरडोलायमानप्रफुल्लसहस्रपत्रपत्रप्रविगलन्मधुधुनीचन्द्रकिततरङ्गमण्डलां, कन्दरान्तरद्विगुणितचामीकरचञ्चरीकझङ्कारगम्भीरां, प्रतितरङ्गशिखरनृत्यत्तपनीयराजहंसविसरसान्द्रमन्द्रनादां, प्लवमानकनककमलपक्वकमनीयबीजराजिं, द्रोणप्रमाणैः पुण्डरीकैः विडम्बितप्रतितरङ्गप्रतिबिम्बितचन्द्रबिम्बडम्बरां, दर्शनमात्रेण श्रममपनुदतीमिव सुदतीं स्वादुरसमयीं सुकृतिभिस्संसेव्यमानां, सुरोचनीं नाम स्रवन्तीं दर्शंदर्शं नितरामनधिगतसौहित्या क्षणमिव स्थित्वा च विस्मितमानसा भगवत्याः क्रीडास्थानविशेषरामणीयकापहृतहृदया सकौतुकं प्रतस्थे ।

प्रस्थिता च तत्र तत्र विचित्रादृष्टपूर्ववनसत्त्वसमवलोकनकन्दलितानन्दा गच्छन्ती नातिदूर एव शतयोजनविस्तीर्णं द्वियोजनशतायतं सिद्धविद्याधरगन्धर्वप्रभृतिदेवगणपरिपाल्यमानं, हेमवालुकालवालपरिवेष्टयमानतरुमूलदेशदर्शनीयं, प्रफुल्लस्पृहणीयवर्णकुसुमाचितैः निर्भयडयमानविहङ्गमहृदयङ्गमगम्भीरमधुरस्वरपरवशीक्रियमाणानन्दमयश्रोत्रेन्द्रियैः, अर्धक्रोशोच्चशिखरैः, दिगन्तराल-

प्रसृमरशाखासहस्रैः, परिमलपरितर्पितनासेन्द्रियैः पीवरोच्छूनमहास्कन्धैः डोलायमानभेरीप्रमाणतपनीयवर्णामृतस्वादुनीरन्ध्रपरिपक्वानेकशतसहस्रफलाभि - रामैः, बिल्वमहीरुहैरभिरामं, शीर्यद्भिश्च पतद्भिश्च दिगन्तप्रसृमरपरिमलबहुलैः फलैः परिकीर्णभूमिवनान्तं, देवविशेषैस्संसेव्यमानं बिल्वफलाशिभिर्दूरीकृतजरा-मृत्युभयैस्स्वर्णकान्तिकायैस्सुकृतिभिर्मुनिविशेषैः परिमण्डितं, विचित्रस्थासक-स्पृहणीयस्वर्णकायैः कनकहरिणैः पर्यटद्भिरतिरमणीयं, आनन्दमयमुत्सवमयं तेजोमयं बिल्ववनं नाम श्रीवनमद्राक्षीत् ।

यत्र च मन्दमारुतस्सुगन्धबन्धुरो व्यजनकृत्यं निर्वर्तयन्नानन्दयति । क्षितितलनिपतितपृथुलफलतलनिषण्णाः भासुरनीलकन्धरामरीचिकर्बुरितवासराः देदीप्यमानविशालविचित्रवर्णदर्शनीयचन्द्रकमण्डलषण्डैर्निरन्तरनिचितेन्द्रचापा - निव प्रवर्तयन्तः, विचित्रचित्रचित्रितपत्रपुटसमुद्धूननसमुत्थापितैः कनकरेणुभिः संसेव्यमानबालातपा इव भासुराः मयूरा विराजन्ते ।

मरकतनिभकुट्टिमायमानमानातीतहरितकोमलशाद्वलतलप्रसुप्ताः रोमन्थ-चाल्यमानचुबुकचामीकरभासुररुचिसमुपचीयमानचीनांशुकप्रवर्तयितार इव पीवराः दिव्यकुरङ्गाः विलसन्ति । यस्य च फलानि भुक्त्वा पुण्यपुरुषाः निरामयास्सत्त्वबहुलास्स्पृहणीयगात्राः निरन्तरमपि षोडशवत्सरदेश्याः दूरीकृत-जरामरणभयाः रमादर्शनकुतूहलाक्रान्तहृदयाः परस्परस्नेहपराः दूरीकृतदुर्गुणाः देवकल्पास्सदानन्दमनुभवन्तः अपहसितनाकसुखाः प्रकाशन्ते ।

तत्प्रवेशसमनन्तरमेवामृतह्रदावमग्नेव घनसारक्षोदराशिप्रविष्टेव चन्द्र-मण्डलान्तर्वर्तिनीव वरवर्णिनी सान्द्रानन्दमन्दगमना विस्मयविकसितमानसा भगवत्याः जगज्जनन्याः निर्निमित्तघृणास्मरणरणरणकप्लाव्यमानहृदयेव गगने क्वापि नीयमानेव नातिदूर इव दिव्यवनमतिक्रम्य—

तद्वनोपकण्ठ एव क्षितितलपतितं शारदं गगनमिव निर्मलं विशालञ्च मरकतभासुरदिव्यशादपङ्क्तिपरिवेष्टितप्रान्तं, निरन्तरमपि देदीप्यमानसौदामनी-

नीकाशज्योतिष्मतीलतामण्टपसुभगतीरदेशं, विचित्रमाणिक्यमयविहारविष्टर-राजिविराजमानशाद्वलतीरभागं, पतद्भिः पतितैश्च प्रकीर्यमाणैश्च विटपिविविध-वर्णकुसुमैर्निचिततया प्रसाधितकोमलतटतलं, मदमत्तोन्नतबहुविधकलनाद-सुभगदीप्रनानावर्णदर्शनीयविचित्रदिव्यविहगसहस्रसङ्कुलं, प्रतिमण्टपरत्नशिला-तलसमारब्धताण्डवशिखावलावलीन्द्रनीलायमानपर्यन्तं, प्रवालकृतसोपानैः समुज्वलधातुरञ्जितैः शुभ्रसलिलधारागम्भीरकुल्यामालैः नवरत्नमयक्रीडापर्वतै-रभिरामतीरतलदेशं, क्वचिड्डयमानैः क्वचित्प्लवमानैः क्वचिदुड्डीयमानैः क्वचिदव-तरद्भिः क्वचित्तरङ्गोपरि पतद्भिः पीवरजातरूपशकरचाल्यमानतया डोलाय-मानेषु भारनम्रेषु शतसहस्रपत्रेषु स्तोकस्फुटितेषु जाम्बूनदसरोरुहेषु प्रवेशित-स्पृहणीयदीर्घकण्ठैः समुज्वलवराटकाभ्यन्तरबीजादानैकतानैः, कैश्चिद्रजत-भासुरकोमलमृणालाकर्षणव्यग्रैः, कैश्चित्सलिलबिन्दुमौक्तिकनिचितमरकत-फलकायमानविततदलतलविनिहितविद्रुमनिभकमनीयपादैः पक्षतिप्रवेशित-चञ्चुपुटैः निश्चलैः निद्रापरतन्त्रैः, कैश्चित्तीरतलहाटकसैकतमज्जितशरीरकण्डू-परिहरणपरैः, मन्द्रगम्भीरनादैः सुवर्णराजहंसमण्डलैः दृगासेचनकरूपं, भासुर-तरङ्गशिखरप्रतिबिम्बिततटरुहदेदीप्यमाननानावर्णकुसुमनिकरतया तारकितमिव पतनोत्पतनपरैः परस्परकलहायमानैरिन्द्रनीलमणिसमुत्कीर्णैरिव तेजोमयैः गम्भीरझङ्कारमुखरितदिगन्तरालैः दिव्यभ्रमरैर्नीरन्ध्रितं, सामगानपरैरिव श्रुति-सुभगं कूजद्भिः प्रतितरुपत्रपटलनिगूढदेहैः दिव्यपिकैः समुपजनितश्रोत्रानन्दं मृदुमधुरं भगवत्याः जगज्जनन्याः कल्याणगुणकीर्तनपरैर्विचित्ररूपदर्शनीयैः दिव्यशुकशारिकागणैरानन्दमयं,

कलानिधिकलाधवलैस्सुलक्षणलक्षितैर्गम्भीरगमनैः कुन्तनिभभासुरदन्त-चतुष्टयदर्शनीयैरैरावतनिभैरिभैः प्रकीर्यमाणतटसलिलं, कैश्चिच्चन्द्रकान्तिकान्तैः कैश्चित्प्रभाकरप्रभाभासुरैः कैश्चिदिन्द्रनीलमणिनीलैः कैश्चिन्मरकतहरितैः कैश्चित्त-पनीयपीतैः कैश्चिदङ्गारारुणैः कैश्चिन्नवरत्नरुचिरुचिरैः विततैः कुसुमैस्सुभग-भङ्गुरमन्दमारुतकम्पितविचित्रप्रताननीप्रावृतप्रान्तप्रदेशं, नातिदूरवर्तिशात-

कुम्भमयसमुच्छ्रितप्राकारप्रभाकर्बुरितसलिलतरङ्गं, जगज्जनन्या विहारार्थं तत्र तत्र कोमलतनुभिः परिमलबहुलकुसुमाभरणाभिः धवलदुकूलालङ्कृताभिर्वनदेवताभिर्विविधप्रसवपरिष्क्रियमाणतटतलमण्टपपरम्परं, कुत्रचिद्वनवलयूथपप्रकीर्यमाणसलिलशीकरदुर्दिनीकृतं, कौमुदीभ्रान्त्या स्फटिकवेदिकाधवलतया कूजद्भिर्डयमानैर्दिव्यचकोरैः, कुत्रचिद्बालातपबुद्ध्या चामीकरतामरसप्रभातलनिषण्णैः हंसमिथुनैस्सनाथं, हरितभासुरविततदलनिचिततरङ्गं, पृथुलभेरीप्रमाणैस्समुद्यदादित्यशोणरुचिभिर्भासुरकिञ्जल्कपिञ्जरैः मधुपानमत्तमधुपसमाक्रान्तैः प्रत्युप्तेन्द्रनीलमणिनिकरैरिव बीजसहस्रसम्भृतहाटकवराटकदेदीप्यमानैः जाम्बूनदमयैः दिव्यमहापद्मैर्निरन्तरदर्शनीयं, अवनततरुलताभिर्दम्पतिपरम्पराभिरिव मनोहरैः परिमलबहुलैर्नानाविधदिव्यकुसुमैरभ्यर्च्यमानं, कमलकल्हारकुमुदविविधप्रसूनैस्समलङ्कृतं गगनमिव ग्रहनक्षत्रतारार्यमतारेशगणैः, अतिस्वच्छतया कनकमयैः पृथुलतरैर्नानावर्णैर्निरन्तरसञ्चारपरैर्भासुरैर्नानाविध दिव्यदर्शनैर्दिव्यमत्स्यव्रातैः परिदृश्यमानैर्निरन्तरनिचितं, निरन्तरप्रादुर्भवत्सौदामनीबृन्दं शारदाभ्रनिकुरुम्बमिव, सुगम्भीरपरिदृश्यमानदेवविशेषैरुपास्यमानाभ्यन्तरं, कोमलतरङ्गपरम्परं, सौरभबन्धुरं, शीतलसुखस्पर्शं, अमृतस्वादुसलिलं, दर्शनमात्रेणापहृततापत्रयं वाचामगोचरवैभवं आनन्दमयं श्रीसरोवरमद्राक्षीत् ।

तस्य च मध्ये मरकतस्तम्भायमानस्फीतकोमलनालध्रियमाणस्यानवरतमपि प्रफुल्लस्य देदीप्यमानकोटिदलस्य निरन्तरमपि नवनवस्य प्रसृमरनिरतिशयानिर्वचनीयदिव्यसौरभबन्धुरस्य सहस्रकिरणसहस्रभासुरस्य, प्रसृमरसुभगरागदर्शनीयस्य निरतिशयमार्दवभोग्यस्य शीतलसुखस्पर्शस्य स्यन्दमानमन्दमकरन्दलुब्धैर्दिव्यबम्भरैः प्रदक्षिणीक्रियमाणस्य अतिमहतो दिव्यमहापद्मस्य भासुरकोमलसान्द्रपीवरकेसरपरिवृते जाम्बूनदस्फीतवराटकविष्टरे निषण्णां, निरतिशयकान्तिमण्डलपरीततया सुधांशुमण्डलमध्यवर्तिनीमिव देदीप्यमाननयनप्रतिहतिकरणनिपुणकिरणगणतेजोमयदिव्यमकुट परिमण्डितोत्तमाङ्गां, कोमलारालमसृणमेचकभ्रमरकराजिरञ्जितनिटिलप्रान्तां, निरतिशयसौभाग्य-

भासुरलावण्यमयललाटां, करुणासान्द्राभ्यां नीलस्निग्धसान्द्रपक्ष्मपङ्क्तिभ्यां विततकुवलयस्निग्धगम्भीराभ्यां सौन्दर्यलावण्याकराभ्याममृतकुल्याभ्यामिव नयनाभ्यामभिरामां, सर्वाङ्गीणदिव्याभरणभासुरामिन्द्रनीलप्रभाभासुरदिव्याम्बरालङ्कृतां सुधांशुधवलदिव्यगजपरिमण्डितोभयपार्श्वां, कोमलकरकमलकलितदिव्यकमलां, मन्दहासगम्भीरामिन्दिरामद्राक्षीत्।

वरवर्णिनी तु मन्दस्मितगम्भीरमुखपुण्डरीकां पुण्डरीकाक्षमहिषीं निखिलजगन्मातरं तां कमलालयां दर्शंदर्शमनधिगततृप्तिः दृगासेचकतद्रूपपरवशीकृतस्वान्ता क्वापि प्लाव्यमानेव आनन्दमयशैलशिखरारूढेव नवनिधिमध्यवर्तिनीव किमिदम्? क्वाहम्? काहम्? कथमहम्? इतीतिकर्तव्यतामूढा प्रणम्योत्थाय पुनः पुनः प्रणम्य बद्धाञ्जलिपुटा स्वात्मनि विलीनेवानन्दलघूकृतात्मा स्थातुमपि गन्तुमप्यनीशा आनन्दबाष्पप्रक्षाल्यमानकपोलफलका गद्गदिकाशीर्यमाणाक्षरा अम्ब! करुणामूर्ते! जगज्जननि! कथं वर्णयामि ते कृपापरीवाहम्? धन्यास्मि, कृतकृत्यास्मि, द्रष्टव्यं दृष्टमिदानीम्। धन्यमिदं नयनयुगलम्। दुरितभाजनममुं जनमपि निर्हेतुककरुणाकटाक्षेण दास्ये नियुक्तवत्यसि। अहो! ते दया। इति बहुधा जल्पन्ती जगज्जनन्याः मधुरापाङ्गसंज्ञया लब्धानुमतिः पुनः प्रणम्य कृतप्रदक्षिणा पुनरपि प्रणम्यानन्दगिरिनिर्झरमध्यप्रविष्टेव पिबन्ती नयनाभ्यां तामेव बलान्मन्दंमन्दं तस्मात्प्रतस्थे।

प्रस्थिता चानतिदूर एव श्रीवर्णसमलङ्कृतशिखरेण निरन्तरमपि देदीप्यमानदिव्यमणिदीपभासुरेणाभ्रङ्कषदिव्यदीप्रजाम्बूनदकलशसहस्रपीतसुषमावलीतरङ्गितगगनाभोगेन नृत्यत्केतुकोटिचित्रपटव्यतिकरिताभ्रमण्डलेन विचित्रपाञ्चालिकादर्शनीयेन सहस्रोपशिखरविडम्बितरत्नसानुडम्बरेण दशतालप्रमाणेनातिविशालेन तेजोमयेन समुत्कीर्णविचित्रसत्त्वस्पृहणीयेन स्तोकविकसितमहापद्मकुट्मलाकारेण विचित्रपृथुलमुक्ताकलापप्रवालमालापरिष्कृतप्रान्तेन गोपुरेणातिगभीरतरं, वाचामगोचरवैभवप्रकटनपटुभ्यां दीप्रदिव्यरत्नभासुराभ्यां

मधुरनादमनोहरजाम्बूनदघण्टासहस्रतारकिताभ्यां रत्नमयकमलकुट्मलाकार-स्थूलशङ्कुपरम्पराबुद्बुदायमानाभ्यां नयनप्रतिहतिकरणनिपुणाद्भुतदिव्यदीप्तिभ्यां विशालाभ्यां कवाटाभ्यां दर्शनीयाद्भुतदिव्यद्वारं, क्षीरोदफेनपुञ्जमञ्जुलधवलाभ्यां स्तोकान्दोलनगम्भीराभ्यां विधूयमानविधूम्रधवलकर्णतालाभ्यां डोलायमान-दुग्धाब्धितनुतरङ्गरेखावलीतरङ्गितपृथुलशुण्डादण्डाभ्यां अर्गलायमानस्थूल-स्निग्धविशददन्तकुन्तचतुष्टयाभ्यां पृथुलक्रमोच्छूनमसृणचन्द्रमण्डलवर्तुलकुम्भ-मण्डलाभ्यां सुरापगाधुनीधवलाभ्यां दिव्यकुञ्जराभ्यां समलङ्कृतद्वारोभयपार्श्व-दर्शनीयं, गदावष्टम्भावस्थिताभ्यां तेजोमयदिव्यविग्रहाभ्यां सर्वाङ्गीणदिव्या-भरणाभ्यां गाम्भीर्यधोरणीप्रकटनपटुमुखमण्डलाभ्यां दीर्घापाङ्गसंसूच्यमान-परिजनप्रवेशनिर्गमाभ्यां स्थानगौरवाधिकृताभ्यां आस्थानगौरवार्थं स्थिताभ्यां निश्चलाभ्यां प्रांशुभ्यां द्वारपालाभ्यां गम्भीरमन्दहासाभ्यां प्रतीहारोभयपार्श्व-स्पृहणीयं, अतिविशालमत्युन्नतमत्यद्भुतं सहस्रकिरणसहस्रभासुरं, निरन्तर-प्रकीर्यमाणदीप्रपीतकान्तिकन्दलितं स्थूलतरं समुन्नतशिखरकन्दलितप्रफुल्ल-पद्मरागमयमहापद्मालिसुभगं, दृष्टिपथातीतपर्यन्तं कामनीयकाकरं सौभाग्यागारं हिरण्यप्राकारं ददर्श।

दृष्ट्वा चापरिमितप्रमोदभरमन्थरा स्वाप्नप्रपञ्चपरिवर्तमानेव, आनन्द-सागरतरङ्गप्लाव्यमानेव, अनायत्तात्मा केनापि नीयमानेव मन्दं व्रजन्ती मध्येमार्गं, हिरण्यप्राकारस्याप्यनतिदूरे तत्क्षणं क्षितितलादाविर्भूतं, कनकपत्र-भङ्गचित्रितविचित्रविशददन्तमयस्तम्भचतुष्टयमनोहरं, स्तोकावनतशातकुम्भ-मयनानाविधप्रतिकर्मकरम्बितवलभिप्रान्तडोलायमानपृथुलमुक्ताफलमालाकलाप-परिवेष्टितं, चतुरश्रशिखरघटितमणिमयकलशचतुष्टयं, अधोमुखविनिहित-कमलाकारदीप्रगोपुरदर्शनीयं, कनकपताकिकापरिकलितकलशकमनीयाग्रभागं, प्रतिस्तम्भाग्रवलयितमन्दारकुसुमवन्दनमालातिसुन्दरं, मणिकुट्टिमभासुरं, विचित्र-मणिमयदिव्यपाञ्चालिकावलिसुभगगोपानस्यूर्ध्वभागं, शुभ्रदन्तमयदन्तिचतुष्टय-समूह्यमानं अनत्युन्नतमनत्यायतं दिव्यमण्डपमद्राक्षीत्।

दृष्ट्वा च हन्त! किमिदम्? अतर्कितोपनतं महदिदमाश्चर्यम्। इति विस्मितमानसा तत्रत्यैर्भव्यरूपैः परिजनैर्देवताविशेषैस्सादरं सविनयं सानन्दं सगम्भीरमन्दहासं सानुनयं सविभ्रमं प्रत्युद्गम्य सगौरवं प्रवेशिता तन्मण्टपाभ्यन्तरम्।

तत्र स्थितायाञ्च तस्यां, सुधांशुमण्डलविशदविततदिव्यातपत्रव्रातसंछाद्यमानगगनाभोगं दिव्यवीणावेणुमृदङ्गपटहभेरीमर्दलकाहलीतरङ्गशब्दायमानाग्रभागं, कोमलपद्मकोरकसङ्काशकाशमानकाञ्चनदण्डघटितदीप्रदिव्यनवरत्नमयविचित्रदिव्यविरुदावलीदेदीप्यमानोभयपार्श्वप्रान्तं, सौदामनीनीकाशकनकतन्तुकलापतोरणरमणीयं, भास्करभासुरमणिमयपूर्णकुम्भसुभगशुभ्रेभदर्शनीयं, दोधूयमानराजहंसधवलप्रकीर्णकदन्तुरितं, दिव्यभक्तवर्गस्फुटोच्चार्यमाणदिव्यश्रीसूक्ताप्यायितश्रवणविवरं, रमाकैङ्कर्यपरैर्दृगासेचनकदिव्यरूपैर्विचित्रकोमलतनुतराम्बरधरैः दिव्यगानपरवशीक्रियमाणसकलहृदयैः, सर्वाङ्गीणदिव्याभरणैः दिव्याङ्गनागणैः परिमण्डितं, प्रांशुभिस्तेजोमयैर्दर्शनीयदेहबन्धैः निरन्तरतारुण्यसुभगैः दिव्याम्बराभरणभूषितैर्दिव्यपुरुषैः परिवार्यमाणं, शतसहस्रदिव्यदीप्रपताकावलीकल्लोलायमानं, ध्रियमाणमुक्तातपत्रं, समुच्छ्रितश्वेतमत्तमातङ्गकुम्भपीठप्रतिष्ठापितं, दीप्रदिव्यरत्नमयपादुकायुगलं मन्दंमन्दमाजगाम पद्मद्वाराभ्यन्तरात्।

वरवर्णिनी तु तत्रत्यानामनुचिन्त्य द्वन्द्वातीततां दोषगन्धास्पृष्टनिरन्तरानन्दमयतामवलोक्य च परस्परसौहार्ददर्शितव्यापारं विनिभाल्य च, कैङ्कर्यकौतुकातिशयमनुचिन्त्य च विनयव्यवहारमनुध्याय च भक्तलाभसंतोषमालोक्य च भगवत्याः वीरलक्ष्म्याः निरतिशयवैभवमनुभूय च तत्कृपापरीवाहमनुसन्धाय च केवलानन्दसिन्धुमग्नात्मा बद्धाञ्जलिपुटा, अस्वाधीनेन्द्रियग्रामा बाष्पपूरपरिप्लाव्यमाना, मध्यमलोकस्वाप्नप्रपञ्चातीतवस्तुक्रियां स्थितिमनुचिन्तयन्ती निर्व्यापारा स्तम्भितेव तस्थौ।

तदनु अन्यः कोऽपि दासपार्श्ववर्ती प्रांशुः निजतेजःप्रतिहन्यमानसर्वनयनः केयूरकटकपरिष्कृतदीर्घभुजचतुष्टयदर्शनीयः, महापद्माक्षमालालङ्कृतवक्षस्स्थलः, शुद्धजाम्बूनददिव्यदेहकान्तिः, स्मयमानप्रफुल्लमुखारविन्दः, दिव्यपुरुषस्सविनयमुपसृत्य साञ्जलिबन्धं अपि कुशलम्? अपि स्वागतम्? अपि शिवाः पन्थानः? दिष्ट्या दर्शनं भवत्याः। भगवती जगज्जननी दर्शनमात्मनः प्रदातुकामा भवतीमाह्वयतीति सादरमभिधाय करिवरशिरसस्समवतारितं मणिपादुकायुगलमपि तस्याश्शिरसि निधायान्तःप्रवेशाय प्रार्थयामास।

सा तु वरवर्णिनी जगज्जननीपरिवारपरिवृता, समन्दस्मितं सानन्दं दिव्याङ्गनाभिस्सादरमसकृदभिवीक्ष्यमाणा, अत्यद्भुतं वाङ्मनसागोचरसौन्दर्यं तेजोमयं दिव्यं विमानमधिरुह्य श्रीलोकाभिमुखी प्रतस्थे।

**इति श्रीवरवर्णिन्याः श्रीलोकाभिगमनं नाम षष्ठमालिका॥**

## सप्तममालिका

मन्दं दिव्यविमानेन प्रस्थिता च सा वरवर्णिनी गमनानुक्रमेण श्रीलोकवैभवमवलोकयन्ती ययौ। तथा हि—

उज्ज्वलहाटकमयविशङ्कटसमुच्छ्रितप्राकारपरिवेष्टितं, दीप्रदिव्यरत्नमयविशालकवाटयुगलमङ्गलरूपविस्मयकरदिव्यपाञ्चालिका परम्परादर्शनीयदिव्यमहाद्वारं, गम्भीरस्वभावनिश्चलप्रांशुमन्दहासगम्भीराभिधद्वारपालकदेदीप्यमानद्वारोभयपार्श्वं, समुन्नामितपृथुलशुण्डादण्डाभ्यां स्पष्टप्रकाशमानमसृणदीर्घदन्तचतुष्टयाभ्यां मत्तमतङ्गजाभ्यां समलङ्कृतप्रतीहारोभयप्रान्तं,

सर्वर्तुप्रभवैर्दिव्यपरिमलक्रियमाणघ्राणतर्पणैः अदृष्टपूर्वभासुरदिव्यविविधवर्णव्यतिकरकरम्बितैः मदमत्तमधुलोलुपदिव्यमधुपयूथेन्द्रनीलप्रभाकबलितैः पतद्भिश्च पतितैश्च प्रफुल्लैरम्लानैर्नवनवैः मल्लिकानवमालिकाचम्पकचन्द्रकान्तादिकुसुमैर्दृगासेचनकरूपेण, दिव्यकोकिलालापगम्भीरैः परस्परक्रीडातत्परदिव्यकीरशारिकाप्रभृति नानाविधदर्शनीयाण्डजमण्डलपरिमण्डितैः मरकतहरितपलाशसान्द्रैः विचित्रदिव्यस्वादुलरामृतकल्पानल्पफलभरानम्रैः अद्भुततरदिव्यविटपिपटलैः कन्दलितेन, मन्दसमीरस्पन्दमाननानाविधप्रसवप्रचुरदिव्यचञ्चरीकमुखरितपुञ्जीभूतकोमललतावितानातिसुन्दरेण, विस्मयावहविचित्ररत्नासनदीप्रकुसुमप्रचुरदिव्यलतामण्डपशतसहस्रदेदीप्यमानेन, निरन्तरप्रफुल्लाम्लानतेजोमयसुवर्णकमलकल्हारकोकनदकैरवकुवलयादिदिव्यप्रसूनसुभगैः तरङ्गशिखरविहरणपरैः दिव्यनादैः मराळवरटाचक्रवाकसारसप्रभृतिभिः दिव्यजलचरविहङ्गैरानन्दमयैः दिव्यरत्नमयसोपानपरम्पराभिरामैः स्फटिकद्रवसध्रीचिवीचीचयचारुदर्शनैः दिव्यवापीशतसहस्रैरसकृदवेक्षणीयेन, तेजोमयेनारामशतसहस्रेणाभिरामं,

कैश्चित्स्फटिकमयैः कैश्चित्प्रवालमयैः कैश्चिद्वैडूर्यमयैः कैश्चित्पद्मरागमयैः कैश्चिन्माणिक्यमयैः कैश्चिद्गारुत्मतमयैः कैश्चिदिन्द्रनीलमणिमयैः कैश्चिद्वीरमणिमयैः कैश्चिज्जातरूपमयैः कैश्चिच्चामीकरमयैः तालप्रमाणैः विचित्रकक्ष्यापरम्परोपशोभितैः वरणपरिवृतैः दर्शनीयविशङ्कटनिष्कुटवाटैः नवरत्नमयकुट्टिमैः दिव्यजलचराण्डजमण्डितविविधजलजावलिकमनीयस्फटिकमयसोपानराजिविराजमानमृदुतरङ्गनिर्मलसलिलवापिकादर्शनीयैः मणिमयवातायनोपशोभितानेकक्षौमगम्भीरैः विचित्रक्रीडापर्वतडोलाभिरामपार्श्वभागैः अत्यन्तसुखस्पर्शविचित्रदिव्यासनावलिसुभगैः धिक्कृतरम्भाद्यप्सरोगणसौन्दर्याभिरष्टादशवत्सरदेश्याभिः सकलकलाभिज्ञाभिः दिव्यकुसुमस्रगलङ्कृताभिः सर्वाङ्गीणदिव्याभरणकान्ताभिः शुद्धजाम्बूनदकान्तिदर्शनीयशिरीषकोमलतनुलताभिः कापटयगन्धरिक्तमृदुहृदयाभिः परस्परमृदुमधुरव्याहारदर्शितानन्दातिशयाभिः दिव्यमत्तकाशिनीभिः

नित्योत्सवमयैः देदीप्यमानकलशोज्ज्वलशिखरैः पताकापरम्पराभिरामैः दृगासेचनकरूपैः दिव्यभवनैः तुच्छीकृतामरावतीवैभवं,

अनन्तदिव्यरत्नमरीचिवीचीनिचयनिचितान्तरिक्षतया सुरचापसच्छायसमुल्लसदुल्लोचसमाच्छादितमिव नानावर्णातपपरिरञ्जितं, अत एव सञ्चारानुमेयदिव्यमयूरवारं, निरन्तरविचित्रकल्पतरुकुसुमदिव्यपरिमलाप्यायितसकलहृदयं, दूरीकृतपाककर्मतया केवलदिव्यधूपधूमालिह्यमानवातायनविवरं, अस्पृष्टस्वेदगन्धैरम्लानमालभारिभिर्निरन्तरनिर्णिक्तदिव्यदेहकान्तिभिस्सुविमृष्ट - कुण्डलैः प्रांशुभिर्भगवत्याः दिव्यपरिचारकैः पटुतरं पर्यटद्भिर्दर्शनीयशृङ्गाटकं, अनासक्तरजःकणाभिस्स्फटिकधवलाभिर्विशालाभिर्दर्पणायमानाभिः कोमलाभिः दिव्यसरणिभिरभिरामं, तत्र तत्र पर्यटत्सिद्धविद्याधरबन्धुरं, भगवत्याः दर्शनार्थमागताभिरागच्छन्तीभिः प्रतिपालयन्तीभिः दृष्ट्वा प्रतिनिवर्तमानाभिः प्रवेश्यमानाभिर्देवताभिस्सदोत्सवमयं, शृङ्गाटकविशङ्कटहाटकमयविचित्रपत्रभङ्गगम्भीर दिव्यमण्डपाभ्यन्तर - दिव्यगानमुखरदिव्यनर्तनपरसुरवाराङ्गनावाररमणीयं, मदकलधवलवारणशुण्डादण्डध्रियमाणोद्दण्डदण्डमण्डितमणिमयमकरतोरणभासुरचतुष्पथप्रान्तं, सजीवैरिव दर्शनीयैर्विस्मयावहैर्विविधमणिमयैर्विहंगैर्देदीप्यमान दिव्यधिष्ण्यपरम्परामनोहरं, अनाघ्रातदुःखगन्धं, दूरोत्सारितमात्सर्यं, सौहार्दजितक्रोधं, इन्द्रनीलमणिप्रभाभिरेव तमोमयं, पद्मरागरत्नरुचिभिरेव रागविशिष्टं, भगवत्यास्सेवायामेव प्रदर्शितकामं, सर्वसमतया परित्यक्तनीचोच्चभावं, आनन्दमयमुत्सवमयं, विस्मयमयं कान्तिमयं सौन्दर्यमयं परिमलमयं सत्त्वमयमाह्लादमयं रत्नमयं तेजोमयं विचित्रवर्णमयं विस्मयावहव्यापारमयं गानमयं सुखमयं देवतामयं दृगासेचनकरूपं दिव्यं श्रीलोकमपश्यत् ।

यत्र च कुटिलता चिकुरेषु डोलायमानता विहारेषु दन्तावलिप्रकटनं स्मितपूर्वभाषणेषु तेजोभिभवनं परस्पररत्नभित्तिषु कोशग्रहमसिषु धूमायमानता धूपेषु पक्षपातः पतत्रिषु चञ्चलता केतुपटेषु तमःप्रसरणमिन्द्रनीलमणिभवनेषु बन्धनं प्रसवेषु वलिसमाकुलताम्बरेषु गन्धश्चन्दनादिषु भङ्गो भ्रूलतासु

धारापातः क्रीडाशैलधुनीषु रजः कुसुमेषु मधुपानमत्तता चञ्चरीकेषु दारिद्र्यमवलग्नेषु रागोऽधरपल्लवेषु अधःपतनं फलप्रसूनेषु काठिन्यं हीरमणिषु मुखरता वाद्यविशेषेषु तत्रत्येषु; न सूरिजनेषु।

यत्र च निरन्तरमपि निसर्गत एव प्रसाधितसर्वावयवतया कर्तव्यमिति मत्तकाशिन्यः प्रसाधनविधिं, स्वयमेव तरुलताभिः ग्रथ्यमानस्पृहणीयविचित्रकुसुममालानिकरतया स्पृहेति प्रसूनमालाबन्धनं, स्वभावत एवास्पृष्टमलतया आचार इति शोधनाक्रमं, अनवरतमपि परिपूततया विधिरिति दिव्यसलिलावगाहनं, स्मरणमात्रेण स्वयमेव समुज्वलद्दीपपङ्क्तितया मङ्गलमिति दीपकलिकोद्दीपनं, स्वभावत एव परस्परबद्धसौहार्दतया विहार इति पक्षप्रतिपक्षभेदं, सङ्कल्पतस्स्वयमेवोधःप्रसृतपयः प्रपूर्यमाणकलशतया विनोद इति धेनुदोहनं कुर्वन्ति। किं बहुना! सर्वेऽपि पदार्थास्सचेतनतया देवीभक्ततया अश्रान्तदेवीसपर्याप्तसाहित्यतया च स्वयमेव स्वस्वकर्मसु सज्जा भवन्ति। तत्रत्याः किङ्करास्तु तत्पुनरुक्तीकरणेनात्मानं धन्यं मन्यन्ते।

एवमनन्यसाधारणं विस्मयावहं वाङ्मनसागोचरं दर्शनैकानुभाव्यं दृगासेचनकं अनवरतमपि नवंनवं अस्पृष्टदोषगन्धं मुहुर्मुहुस्समुपजनितदर्शनाशं अनिमिषाणामेवानुभवयोग्यं अपरिच्छिन्नं पश्यन्ती वैभवातिशयं विस्मयकल्लोलान्दोलितहृदया दयामनुस्मरन्ती भगवत्याः दिव्यया द्युतिमय्या विद्युदाभया शिबिकया प्रस्थिता, देदीप्यमानास्तम्भतोरणभासुरया पटुनटदभ्रंलिहपताकावलिप्रकाशिताट्टहासया दीपायमानदीप्रदिव्यमणिमालाराजिरुचिनीराजितया प्रांशुभिर्दिव्याभरणाम्बरालङ्कृतैर्विनयनम्रैः पृथुलवर्तुलदीर्घबाहुचतुष्टयदर्शनीयैः कटितटसमावेष्टितदिव्यपीताम्बरैः दिव्यप्रसूनमालासमलङ्कृतविशालवक्षस्स्थलैः महापद्मबीजाक्षमालावेष्टितकम्बुकन्धरैर्विशुद्धजाम्बूनदसोदरदिव्यदेहद्युतिभिः स्मितप्रफुल्लप्रसन्नमुखकमलैः पङ्क्तिशस्स्थितैरष्टादशवर्षदेश्यैर्दिव्यपुरुषैर्देदीप्यमानोभयपार्श्वया रूपापहसितसुरवारसुन्दरीसौन्दर्यातिशयाभिः मदकलकलहंसगमनाभिर्नन्दनवनानोकहप्रसूनस्रगभिरामोत्तमाङ्गाभिः

तनुतरमृदुलभासुरवर्णदुकूलकूलङ्कषकान्तिभिर्लताकोमलागण्यलावण्यधोरणीधुनीतरङ्गतरङ्गिततनुयष्टिभिर्निरन्तरनवतरुणिमस्पृहणीयावयवबन्धाभिः स्मितप्रसृमरविशदकौमुदीप्रसरप्रकाश्यमानपुरस्स्थलीभिस्तारागणगर्वसर्वङ्कषकान्तिलोभनीय-दिव्यमणिगणकिरणकरम्बितदिव्याभरणगणभासुरसर्वप्रतीकाभिः माधुर्यधोरणी-विगणितवीणावाणीभिः षोडशवर्षदेश्याभिः दिव्याङ्गनाभिर्दर्शनीयपुरोभागया विशालया निर्मलया पटीररसशीतलया प्रसूनसुकुमारया सरण्या मन्दं मन्दं जगाम।

एवं क्रमेण गत्वा च तत्रत्यैस्स्तूयमाना समुच्छ्रितसमुज्ज्वलभव्यदिव्य-पाञ्चालिकापङ्क्तिविस्मयावहगाङ्गेयगोपुरशिखरनिस्तलकलशकोटिसमुल्लिख्यमान-मानातीततारापथं कर्बुरप्राकारमतिक्रम्य,—

सर्वर्तुफलकुसुमहृदयङ्गमेन नानाविधदिव्यभव्याण्डजनानाविधकलनाद-पतनोत्पतनानवरतप्रदर्श्यमानासामान्यवैभवेन परिमलबहुलकुसुमडोलामाला-सम्भृतदिव्यबम्भरनिकुरुम्बसंरम्भभ्रमणसमुज्जृम्भितझङ्कारगम्भीरेण कलहंस-कलनादपरवशीक्रियमाणसर्वहृदयेन निर्मलमौक्तिकलावण्यतरङ्गभङ्गुरदिव्यताम-रसरसविसरप्रसरसुरचापायमानामलसलिललोलसरोवरशतेन प्रत्नरत्नप्रभाविच्छु-रितनिर्झरझरीपरीतदिव्यरत्नक्रीडापर्वतकसहस्रोपशोभितेन मन्दगन्धवहपरिस्पन्द्य-माननानाविधलतालासकीप्रकीर्यमाण विचित्रदिव्यप्रसूनप्रकल्प्यमानकोमलतल्पेन कनकवालुकाराशिशिखरनिषण्णवनदेवतागणपरिगुम्भ्यमानहृदयङ्गमकलधौत-दीप्रप्रसवस्रग्विशेषदर्शनीयेन अतिकोमलशाद्वलतलप्रसुप्तदिव्यहिरण्यहरिणगण-भासुरेण समन्ततो भासुरहरितप्रभासंवलिततया केकारवानुमीयमानदिव्यमयूर-निकुरुम्बेण निरन्तरेन्द्रनीलमणिरुचिरुचिरतरुलताकान्तिसमाक्रान्ताभ्यन्तरतया परिपतत्कनककुसुमविसरसमुपजनितविद्युत्पातसन्देहेन तरुगहनविलीनदिव्य-कोकिलकूजितजितविहारपरदिव्यरामालापेन दिव्यपरिमलकृतघ्राणतर्पणेन दिव्यारामेण समावेष्टितं,

सचित्रपत्रभङ्गतरङ्गसुभगकलधौतसमुच्छ्रितस्थूलस्तम्भगम्भीराभ्यन्तरेण भासुरमाणिक्यफलकपरिकर्मितवलभिपरम्पराभव्यकान्तिना मरकतमयरसाल-दलकलापकल्पिततोरणमालेन गुम्फितस्पन्दमानहरितवितततदलबहुलदिव्य-रम्भास्तम्भकरम्बितस्तम्भाडम्बरेण मसृणरत्नफलककुट्टिमतलप्रतिबिम्बितेन विचित्रपुत्रिकाव्रातदर्शनीयतपनीयाच्छादनेन विशालेन दिव्यमण्डपेन विराज-मानद्वाराङ्कणदेशं,

सर्वाङ्गीणाभरणगणस्पृहणीयाभ्यां सिन्दूरविच्छुरितललाटाभ्यां लीला-न्दोलितभुजगराजभोगनिभशुण्डादण्डाभ्यां भास्करमयूखसंपर्कभासुरशरदभ्र-शुभ्रशरीराभ्यां प्रसृमरारुणिमकुहरप्रान्तकान्तकर्णतालमूलालम्बितस्थूलमुक्ता-फलमालाकलापाभ्यां मन्दान्दोलनचालितवाचालितचामीकरघण्टाटङ्कारगम्भी-राभ्यां समुच्छ्रिताभ्यामिभाभ्यामभिरक्ष्यमाणद्वारोभयपार्श्वं,

निजतेजःप्रसरेणैव वाचं विना गाम्भीर्येण भक्तजनस्वेच्छान्तःप्रवेश-निरोधमाचरद्भ्यामिव समुत्कीर्णाभ्यामिव निश्चलाभ्यां शातकुम्भप्रतिमाभ्यामिव दीप्रतनुभ्यां शङ्खचक्रगदाज्ञामुद्राञ्चितबाहुदण्डचतुष्टयाभ्यां महाधनदिव्याभरण-समलङ्कृतदिव्यविग्रहाभ्यां वामजङ्घाकाण्डोपरि किञ्चित्कुञ्चितदक्षिणजङ्घा-काण्डाभ्यां मणिकुट्टिमतलविनिहितदक्षिणप्रपदाभ्यां प्रांशुभ्यां परिपूर्ण-कल्याणाभ्यां द्वारपालाभ्यामभिरामद्वारप्रान्तोभयपार्श्वं,

अन्तरान्तरा समुत्कीर्णप्रत्युप्तभासुरप्रत्नवररत्नकुसुमाचितेन देदीप्यमान-दिव्यजाम्बूनदसमुत्कीर्णलताप्रतानेन समलङ्कृतद्वारप्रान्तपट्टिकं, सत्तमरत्नो-पायनपाणिभिः कैश्चिदभ्यन्तरप्रवेशावसरमनुपालयद्भिः कैश्चिद्भार्गवीदर्शनानन्द-प्रफुल्लमुखकमलैर्बहिर्निर्गच्छद्भिर्देवगन्धर्वयक्षकिन्नरादिगणैर्देवविशेषैश्च नीरन्ध्रित-द्वारं, कान्तिकान्तचिन्तामणिफलकविलसच्छिलाभासुरद्वारतलं, कल्पतरु-तरुणारुणतोरणपल्लववन्दारुमालाभिराममनासाभासुरद्वारोर्ध्वदेशं, प्रविश्य च दिव्यमन्दिरद्वारं,

पद्भ्यामेव गच्छन्ती बद्धाञ्जलिपुटा आनन्दतरङ्गपरिप्लाव्यमानेव परवशहृदया भगवत्याः दयामपरिमितामनुभाव्य भव्यहृदया तत्रत्यानां सौजन्यं माधुर्यं सौन्दर्यं गाम्भीर्यं चातुर्यं धैर्यं स्थैर्यं औदार्यं लावण्यं कारुण्यं दाक्षिण्यञ्च दर्शंदर्शमनन्यमानसा तद्गुणैराबद्धेव स्तम्भितावयवा शङ्कुकीलितेव रोमाञ्चितगात्री निरतिशयानन्दाश्रुसलिलासारसिच्यमानकपोलफलका मन्दंमन्दं विन्यस्यमानचरणनलिना,

कुत्रचिन्माणिक्यमयैः कुत्रचिन्मरकतमयैः कुत्रचिद्वीरमणिमयैः कुत्रचिदिन्द्रनीलमणिमयैः कुत्रचित्पद्मरागमयैःकुत्रचित्पुष्परागमयैः कुत्रचित्प्रवालमयैः कुत्रचित्स्फटिकमयैः कुत्रचिद्दन्तमयैः कुत्रचिच्छातकुम्भमयैस्तालप्रमाणैर्विचित्राश्रगुम्भितैर्दीर्घव्यामग्राह्यगात्रैः कुट्मलायमानशिरःप्रान्तैश्चतुर्भागसमष्ठिलब्धपुष्टिभिः कुत्रचिदेकप्रकारैः कुत्रचिद्द्विप्रकारैः कुत्रचित्त्रिप्रकारैर्वर्णनातीतदिव्यचित्रचित्रितैर्बहुविधाकारपृथुलविशालसमुन्नतपीठप्रतिष्ठापितैः स्तम्भतरङ्गैर्गम्भीरतरं, कल्पतरुप्रहितदिव्यवस्त्राभरणपरिष्कृतदिव्योल्लोचं, समन्ततः प्रसृमरदिव्यपरिमलबहुलदिव्यधूपधवलधूमवितानालिह्यमानदिव्यमणिवितानं,

एकरूपरूपतारुण्यलावण्यगाम्भीर्यधोरणीभिर्लक्ष्मीभ्रान्तिमुपजनयन्तीभिः षोडशवत्सरदेश्याभिर्विचित्रसौरभदिव्यप्रसूनसंगुम्फनव्यग्रपाणिभिर्दिव्यापाङ्गधिक्कृतभ्रमरपङ्क्तिभिः प्रसृमरकोमलारुणनखकिरणेषु कुसुमधिया तदादित्सया प्रेर्यमाणपाणिकमलाभिः कुसुमोपरि परिपतन्तीस्तरलापाङ्गकान्तीः भ्रमरभ्रान्त्या करतलेन समुत्सारयन्तीभिः प्रसूनराशिं परितो मण्डलाकारसमुपविष्टाभिः दिव्यमत्तकाशिनीभिः परिमण्डितदिव्यरत्नकुट्टिमस्पृहणीयपुष्पोदवसितसितकान्तिदर्शनीयं,

यथाभिलाषं सिद्धेऽप्यनिर्वचनीयदिव्यपरिमलक्रियमाणघ्राणतर्पणे घुसृणविशेषे कैङ्कर्यकुतूहलेन नानाविधवासनाद्रव्यसंमिश्रणव्यग्राभिः पीतदिव्यांशुकपरिधानाभिः रक्तपीतहरितसितशारवर्णघुसृणसंभृतविविधमणिमयभाजनविभजनप्रदर्श्यमानहस्तलाघवाभिः लावण्यमयीभिः परिभ्रमदिन्द्रनीलमणि-

भासुरबम्भरनिकुरुम्बपरिवाराभिः दिव्यतरुणीभिः अलङ्क्रियमाणदन्तमयपटीरागार रमणीयं, .

विचित्रकोमलदिव्यकुथास्तीर्णवाङ्मनसागोचरशिल्पनैपुणहृदयङ्गमविविध-विचित्रमणिमयदिव्यासनपरम्परातरङ्गितकुट्टिमप्रान्तेन अद्भुततरपत्रभङ्गवेल्लित-पर्यन्तदर्शनीयविविधाकारमणिमुकुरमन्दिरेणातिसुन्दरं,

सङ्कल्पमात्रसृज्यमानेष्वपि दिव्याम्बरेषु सर्वेश्वरमहिषीभावगौरवाभिशंसन-परदिव्यदीप्राद्भुततर कोमलपरिमलबहुल विविधवर्णरञ्जिताम्बरसहस्रसहस्राक्ष-चापायमानवस्त्रागारहृदयङ्गमं,

प्रत्युप्तचन्द्रकान्तशिलाफलकपरम्परास्पृहणीयसोपानराजिविराजमानया चामीकरभासुरराजहंसराजिपरिप्लवनतरङ्गितप्रवालारुणचरणारुणकान्तिरञ्जित -तरङ्गपरम्परया चटुलतरसञ्चरणशीलचञ्चलदीप्रपीवरशफरपरम्पराप्रतिहतद्रष्टृ-नयनग्रहणशक्तया चक्रवाकचञ्चुञ्चुतरचञ्चुकोटिचाल्यमानचामीकरदिव्य-सरोजराजिविराजमानया द्रुतस्फटिकद्रवस्वच्छसलिलया दिव्यवापिकया दृगासेचनकमध्यप्रदेशेन सुकुमारमणिमयदिव्यस्नानविष्टरसुभगेन काञ्चनराजत-स्फाटिकद्रोणीश्रेणीद्विगुणीकृतसौन्दर्येण घनसारपटीरकाश्मीरजन्मोशीरादिदिव्य-परिमलद्रव्यभव्यपरिमलबहुलविमलसलिलशीतलितसकलेन्द्रियेण नर्तनपरमत्त-दिव्यमयूरवारकेकारावगम्भीरोदरेण प्रणालिकाविवरपरिपतत्सुरतरङ्गिणीविशद-झरीनिर्ह्रादाह्लादितश्रवणेन्द्रियेण दिव्यधारागारेण शीतलितप्रान्तं,

सर्वाङ्गीणदिव्याभरणगणकिरणकान्तिकान्तैः स्पृहणीयरूपैस्तरुणैर्गन्धर्वैः वाद्यमानातोद्याश्रुतपूर्वदिव्यनादेन गीयमानेन भगवत्याः भार्गव्याः दिव्या-पदानचरित्रस्तोत्रमयगेयबन्धेन विलीनीक्रियमाणसर्वचित्तेन भव्यसङ्गीतभवनं,

लास्याय सज्जैर्हृदयङ्गमदिव्यरूपैर्दिव्यस्रगनुलेपनधवलदुकूलसमलङ्कृत-प्रतीकैर्विशाललोचनकुवलयचालनचाल्यमानसकलतपोधनहृदयैः षोडशवत्सर-देश्यैः गुल्फतटनटन्मणिकिङ्किणीनूपुरपरिष्कृतचरणकिसलयक्रमणमुखरीक्रिय-

॥ श्रीः ॥

श्री भगवल्लक्ष्मीदासानुगृहीतं

# श्रीलोकगद्यम्

## भगवद्भागवतस्तोत्राणि च

संग्राहकः, सम्पादकः--प्रकाशकश्च

श्री बालधन्वि जग्गु सुदर्शनाचार्यः

साहित्य-वेदान्तविद्वान्, विश्रान्तविशिष्टाद्वैतवेदान्तविभागप्राध्यापकः,

राजकीयसंस्कृतमहापाठशाला, बेङ्गलूरु

गाद्यनेक
नायमाने
क्रमात्
ाधिष्ठितः
चार्यादि-
ःयष्टतीर्थ-
स्सह्यगिरेः
वेदगिरि-
।
यतिराज-
ःशिखराग्र-
ङ्कीर्तनपराः
नप्रवचना-
व्रता कृत
हस्तीदिव्य
पि कारण
त्र तद्दर्शन
लोकितश्चे

मधुरनादमनोहरजाम्बूनदघण्टासहस्रतारकिताभ्यां रत्नमयकमलकुट्मलाकार-स्थूलशङ्कुपरम्पराबुद्बुदायमानाभ्यां नयनप्रतिहतिकरणनिपुणाद्भुतदिव्यदीप्तिभ्यां विशालाभ्यां कवाटाभ्यां दर्शनीयाद्भुतदिव्यद्वारं, क्षीरोदफेनपुञ्जमञ्जुलधवलाभ्यां स्तोकान्दोलनगम्भीराभ्यां विधूयमानविधूस्रधवलकर्णतालाभ्यां डोलायमान-दुग्धाब्धितनुतरङ्गरेखावलीतरङ्गितपृथुलशुण्डादण्डाभ्यां अर्गलायमानस्थूल-स्निग्धविशददन्तकुन्तचतुष्टयाभ्यां पृथुलक्रमोच्छूनमसृणचन्द्रमण्डलवर्तुलकुम्भ-मण्डलाभ्यां सुरापगाधुनीधवलाभ्यां दिव्यकुञ्जराभ्यां समलङ्कृतद्वारोभयपार्श्वे-दर्शनीयं, गदावष्टम्भावस्थिताभ्यां तेजोमयदिव्यविग्रहाभ्यां सर्वाङ्गीणदिव्या-भरणाभ्यां गाम्भीर्यधोरणीप्रकटनपटुमुखमण्डलाभ्यां दीर्घापाङ्गसंसूच्यमान-परिजनप्रवेशनिर्गमाभ्यां स्थानगौरवाधिकृताभ्यां आस्थानगौरवार्थं स्थिताभ्यां निश्चलाभ्यां प्रांशुभ्यां द्वारपालाभ्यां गम्भीरमन्दहासाभ्यां प्रतीहारोभयपार्श्वे-स्पृहणीयं, अतिविशालमत्युन्नतमत्यद्भुतं सहस्रकिरणसहस्रभासुरं, निरन्तर-प्रकीर्यमाणदीप्रपीतकान्तिकन्दलितं स्थूलतरं समुन्नतशिखरकन्दलितप्रफुल्ल-पद्मरागमयमहापद्मालिसुभगं, दृष्टिपथातीतपर्यन्तं कामनीयकाकरं सौभाग्यागारं हिरण्यप्राकारं ददर्श।

दृष्ट्वा चापरिमितप्रमोदभरमन्थरा स्वाप्नप्रपञ्चपरिवर्तमानेव, आनन्द-सागरतरङ्गप्लाव्यमानेव, अनायत्तात्मा केनापि नीयमानेव मन्दं व्रजन्ती मध्येमार्गं, हिरण्यप्राकारस्याप्यनतिदूरे तत्क्षणं क्षितितलादाविर्भूतं, कनकपत्र-भङ्गचित्रितविचित्रविशददन्तमयस्तम्भचतुष्टयमनोहरं, स्तोकावनतशातकुम्भ-मयनानाविधप्रतिकर्मकरम्बितवलभिप्रान्तडोलायमानपृथुलमुक्ताफलमालाकलाप-परिवेष्टितं, चतुरश्रशिखरघटितमणिमयकलशचतुष्टयं, अधोमुखविनिहित-कमलाकारदीप्रगोपुरदर्शनीयं, कनकपताकिकापरिकलितकलशकमनीयाग्रभागं, प्रतिस्तम्भाग्रवलयितमन्दारकुसुमवन्दनमालातिसुन्दरं, मणिकुट्टिमभासुरं, विचित्र-मणिमयदिव्यपाञ्चालिकावलिसुभगगोपानस्यूर्ध्वभागं, शुभ्रदन्तमयदन्तिचतुष्टय-समूह्यमानं अनत्युन्नतमनत्यायतं दिव्यमण्डपमद्राक्षीत्।

दृष्ट्वा च हन्त! किमिदम्? अतर्कितोपनतं महदिदमाश्चर्यम्। इति विस्मितमानसा तत्रत्यैर्भव्यरूपैः परिजनैर्देवताविशेषैस्सादरं सविनयं सानन्दं सगम्भीरमन्दहासं सानुनयं सविभ्रमं प्रत्युद्गम्य सगौरवं प्रवेशिता तन्मण्टपाभ्यन्तरम्।

तत्र स्थितायाञ्च तस्यां, सुधांशुमण्डलविशदविततदिव्यातपत्रव्रातसंछाद्यमानगगनाभोगं दिव्यवीणावेणुमृदङ्गपटहभेरीमर्दलकाहलीतरङ्गशब्दायमानाग्रभागं, कोमलपद्मकोरकसङ्काशकाशमानकाञ्चनदण्डघटितदीप्रदिव्यनवरत्नमयविचित्रदिव्यबिरुदावलीदेदीप्यमानोभयपार्श्वप्रान्तं, सौदामनीनीकाशकनकतन्तुकलापतोरणरमणीयं, भास्करभासुरमणिमयपूर्णकुम्भसुभगशुभ्रेभदर्शनीयं, दोधूयमानराजहंसधवलप्रकीर्णकदन्तुरितं, दिव्यभक्तवर्गस्फुटोच्चार्यमाणदिव्यश्रीसूक्ताप्यायितश्रवणविवरं, रमाकैङ्कर्यपरैर्दृगासेचनकदिव्यरूपैर्विचित्रकोमलतनुतराम्बरधरैः दिव्यगानपरवशीक्रियमाणसकलहृदयैः, सर्वाङ्गीणदिव्याभरणैः दिव्याङ्गनागणैः परिमण्डितं, प्रांशुभिस्तेजोमयैर्दर्शनीयदेहबन्धैः निरन्तरतारुण्यसुभगैः दिव्याम्बराभरणभूषितैर्दिव्यपुरुषैः परिवार्यमाणं, शतसहस्रदिव्यदीप्रपताकावलीकल्लोलायमानं, ध्रियमाणमुक्तातपत्रं, समुच्छ्रितश्वेतमत्तमातङ्गकुम्भपीठप्रतिष्ठापितं, दीप्रदिव्यरत्नमयपादुकायुगलं मन्दंमन्दमाजगाम पद्मद्वाराभ्यन्तरात्।

वरवर्णिनी तु तत्रत्यानामनुचिन्त्य द्वन्द्वातीततां दोषगन्धास्पृष्टनिरन्तरानन्दमयतामवलोक्य च परस्परसौहार्ददर्शितव्यापारं विनिभाल्य च, कैङ्कर्यकौतुकातिशयमनुचिन्त्य च विनयव्यवहारमनुध्याय च भक्तलाभसंतोषमालोक्य च भगवत्याः वीरलक्ष्म्याः निरतिशयवैभवमनुभूय च तत्कृपापरीवाहमनुसन्धाय च केवलानन्दसिन्धुमग्नात्मा बद्धाञ्जलिपुटा, अस्वाधीनेन्द्रियग्रामा बाष्पपूरपरिप्लाव्यमाना, मध्यमलोकस्वाप्नप्रपञ्चातीतवस्तुक्रियां स्थितिमनुचिन्तयन्ती निर्व्यापारा स्तम्भितेव तस्थौ।

तदनु अन्यः कोऽपि दासपार्श्ववर्ती प्रांशुः निजतेजःप्रतिहन्यमानसर्वेनयनः केयूरकटकपरिष्कृतदीर्घभुजचतुष्टयदर्शनीयः, महापद्माक्षमालालङ्कृतवक्षस्स्थलः, शुद्धजाम्बूनददिव्यदेहकान्तिः, स्मयमानप्रफुल्लमुखारविन्दः, दिव्यपुरुषस्सविनयमुपसृत्य साञ्जलिबन्धं अपि कुशलम्? अपि स्वागतम्? अपि शिवाः पन्थानः? दिष्टया दर्शनं भवत्याः। भगवती जगज्जननी दर्शनमात्मनः प्रदातुकामा भवतीमाह्वयतीति सादरमभिधाय करिवरशिरसस्समवतारितं मणिपादुकायुगलमपि तस्याश्शिरसि निधायान्तःप्रवेशाय प्रार्थयामास।

सा तु वरवर्णिनी जगज्जननीपरिवारपरिवृता, समन्दस्मितं सानन्दं दिव्याङ्गनाभिस्सादरमसकृदभिवीक्ष्यमाणा, अत्यद्भुतं वाङ्मनसागोचरसौन्दर्यं तेजोमयं दिव्यं विमानमधिरुह्य श्रीलोकाभिमुखी प्रतस्थे।

**इति श्रीवरवर्णिन्याः श्रीलोकाभिगमनं नाम षष्ठमालिका॥**

## सप्तममालिका

मन्दं दिव्यविमानेन प्रस्थिता च सा वरवर्णिनी गमनानुक्रमेण श्रीलोकवैभवमवलोकयन्ती ययौ। तथा हि—

उज्वलहाटकमयविशङ्कटसमुच्छ्रितप्राकारपरिवेष्टितं, दीप्रदिव्यरत्नमयविशालकवाटयुगलमङ्गलरूपविस्मयकरदिव्यपाञ्चालिका परम्परादर्शनीयदिव्यमहाद्वारं, गम्भीरस्वभावनिश्चलप्रांशुमन्दहासगम्भीराभिधद्वारपालकदेदीप्यमानद्वारोभयपार्श्वं, समुन्नामितपृथुलशुण्डादण्डाभ्यां स्पष्टप्रकाशमानमसृणदीर्घदन्तचतुष्टयाभ्यां मत्तमतङ्गजाभ्यां समलङ्कृतप्रतीहारोभयप्रान्तं,

सर्वर्तुप्रभवैर्दिव्यपरिमलक्रियमाणघ्राणतर्पणैः अदृष्टपूर्वभासुरदिव्य-विविधवर्णव्यतिकरकरम्बितैः मदमत्तमधुलोलुपदिव्यमधुपयूथेन्द्रनीलप्रभाक-बलितैः पतद्भिश्च पतितैश्च प्रफुल्लैरम्लानैर्नवनवैः मल्लिकानवमालिकाचम्पक-चन्द्रकान्तादिकुसुमैर्दृगासेचनकरूपेण, दिव्यकोकिलालापगम्भीरैः परस्पर-क्रीडातत्परदिव्यकीरशारिकाप्रभृति नानाविधदर्शनीयाण्डजमण्डलपरिमण्डितैः मरकतहरितपलाशसान्द्रैः विचित्रदिव्यस्वादुतरामृतकल्पानल्पफलभरानम्रैः अद्भुततरदिव्यविटपिपटलैः कन्दलितेन, मन्दसमीरस्पन्दमाननानाविधप्रसव-प्रचुरदिव्यचञ्चरीकमुखरितपुञ्जीभूतकोमललतावितानातिसुन्दरेण, विस्मयावह-विचित्ररत्नासनदीप्रकुसुमप्रचुरदिव्यलतामण्डपशतसहस्रदेदीप्यमानेन, निरन्तर-प्रफुल्लाम्लानतेजोमयसुवर्णकमलकल्हारकोकनदकैरवकुवलयादिदिव्यप्रसूनसुभगैः तरङ्गशिखरविहरणपरैः दिव्यनादैः मराळवरटाचक्रवाकसारसप्रभृतिभिः दिव्य-जलचरविहङ्गैरानन्दमयैः दिव्यरत्नमयसोपानपरम्पराभिरामैः स्फटिकद्रवसध्रीचि-वीचीचयचारुदर्शनैः दिव्यवापीशतसहस्रैरसकृदवेक्षणीयेन, तेजोमयेनाराम-शतसहस्रेणाभिरामं,

कैश्चित्स्फटिकमयैः कैश्चित्प्रवालमयैः कैश्चिद्वैडूर्यमयैः कैश्चित्पद्मरागमयैः कैश्चिन्माणिक्यमयैः कैश्चिद्गारुत्मतमयैः कैश्चिदिन्द्रनीलमणिमयैः कैश्चिद्वीर-मणिमयैः कैश्चिज्जातरूपमयैः कैश्चिच्चामीकरमयैः तालप्रमाणैः विचित्रकक्ष्या-परम्परोपशोभितैः वरणपरिवृतैः दर्शनीयविशङ्कटनिष्कुटवाटैः नवरत्नमयकुट्टिमैः दिव्यजलचराण्डजमण्डितविविधजलजावलिकमनीयस्फटिकमयसोपानराजिविरा-जमानमृदुतरङ्गनिर्मलसलिलवापिकादर्शनीयैः मणिमयवातायनोपशोभितानेक-क्षौमगम्भीरैः विचित्रक्रीडापर्वतडोलाभिरामपार्श्वभागैः अत्यन्तसुखस्पर्शविचित्र-दिव्यासनावलिसुभगैः धिक्कृतरम्भाद्यप्सरोगणसौन्दर्याभिरष्टादशवत्सरदेश्याभिः सकलकलाभिज्ञाभिः दिव्यकुसुमस्रगलङ्कृताभिः सर्वाङ्गीणदिव्याभरणकान्ताभिः शुद्धजाम्बूनदकान्तिदर्शनीयशिरीषकोमलतनुलताभिः कापट्यगन्धरिक्तमृदु-हृदयाभिः परस्परमृदुमधुरव्याहारदर्शितानन्दातिशयाभिः दिव्यमत्तकाशिनीभिः

नित्योत्सवमयैः देदीप्यमानकलशोज्ज्वलशिखरैः पताकापरम्पराभिरामैः दृगासेचनकरूपैः दिव्यभवनैः तुच्छीकृतामरावतीवैभवं,

अनन्तदिव्यरत्नमरीचिवीचीनिचयनिचितान्तरिक्षतया सुरचापसच्छायसमुल्लसदुल्लोचसमाच्छादितमिव नानावर्णातपपरिरञ्जितं, अत एव सञ्चारानुमेयदिव्यमयूरवारं, निरन्तरविचित्रकल्पतरुकुसुमदिव्यपरिमलाप्यायितसकलहृदयं, दूरीकृतपाककर्मतया केवलदिव्यधूपधूमालिह्यमानवातायनविवरं, अस्पृष्टस्वेदगन्धैरम्लानमालभारिभिर्निरन्तरनिर्णिक्तदिव्यदेहकान्तिभिस्सुविमृष्ट - कुण्डलैः प्रांशुभिर्भगवत्याः दिव्यपरिचारकैः पटुतरं पर्यटद्भिर्दर्शनीयश्शृङ्गाटकं, अनासक्तरजःकणाभिस्स्फटिकधवलाभिर्विशालाभिर्दर्पणायमानाभिः कोमलाभिः दिव्यसरणिभिरभिरामं, तत्र तत्र पर्यटत्सिद्धविद्याधरबन्धुरं, भगवत्याः दर्शनार्थमागताभिरागच्छन्तीभिः प्रतिपालयन्तीभिः दृष्ट्वा प्रतिनिवर्तमानाभिः प्रवेश्यमानाभिर्देवताभिस्सदोत्सवमयं, शृङ्गाटकत्रिशङ्कटहाटकमयविचित्रपत्रभङ्गगम्भीर दिव्यमण्डपाभ्यन्तर - दिव्यगानमुखरदिव्यनर्तनपरसुरवाराङ्गनावाररमणीयं, मदकलधवलवारणशुण्डादण्डध्रियमाणोद्दण्डदण्डमण्डितमणिमयमकरतोरणभासुरचतुष्पथप्रान्तं, सजीवैरिव दर्शनीयैर्विस्मयावहैर्विविधमणिमयैर्विहंगैर्देदीप्यमान दिव्यधिष्ण्यपरम्परामनोहरं, अनाघ्रातदुःखगन्धं, दूरोत्सारितमात्सर्यं, सौहार्दजितक्रोधं, इन्द्रनीलमणिप्रभाभिरेव तमोमयं, पद्मरागरत्नरुचिभिरेव रागविशिष्टं, भगवत्यास्सेवायामेव प्रदर्शितकामं, सर्वसमतया परित्यक्तनीचोच्चभावं, आनन्दमयमुत्सवमयं, विस्मयमयं कान्तिमयं सौन्दर्यमयं परिमलमयं सत्त्वमयमाह्लादमयं रत्नमयं तेजोमयं विचित्रवर्णमयं विस्मयावहव्यापारमयं गानमयं सुखमयं देवतामयं दृगासेचनकरूपं दिव्यं श्रीलोकमपश्यत् ।

यत्र च कुटिलता चिकुरेषु डोलायमानता विहारेषु दन्तावलिप्रकटनं स्मितपूर्वभाषणेषु तेजोभिभवनं परस्पररत्नभित्तिषु कोशग्रहमसिषु धूमायमानता धूपेषु पक्षपातः पतत्रिषु चञ्चलता केतुपटेषु तमःप्रसरणमिन्द्रनीलमणिभवनेषु बन्धनं प्रसवेषु वलिसमाकुलताम्बरेषु गन्धश्चन्दनादिषु भङ्गो भ्रूलतासु

धारापातः क्रीडाशैलधुनीषु रजः कुसुमेषु मधुपानमत्तता चञ्चरीकेषु दारिद्य-मवलग्नेषु रागोऽधरपल्लवेषु अधःपतनं फलप्रसूनेषु काठिन्यं हीरमणिषु मुखरता वाद्यविशेषेषु तत्रत्येषु; न सूरिजनेषु।

यत्र च निरन्तरमपि निसर्गत एव प्रसाधितसर्वावयवतया कर्तव्यमिति मत्तकाशिन्यः प्रसाधनविधिं, स्वयमेव तरुलताभिः ग्रथ्यमानस्पृहणीयविचित्र-कुसुममालानिकरतया स्पृहेति प्रसूनमालाबन्धनं, स्वभावत एवास्पृष्टमलतया आचार इति शोधनाक्रमं, अनवरतमपि परिपूततया विधिरिति दिव्य-सलिलावगाहनं, स्मरणमात्रेण स्वयमेव समुज्वलद्दीपपङ्क्तितया मङ्गलमिति दीपकलिकोद्दीपनं, स्वभावत एव परस्परबद्धसौहार्दतया विहार इति पक्षप्रति-पक्षभेदं, सङ्कल्पतस्स्वयमेवोधःप्रसृतपयः प्रपूर्यमाणकलशतया विनोद इति धेनुदोहनं कुर्वन्ति। किं बहुना! सर्वेऽपि पदार्थास्सचेतनतया देवीभक्ततया अश्रान्तदेवीसपर्याप्तसौहित्यतया च स्वयमेव स्वस्वकर्मसु सज्जा भवन्ति। तत्रत्याः किङ्करास्तु तत्पुनरुक्तीकरणेनात्मानं धन्यं मन्यन्ते।

एवमनन्यसाधारणं विस्मयावहं वाङ्मनसागोचरं दर्शनैकानुभाव्यं दृगासेचनकं अनवरतमपि नवंनवं अस्पृष्टदोषगन्धं मुहुर्मुहुस्समुपजनित-दर्शनाशं अनिमिषाणामेवानुभवयोग्यं अपरिच्छिन्नं पश्यन्ती वैभवातिशयं विस्मयकल्लोलान्दोलितहृदया दयामनुस्मरन्ती भगवत्याः दिव्यया द्युतिमय्या विद्युदाभया शिबिकया प्रस्थिता, देदीप्यमानास्तम्भतोरणभासुरया पटुनट-दभ्रंलिहपताकावलिप्रकाशिताट्टहासया दीपायमानदीप्रदिव्यमणिमालाराजि-रुचिनीराजितया प्रांशुभिर्दिव्याभरणाम्बरालङ्कृतैर्विनयनम्रैः पृथुलवर्तुलदीर्घ-बाहुचतुष्टयदर्शनीयैः कटितटसमावेष्टितदिव्यपीताम्बरैः दिव्यप्रसूनमालासम-लङ्कृतविशालवक्षस्स्थलैः महापद्मबीजाक्षमालावेष्टितकम्बुकन्धरैर्विशुद्धजाम्बूनद-सोदरदिव्यदेहद्युतिभिः स्मितप्रफुल्लप्रसन्नमुखकमलैः पङ्क्तिशस्स्थितैरष्टादशवर्ष-देश्यैर्दिव्यपुरुषैर्देदीप्यमानोभयपार्श्वया रूपापहसितसुरवारसुन्दरीसौन्दर्याति-शयाभिः मदकलकलहंसगमनाभिर्नन्दनवनानोकहप्रसूनस्रगभिरामोत्तमाङ्गाभिः

तनुतरमृदुलभासुरवर्णदुकूलकूलङ्कष कान्तिभिर्लताकोमलागण्यलावण्यधोरणीधुनी तरङ्गतरङ्गिततनुयष्टिभिर्निरन्तरनवतरुणिमस्पृहणीयावयवबन्धाभिः स्मितप्रसृमर विशदकौमुदीप्रसरप्रकाश्यमानपुरस्स्थलीभिस्तारागणगर्वसर्वङ्कषकान्तिलोभनीय - दिव्यमणिगणकिरणकरम्बितदिव्याभरणगणभासुरसर्वप्रतीकाभिः माधुर्यधोरणी-विगणितवीणावाणीभिः षोडशवर्षदेश्याभिः दिव्याङ्गनाभिर्दर्शनीयपुरोभागया विशालया निर्मलया पटीररसशीतलया प्रसूनसुकुमारया सरण्या मन्दं मन्दं जगाम।

एवं क्रमेण गत्वा च तत्रत्यैस्स्तूयमाना समुच्छ्रितसमुज्ज्वलभव्यदिव्य-पाञ्चालिकापङ्क्तिविस्मयावहगाङ्गेयगोपुरशिखरनिस्तलकलशाकोटिसमुल्लिख्यमान - मानातीततारापथं कर्बुरप्राकारमतिक्रम्य,—

सर्वर्तुफलकुसुमहृदयङ्गमेन नानाविधदिव्यभव्याण्डजनानाविधकलनाद-पतनोत्पतनानवरतप्रदर्श्यमानासामान्यवैभवेन परिमलबहुलकुसुमडोलामाला-सम्भृतदिव्यबम्भरनिकुरुम्बसंरम्भभ्रमणसमुज्जृम्भितझङ्कारगम्भीरेण कलहंस-कलनादपरवशीक्रियमाणसर्वहृदयेन निर्मलमौक्तिकलावण्यतरङ्गभङ्गुरदिव्यताम-रसरसविसरप्रसरसुरचापायमानामलसलिललोलसरोवरशतेन प्रत्नरत्नप्रभाविच्छु-रितनिर्झरझरीपरीतदिव्यरत्नक्रीडापर्वतकसहस्रोपशोभितेन मन्दगन्धवहपरिस्पन्द्य-माननानाविधलतालासकीप्रकीर्यमाण विचित्रदिव्यप्रसूनप्रकल्प्यमानकोमलतल्पेन कनकवालुकाराशिशिखरनिषण्णवनदेवतागणपरिगुम्भ्यमानहृदयङ्गमकलधौत - दीप्रप्रसवस्रग्विशेषदर्शनीयेन अतिकोमलशाद्वलतलप्रसुप्तदिव्यहिरण्यहरिणगण-भासुरेण समन्ततो भासुरहरितप्रभासंवलिततया केकारवानुमीयमानदिव्यमयूर-निकुरुम्बेण निरन्तरेन्द्रनीलमणिरुचिरुचिरतरुलताकान्तिसमाक्रान्ताभ्यन्तरतया परिपतत्कनककुसुमविसरसमुपजनितविद्युत्पातसन्देहेन तरुगहनविलीनदिव्य-कोकिलकूजितजितविहारपरदिव्यरामालापेन दिव्यपरिमलकृतघ्राणतर्पणेन दिव्यारामेण समावेष्टितं,

सचित्रपत्रभङ्गतरङ्गसुभगकलधौतसमुच्छ्रितस्थूलस्तम्भगम्भीराभ्यन्तरेण भासुरमाणिक्यफलकपरिकर्मितवलभिपरम्पराभव्यकान्तिना मरकतमयरसाल-दलकलापकल्पिततोरणमालेन गुम्फितस्पन्दमानहरितविततदलबहुलदिव्य-रम्भास्तम्भकरम्बितस्तम्भाडम्बरेण ममृणरत्नफलककुट्टिमतलप्रतिबिम्बितेन विचित्रपुत्रिकाव्रातदर्शनीयतपनीयाच्छादनेन विशालेन दिव्यमण्डपेन विराज-मानद्वाराङ्कणदेशं,

सर्वाङ्गीणाभरणगणस्पृहणीयाभ्यां सिन्दूरविच्छुरितललाटाभ्यां लीला-न्दोलितभुजगराजभोगनिभशुण्डादण्डाभ्यां भास्करमयूखसंपर्कभासुरशरदभ्र-शुभ्रशरीराभ्यां प्रसृमरारुणिमकुहरप्रान्तकान्तकर्णतालमूलालम्बितस्थूलमुक्ता-फलमालाकलापाभ्यां मन्दान्दोलनचालितवाचालितचामीकरघण्टाटङ्कारगम्भी-राभ्यां समुच्छ्रिताभ्यामिभाभ्यामभिरक्ष्यमाणद्वारोभयपार्श्वं,

निजतेजःप्रसरेणैव वाचं विना गाम्भीर्येण भक्तजनस्वेच्छान्तःप्रवेश-निरोधमाचरद्भ्यामिव समुत्कीर्णाभ्यामिव निश्चलाभ्यां शातकुम्भप्रतिमाभ्यामिव दीप्रतनुभ्यां शङ्खचक्रगदाज्ञामुद्राञ्चितबाहुदण्डचतुष्टयाभ्यां महाधनदिव्याभरण-समलङ्कृतदिव्यविग्रहाभ्यां वामजङ्घाकाण्डोपरि किञ्चित्कुञ्चितदक्षिणजङ्घा-काण्डाभ्यां मणिकुट्टिमतलविनिहितदक्षिणप्रपदाभ्यां प्रांशुभ्यां परिपूर्ण-कल्याणाभ्यां द्वारपालाभ्यामभिरामद्वारप्रान्तोभयपार्श्वं,

अन्तरान्तरा समुत्कीर्णप्रत्युप्तभासुरप्रत्नवररत्नकुसुमाचितेन देदीप्यमान-दिव्यजाम्बूनदसमुत्कीर्णलताप्रतानेन समलङ्कृतद्वारप्रान्तपट्टिकं, सत्तमरत्नो-पायनपाणिभिः कैश्चिदभ्यन्तरप्रवेशावसरमनुपालयद्भिः कैश्चिद्द्वार्गवीदर्शनानन्द-प्रफुल्लमुखकमलैर्बहिर्निर्गच्छद्भिर्देवगन्धर्वयक्षकिन्नरादिगणैर्देवविशेषैश्च नीरन्ध्रित-द्वारं, कान्तिकान्तचिन्तामणिफलकविलसच्छिलाभासुरद्वारतलं, कल्पतरु-तरुणारुणतोरणपल्लववन्दारुमालाभिरामनासाभासुरद्वारोर्ध्वदेशं, प्रविश्य च दिव्यमन्दिरद्वारं,

पद्भ्यामेव गच्छन्ती बद्धाञ्जलिपुटा आनन्दतरङ्गपरिप्लाव्यमानेव परवशहृदया भगवत्याः दयामपरिमितामनुभाव्य भव्यहृदया तत्रत्यानां सौजन्यं माधुर्यं सौन्दर्यं गाम्भीर्यं चातुर्यं धैर्यं स्थैर्यं औदार्यं लावण्यं कारुण्यं दाक्षिण्यञ्च दर्शंदर्शमनन्यमानसा तद्गुणैराबद्धेव स्तम्भितावयवा शङ्कुकीलितेव रोमाञ्चितगात्री निरतिशयानन्दाश्रुसलिलासारसिच्यमानकपोलफलका मन्दंमन्दं विन्यस्यमानचरणनलिना,

कुत्रचिन्माणिक्यमयैः कुत्रचिन्मरकतमयैः कुत्रचिद्वीरमणिमयैः कुत्रचिदिन्द्रनीलमणिमयैः कुत्रचित्पद्मरागमयैःकुत्रचित्पुष्परागमयैः कुत्रचित्प्रवालमयैः कुत्रचित्स्फटिकमयैः कुत्रचिद्दन्तमयैः कुत्रचिच्छातकुम्भमयैस्तालप्रमाणैर्विचित्राश्रगुम्भितैर्दीर्घव्यामग्राह्यगात्रैः कुट्मलायमानशिरःप्रान्तैश्चतुर्भागसमष्टिलब्धपुष्टिभिः कुत्रचिदेकप्रकारैः कुत्रचिद्द्विप्रकारैः कुत्रचित्त्रिप्रकारैर्वर्णनातीतदिव्यचित्रचित्रितैर्बहुविधाकारपृथुलविशालसमुन्नतपीठप्रतिष्ठापितैः स्तम्भतरङ्गैर्गम्भीरतरं, कल्पतरुप्रहितदिव्यवस्त्राभरणपरिष्कृतदिव्योल्लोचं, समन्ततः प्रसृमरदिव्यपरिमलबहुलदिव्यधूपधवलधूमवितानालिह्यमानदिव्यमणिवितानं,

एकरूपरूपतारुण्यलावण्यगाम्भीर्यधोरणीभिर्लक्ष्मीभ्रान्तिमुपजनयन्तीभिः षोडशवत्सरदेश्याभिर्विचित्रसौरभदिव्यप्रसूनसंगुम्फनव्यग्रपाणिभिर्दिव्यापाङ्गधिक्कृतभ्रमरपङ्क्तिभिः प्रसृमरकोमलारुणनखकिरणेषु कुसुमधिया तदादित्सया प्रेर्यमाणपाणिकमलाभिः कुसुमोपरि परिपतन्तीस्तरलापाङ्गकान्तीः भ्रमरभ्रान्त्या करतलेन समुत्सारयन्तीभिः प्रसूनराशिं परितो मण्डलाकारसमुपविष्टाभिः दिव्यमत्तकाशिनीभिः परिमण्डितदिव्यरत्नकुट्टिमस्पृहणीयपुष्पोदवसितसितकान्तिदर्शनीयं,

यथाभिलाषं सिद्धेऽप्यनिर्वचनीयदिव्यपरिमलक्रियमाणघ्राणतर्पणे घुसृणविशेषे कैङ्कर्यकुतूहलेन नानाविधवासनाद्रव्यसंमिश्रणव्यग्राभिः पीतदिव्यांशुकपरिधानाभिः रक्तपीतहरितसितशारवर्णघुसृणसंभृतविविधमणिमयभाजनविभजनप्रदर्श्यमानहस्तलाघवाभिः लावण्यमयीभिः परिभ्रमदिन्द्रनीलमणि-

भासुरबम्भरनिकुरुम्बपरिवाराभिः दिव्यतरुणीभिः अलङ्क्रियमाणदन्तमयपटीरागार रमणीयं,

विचित्रकोमलदिव्यकुथास्तीर्णवाङ्मनसागोचरशिल्पनैपुणहृदयङ्गमविविध-विचित्रमणिमयदिव्यासनपरम्परालङ्कृतकुट्टिमप्रान्तेन अद्भुततरपत्रभङ्गवेल्लित-पर्यन्तदर्शनीयविविधाकारमणिमुकुरमन्दिरेणातिसुन्दरं,

सङ्कल्पमात्रसृज्यमानेष्वपि दिव्याम्बरेषु सर्वेश्वरमहिषीभावगौरवाभिशंसन-परदिव्यदीप्राद्भुततर कोमलपरिमलबहुल विविधवर्णरञ्जिताम्बरसहस्रसहस्राक्ष-चापायमानवस्त्रागारहृदयङ्गमं,

प्रत्युप्तचन्द्रकान्तशिलाफलकपरम्परास्पृहणीयसोपानराजिविराजमानया चामीकरभासुरराजहंसराजिपरिप्लवनतरङ्गितप्रवालारुणचरणारुणकान्तिरञ्जित - तरङ्गपरम्परया चटुलतरसञ्चरणशीलचञ्चलदीप्रपीवरशफरपरम्पराप्रतिहतद्रष्टृ-नयनग्रहणशक्तया चक्रवाकचञ्चुचुञ्चुतरचञ्चुकोटिचाल्यमानचामीकरदिव्य-सरोजराजिविराजमानया द्रुतस्फटिकद्रवस्वच्छसलिलया दिव्यवापिकया दृगासेचनकमध्यप्रदेशेन सुकुमारमणिमयदिव्यस्नानविष्टरसुभगेन काञ्चनराजत-स्फाटिकद्रोणीश्रेणीद्विगुणीकृतसौन्दर्येण घनसारपटीरकाश्मीरजन्मोशीरादिदिव्य-परिमलद्रव्यभव्यपरिमलबहुलविमलसलिलशीतलितसकलेन्द्रियेण नर्तनपरमत्त-दिव्यमयूरवारकेकारावगम्भीरोदरेण प्रणालिकाविवरपरिपतत्सुरतरङ्गिणीविशद-झरीनिर्ह्रादाह्लादितश्रवणेन्द्रियेण दिव्यधारागारेण शीतलितप्रान्तं,

सर्वाङ्गीणदिव्याभरणगणकिरणकान्तिकान्तैः स्पृहणीयरूपैस्तरुणैर्गन्धर्वैः वाद्यमानातोद्याश्रुतपूर्वदिव्यनादेन गीयमानेन भगवत्याः भार्गव्याः दिव्या-पदानचरित्रस्तोत्रमयगेयबन्धेन विलीनीक्रियमाणसर्वचित्तेन भव्यसङ्गीतभवनं,

लास्याय सज्जैर्हृदयङ्गमदिव्यरूपैर्दिव्यस्रगनुलेपनधवलदुकूलसमलङ्कृत-प्रतीकैर्विशाललोचनकुवलयचालनचाल्यमानसकलतपोधनहृदयैः षोडशवत्सर-देश्यैः गुल्फतटनटन्मणिकिङ्किणीनूपुरपरिष्कृतचरणकिसलयक्रमणमुखरीक्रिय-

माणमणिकुट्टिमतलैः आनितम्बमण्डललम्बिकबरीभारमसृणमूलस्तोकचिकुरकृत-वेणीधिक्कृतफणीन्द्रभोगवैभवैः मणिमयकमनीयसमुद्दण्डमुण्डमालाविडम्बितोडु-षण्डडम्बरैः मन्दानिलान्दोलितललितलताप्रतारणपटुतनुयष्टिभिः रम्भाद्यप्सरो-गणैरतिमनोहरदिव्यलास्यालयं,

विचित्रजीवरत्नमयकमनीयनानाविधदिव्याभरणजालभासुराभ्यन्तरैःस मुच्छ्रितशुभ्रदन्तफलकमयविशालपीठिकासहस्रैः कौमुदीपुञ्जैरिवापहसित-शर्वरीशारदाम्बरवैभवेनाभरणागारेण देदीप्यमानप्रान्तदेशं,

भगवत्याः दर्शनावसरानुपालनपरैस्समुच्छ्रितमणिपीठपरम्पराप्रतिष्ठा-पितदिव्योपायनरत्नसंभारैरहंपूर्विकया निजाहूतिसमयैकतानस्वान्ततया तन्मार्ग-दत्तनिश्चलेक्षणैः स्वोचितदिव्यासनोपविष्टैः पुरन्दरप्रभृतिभिर्दिक्पालकैः संसेव्य-मानदिव्यानुपालनमन्दिराभिरामं,

यदृच्छया गतागतपरस्य भगवतश्चक्रपाणेरुपेन्द्रस्य विश्रान्तिसुखाय विविक्तसङ्कल्पकल्पितेन विविधदिव्यभोगोपकरणपूर्णेन वाङ्मनसागोचरवैभवेन तेजोमयेन दिव्यमन्दिरेण सनाथैकदेशं,

तेजोमयैर्विचित्रदिव्यपत्रभङ्गविविधसमुत्कीर्णमृगखगादिविचित्रजन्तुस-मलङ्कृतैर्नानाकारैर्दृगासेचनकरूपैर्भासुरदिव्यनवरत्नप्रचुरैर्व्योमयानैर्दिव्ययानैश्च - नीरन्ध्रितदिव्यभवनभासुरं,

देवीसेवाहेवाकैस्सुधांशुमण्डलैरिव दिव्यश्वेतातपत्रैश्चन्द्रकमण्डलपरि-मण्डितैर्व्यजनैः कलानिधिमरीचिकलापकोमलायतविततदिव्यचामरैश्च दर्शनीय-दिव्यधिष्ण्यं, मध्ये चातिविशालदीप्रमणिकुट्टिमाङ्कणं, अत्युन्नततया अत्युद्दण्ड-स्तम्भतया अतिगभीरावरणतया च प्रकटीक्रियमाणनिरतिशयगाम्भीर्यं, नयनप्रतिहतिकरणनिपुणदिव्याम्बरवितानोभयपार्श्वडोलायितदीप्राञ्चलकवलित-प्रतिस्तम्भशिखरगुम्भं, अन्तरान्तराप्रलम्बितस्थूलमुक्ताकलापकमनीयोर्ध्वदेशं, विचित्रशातकुम्भपत्रभङ्गमण्डलजठरप्रतिष्ठापिताधोमुखकदलीकोरकसदृशमणिमय

लताकल्पबाहुलताग्रकन्दलितकिसलयेनेव कोमलेन पल्लवान्तरप्ररूढसुन्दरतर-मन्दारसुमनिभाङ्गुलीयकालङ्कृताङ्गुल्यावल्यपहसितदिव्यकोकनददलेन कान्ति-लिप्सयेव समाश्लिष्टदीप्रमणिवलयगणरमणीयमणिबन्धेन दक्षिणपाणिना प्रदर्श्य-मानाभयमुद्रां, प्रकाश्यमानानुरागेणेव स्तोकावर्जिततया मूलस्रस्तमणिकङ्कण-गणदर्शनीयेनाङ्गुलीयकावलिभारश्रमविजृम्भितमरुणिमानमभिनयेनेव प्रदर्शयता अधःप्रसृमरनखमयूखसन्ततितया प्रवर्षतेव घनधारां वामकरेण प्रकटीक्रियमाण-वरदमुद्रां, प्रान्तचित्रितभासुरराजहंसमञ्जुलेन चन्द्रमण्डलशुभ्रेण वलितरङ्गितेन दिव्यदुकूलेन दुहितृप्रीत्या क्षीरोदेनेव समाश्लिष्टभुजान्तरां, तनुतरावलग्नलग्न-दिव्यहीरमणिप्रचुररुचिरदीप्रकाञ्चीदामधामधिक्कृतशारदाम्बरसुधांशुकलां, भगी-रथप्रार्थनापरिपतत्सुरसरिज्झरीसोदरकोमलधवलदुकूलनीवीकलापकमनीयां चरण-नलिनपरिसरसंनिहितयेव देदीप्यमानराजहंसावल्या भासुरदुकूलकलापप्रान्त-कान्तपादमूलां, दिव्यमणिनूपुरैः चरणवरिवस्यापरैः तारागणैरिव परिष्कृतेन चरतामापन्नेन कल्पकिसलयेनेव वन्दारुबृन्दारकबृन्दमकुटमणिरुचिप्रक्षालि-तेनेव भासुरेण दिव्यरेखासुभगतलेन भक्तजननयनचुलकपीयमानलावण्यामृतेन नखकिरणकैतवेन तापापहरणनिपुणगीर्वाणस्रवन्तीमिव सृजता कुञ्चितेन सव्यचरणकिसलयेन लम्बितेन च दिव्यमणिमयनिस्तलकोमलपादपीठविनि-हितेनासव्यपादकमलेन च सर्वोपाश्रयर्णायां, नवनिधिराशिभासुरपर्यन्तपार्श्वां, शङ्खिनीचित्रिणीकोमलकरकमलवीज्यमानचञ्चच्चन्द्रमरीचिरुचिचारुचामररमणी-योभयपार्श्वां, शुभ्राभ्यामभ्रमुवल्लभनिभाभ्यामिभाभ्यां समुत्तम्भितशुण्डा-दण्डपुष्करविधृतस्तोकावर्जितदिव्यदीप्रमणिकलशमुखप्रसृमरामृतासारशीकर-करम्बितकिरीटमणिमरीचिमण्डलचन्द्रकितमस्तकपर्यन्तां, पृष्ठतस्स्थितया गायत्र्या सावित्र्या च निर्वर्त्यमानतालवृन्तकृत्यां, मूर्तिमतीभिस्सर्वपुण्यनदीभिस्संसेव्यमानां बृन्दारकेन्द्रप्रभृतिभिर्देवोत्तमैस्समर्प्यमाणानि सूत्रवत्याङ्गीकृतानि प्रदर्श्यमानानि च दिव्योपायनरत्नानि गम्भीरापाङ्गेनैव पश्यन्तीं, वाङ्मनसागोचरसौन्दर्यराशिं, कमलपरागराशिकल्पितामिव सुकुमारदिव्यशरीरां, चन्द्रकलामयीमिव लावण्य-

मयीं, चन्द्रिकामिव नयनानन्दजननीं, वर्णनातीतकान्तिमयीं, सुवर्णवर्णां, भक्तानां सौभाग्यराजिं, दैत्यारातेर्नयनसुधां, पुष्पमयीमिवकरचरणाद्यवयवैः, सर्वाङ्गीणाभरणकिरणप्रसरणदीप्रतया कान्तिपञ्जरमध्यगतामिव, सिद्धेरपि सिद्धिं, सम्पत्तेरपि सम्पत्तिं, सौभाग्यस्यापि सौभाग्यं, मङ्गलानामपि मङ्गलं, ह्रीमयीं, धीमयीं कीर्तिमयीं तुष्टिमयीं पुष्टिमयीं सर्वदेवतामयीं प्रणवमयीं त्रयीमयीं भगवतो नारायणस्यापि सर्वस्वं, मङ्गलाङ्गीं, ब्रह्मादीनामपि वाङ्मनसागोचरदिव्यरूपां, भगवतीं देवीं जगज्जननीं भगवन्नारायणमहिषीं मूर्तिमतीमिव कृपां वीरलक्ष्मीं ददर्श॥ दृष्ट्वा चैवमस्तावीत्।

जितन्ते पद्मपत्राक्षि! नमस्ते विश्ववन्दिते!
नमस्तेऽस्तु महादेवि! विष्णुवक्षस्स्थलालये! ॥ १ ॥

धन्यास्म्यनुगृहीतास्मि कृतकृत्यास्मि भार्गवि!
निर्हेतुकदयावीक्षा यत्त्वया मयि पातिता ॥ २ ॥

त्वद्दयाब्धितरङ्गाग्रप्रोच्चलच्छीकराणुना।
प्राप्तवत्यस्मि सम्पत्तिमीदृशीं करुणालये! ॥ ३ ॥

न कौस्तुभेन मणिना नापि श्रीवत्सलक्ष्मणा।
यथा पारम्यमापत्त्वत्पादचिह्नेन केशवः ॥ ४ ॥

न कर्मज्ञानभक्त्याख्याः योगास्सन्ति रमे! मयि।
कटाक्षेणैव ते सम्पत्प्राप्ता हन्तेदृशी मया ॥ ५ ॥

दोषैकवसतिर्मातः! पतिताहं त्वयोद्धृता।
अहो! तवाम्ब! वात्सल्यं जगन्मातृत्वसम्भवम् ॥ ६ ॥

त्वमेव सर्वबन्धुर्मे योगक्षेमविधायिनी।
त्वत्पादाम्भोजकैङ्कर्ये नियुङ्क्ष्वाकिञ्चनामिमाम् ॥ ७ ॥

दृगासेचनकं दिव्यं योगिनामप्यगोचरम् ।
धन्या पश्यामि ते रूपं त्वत्कृपामृतविप्रुषा ॥ ८ ॥

त्वद्भ्रूविभ्रमभव्यो हि भगवान्पुरुषोत्तमः ।
स्वतन्त्रोऽपि त्वया नुन्नः पापिनोऽप्यभिरक्षति ॥ ९ ॥

सर्वे ब्रह्माण्डपिण्डाश्च यस्यै कैटभविद्विषा ।
लीलाकन्दुकतां नीतास्सेयं जीयाज्जगत्प्रसूः ॥ १० ॥

इति स्तुत्वा भगवता सम्मानिता च यथाविधि प्रथममेव भगवत्याः वामपार्श्वे सज्जीकृते विष्टरे तामेव पश्यन्ती निश्चला पाञ्चालिकेव तस्थौ ।

**इति श्रीलक्ष्मीदासानुगृहीते श्रीगृहलक्ष्मीवदनसरसिजव्याहृते श्रीलोकगद्यग्रन्थे वरवर्णिन्याः श्रीलोकप्राप्तिर्नाम सप्तममालिका ॥**

**॥ श्रीः ॥**

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते लक्ष्मीदासाय नमः

श्री वीरलक्ष्म्यै नमः

# स्तोत्राणि

शंखी चक्री विधृतमकुटः कुण्डली चोन्नसोऽयम्
दंष्ट्री प्रांशुः कमलनयनश्शुभ्रमृत्स्नोर्ध्वपुण्ड्रः ।
गाङ्गेयाभो गलचलमहापद्मबीजाक्षमालो
लक्ष्मीदासो वसतु हृदि मे बद्धकौशेयकच्छः

यस्याः कटाक्षलेशेन प्राणी प्राचीनबर्हिताम् ।
उपैति तां महादेवीं वीरलक्ष्मीं नमाम्यहम्

---

## परत्वादिपञ्चकस्तोत्रम्

मर्त्या भवाम्बुधिनिरन्तरदुःखदीर्घ-
कल्लोललोलतनवो हितमालपामि ।
नारायणांघ्रितरणिं शरणं प्रपद्य
संसारसागरममुं तरताप्रमत्ताः

वैकुण्ठधाम्नि भुजगेशफणासहस्र-
रत्नप्रभावलयमध्यगतं रमेशं ।
वन्दे दृगन्तविशदीक्रियमाणभावं
पञ्चायुधाञ्चिततनुं परवासुदेवम्

पीताम्बरस्सवितृमध्यगतः किरीटी
चामीकरद्युतिमनोहरदिव्यगात्रः ।

हाराङ्गदादिमणिभूषणभूषिताङ्गो
नारायणो वसतु मे हृदयाब्जमध्ये ॥ ३ ॥

क्षीराम्बुराशिचलवीचिविचाल्यमान-
शेषाच्छभोगशयनीयशयालुमीड्यं ।
श्रीपाणिपद्मयुगलीमृदुसेव्यमान-
पादाम्बुजं स्मरतु मे हृदयं मुकुन्दम् ॥ ४ ॥

ध्यानानुरूपतनुरूपविभूतिभोग्यो
योगेश्वरस्स्मरणशीलजनानुरक्तः ।
यो योगिहृत्सरसिजे वसति प्रहृष्टो
नारायणस्स परिरक्षतु नः कृपालुः ॥ ५ ॥

भक्तावनाय भवता भगवन्न किं वा
हन्तानुभूतमिह चेष्टितमम्बुजाक्ष ।
सत्येवमप्यहह नाथ ! विमूढचित्ताः
त्वां न स्मरन्ति कृपयैव कटाक्षयैतान् ॥ ६ ॥

लोकत्रयैकजनकोऽप्यवनौ मुरारे
मर्त्याकृतिर्दशरथात्मजतामवाप्य ।
नित्यानपायिदयिताविरहार्दितोऽभूः
कारुण्यकर्म किल भक्तकृते तवेदम् ॥ ७ ॥

कल्याणभोग्यगुणपूर्णमवाप्तसर्व-
कामं विरोधिशमनाय कृतावतारं ॥
सौशील्यमौग्ध्यविवशीकृतगोपदारं
दामोदरं मुदिररोचिषमानमामः ॥ ८ ॥

भक्ताग्रगण्यकलिजित्कृतगोपुराढ्य-
प्रासादवासरसिकं भुजगेशतल्पं ।

श्रीरामपाणिकमलार्चितपादपद्मम्
श्रीरङ्गनाथमनिशं मनसा स्मरामः

काश्मीरजन्मघनसारपटीरगन्ध-
कृष्टाखिलेन्द्रियगणं श्रयणीयमेतत् ।
इत्यात्मपाणिविशदीक्रियमाणपादं
श्री श्रीनिवासमहिशैलपतिं भजामः

स्तम्बेरमाद्रिशिखरावसथप्रदीपो
रामानुजार्यकरनीतसुतीर्थतुष्टः ।
भक्तव्रजेप्सितसमस्तफलप्रदो यः
श्रीमान् स यच्छतु मतं वरदो वरं नः

यदुगिरितटभागे पारिजातः प्ररूढो
भवपथगतजन्तुश्रान्तिशान्तिप्रदाता ।
अमृतवितरणाय स्वाश्रितेभ्यस्तटित्वान्
जयति निगमवेद्यः कोऽपि जीमूत एषः

---

## वीरलक्ष्मीस्तोत्रम्

नीलाम्भोरुहमुग्धजिह्मनयनापाङ्गां मुकुन्दप्रियाम्
चञ्चद्भ्रूयुगलीविलासविलसल्लोकत्रयप्रक्रियाम् ।
कारुण्यैकनिधिं पयोधितनयां मन्दस्मिताभाषिणीम्
वन्दे चन्दनमन्दगन्धरुचिरां श्रीवीरलक्ष्मीमहम्

तेजःपुञ्जमये विमानजठरे दिव्याब्जसिंहासने
सम्यक्कुञ्चितवामपादकमलामालम्ब्यसव्यांघ्रिकाम् ।
दिव्यस्त्रीकरवीज्यमानधवलश्रीचामरस्पन्दित-
स्वच्छक्षौममनोहरां भगवतीं वन्दे जगन्मातरम्

श्रीश्रीसूक्तनुतां हरेरभिमतैस्सर्वैर्गुणैरञ्चिताम्
लोकत्राणकृते कृतात्मदयितश्लाघ्यानुरूपात्मकाम् ॥
देवैरप्यनिशं विलोकनकृते संस्तूयमानामपि
स्वेच्छादर्शितदिव्यरूपविभवां वन्देऽस्मदम्बां श्रियम् ॥ ३ ॥

कारुण्येन विदेहराजदुहिता भूत्वा मनुष्याकृतिः
पातिव्रत्यमहो जनाय विशदीकर्तुं पतिस्पर्धिनी ।
कान्तारे कटुकण्टकातिविषमे क्लिष्टा ह्यभूः कोमला-
प्यम्ब ! त्वच्चरितं निशम्य विदलेद्ग्रावापि केयं कृपा ॥ ४ ॥

सत्यप्यम्ब ! तवानिमित्तमधुरस्फीते कटाक्षे सदा
प्राणी प्राक्तनकर्मजालममितं भुक्त्वैव तीर्णो भवेत् ।
हन्त ! त्वत्सहजस्सुधातनुरपि प्राचीनकर्मोद्भव-
क्षीणत्वामयपीडितो निशिचरन्निर्निद्र एवास्ति हि ॥ ५ ॥

त्वत्संबन्धवशाच्छिलापि पशुरप्युर्वीरुहोऽप्याश्रितान्
रक्षन्तीप्सितदानतो जडतनुश्चाह्लादयत्याकुलान् ॥
सत्येवं सरिदीश्वरस्य तनये ! लोकैकबन्धोर्हरेः
कान्ते ! ते करुणाकटाक्षविभवं ज्ञातुं समर्थोऽस्ति कः ॥ ६ ॥

देवानामभिरक्षणाय भगवान्नारायणो मन्दरम्
क्षीराब्धौ विनिपात्य कूर्मतनुभृत्तं पृष्ठतोऽप्युद्वहन् ।
विष्टम्याग्रगतो विमथ्य बहुधा श्रान्तो बभूवेन्दिरे !
नो चेत्तत्र तवोद्भवोऽस्य तु तदा श्रान्तिः प्रशाम्येत्कथम् ॥ ७ ॥

काकोलेन महापराधकटुना किं प्रार्थिताभू रमे !
रामोपान्तनिपातमात्रकरुणापूर्णा रिरक्षाकुला ।
तच्छीर्षं रघुनाथपादकमले विन्यस्य रक्षाधुने-
त्युक्त्वा तं समपालयो हि वचनातीता कृपा ते ततः ॥ ८ ॥

मातर्मैथिलि! विस्मयाद्वहमितोऽप्यन्यद्भवेत्किं नु यत्
श्रीमन्मारुतिवालकोटिकुटिलं वैश्वानरं शीतलम्।
संकल्पेन विधाय कैटभरिपोस्संकल्पमप्यन्यथा
कृत्वा भक्तमपालयः करुणया तत्पाहि नस्साम्प्रतम्

मातर्लक्ष्मि! बलारिनीलमणिरुक्कायस्य दैत्यद्विषः
स्फीते वक्षसि चेद्भवेन्न भवती विद्युन्मनोज्ञद्युतिः।
वेदान्ताः परतत्वमार्गणरता ह्यन्धा भवेयुर्मणिं
को वस्त्वन्तरपूर्णकन्दरगतं गृण्हीत दीपं विना

त्वत्सान्निध्यवियोगतो रघुपतिर्नष्टं परत्वं पुनः
लब्धुं कीशसुहृन्निबध्य जलधौ सेतुं शिलासञ्चयैः।
पौलस्त्यं विनिपात्य तत्रभवतीं लब्ध्वा विरिंच्यादिभिः
देवैरम्ब! परात्परोऽसि भगवानित्यंञ्चितस्ते पतिः.

जयतु जयतु देवी भार्गवी मङ्गलाङ्गी
श्रितजनदुरितौघध्वंसिनी कामदोग्ध्री।
धवलतरगजानां पुष्करावर्ज्यमानैः
मणिमयकलशैर्या सिच्यमाना सुधाभिः

---

श्रीलोकात्स्वयमागता करुणया नारायणप्रेयसी
सौभाग्यैकनिधिर्विधातृविधुभृत्सुत्रामसंसेविता ॥
लोकत्राणपरायणा स्मितमुखी सौभाग्यधामान्तरे
विष्णोर्वक्षसि चास्थिता वितनुतां सन्मङ्गलं सर्वतः ॥

राकाशशिकनद्वक्त्रा काकासुरदयापरा।
लोकावनकृतोत्साहा श्रीः कामान्नः प्रयच्छतु ॥

आदिशेषफणादीप्ररत्नमण्डलरञ्जिता।
नः पुनातु महादेवी वीरलक्ष्मीरशुचिस्मिता ॥

# वीरलक्ष्मीमङ्गलम्

ओम् ॥

दिव्यरत्नविमानान्तर्स्सिहासनसरोरुहे ।
निषण्णायै महालक्ष्म्यै भूयो भूयोऽस्तु मङ्गलम् ॥ १ ॥

सर्वेश्वरस्य महिषीभावमावेदयत्प्रभम् ।
दधानायै किरीटं स्यादम्बायै मङ्गलं श्रियै ॥ २ ॥

अरालैः कोमलैस्स्निग्धैः कुन्तलैरूर्मिमत्तटम् ।
बिभ्रत्यै मुखशुभ्रांशुं मङ्गलं स्यात् जयश्रियै ॥ ३ ॥

भ्रूलतालासकीरङ्गं कस्तूरीतिलकाञ्चितम् ।
लावण्यपण्यमलिकं दधत्यै मङ्गलं श्रियै ॥ ४ ॥

सर्वेश्वरवशीकारसिद्धांजनकनीनिके ।
स्निग्धशुक्तिदृशौ स्फीते बिभ्रत्यै मङ्गलं श्रियै ॥ ५ ॥

नासिकावंशसंस्रस्तमिव मुक्ताफलं चलत् ।
रञ्जयन्त्यै निजोष्ठेन मङ्गलं स्यात् गजश्रियै ॥ ६ ॥

हीरताटङ्करुचिभिरिन्द्रचापजुषा सदा ।
लसन्त्यै गण्डपाल्या स्याद्वीरलक्ष्म्यै सुमङ्गलम् ॥ ७ ॥

मन्दस्मितस्फुरद्दन्तकुन्दकुट्मलरोचिषम् ।
शोणाधरं दधानायै सिद्धलक्ष्म्यै सुमङ्गलम् ॥ ८ ॥

पतद्ग्रहाभचुबुकद्विधोद्भिन्नकिसालयम् ।
बिम्बाधरं दधत्यै स्यात् धनलक्ष्म्यै सुमङ्गलम् ॥ ९ ॥

आकारत्रयसम्पत्तिं त्रिरेखाकैतवात्सदा ।
ग्रीवायां सूचयन्त्यै स्यादिन्दिरायै सुमङ्गलम् ॥ १० ॥

हरिबाहूपधानाभ्यां बन्धुराभ्यां सुमस्रजा ।
अंसाभ्यां काशमानायै दीपलक्ष्म्यै सुमङ्गलम्

मुखसादृश्यवीक्षार्थं तत्पार्श्वे सारसे इव ।
दधानायै कराभ्यां स्यात् कान्तिलक्ष्म्यै सुमङ्गलम्

कल्पवल्ल्याः किसालाग्राश्शाखिका इव कोमलाः ।
भान्ति यस्याः चतुर्बाहाः तस्यै स्यान्मङ्गलं श्रियै

हरितोज्वलकौशेयकंचुल्यंचितबाहुषु ।
चित्राङ्गदानि बिभ्रत्यै धान्यलक्ष्म्यै सुमङ्गलम्

लतापल्लवमूलान्तस्समुद्भूतैस्सुमैरिव ।
अङ्गुलीयैर्लसन्त्यै स्याद्राज्यलक्ष्म्यै सुमङ्गलम्

मणिबन्धसमुत्कीर्णैरिव रत्नगणाञ्चितैः ।
वलयैः कान्तहस्तायै हेमलक्ष्म्यै सुमङ्गलम्

मुक्तामाणिक्यहीरादिहारोज्वलपयोधरा ।
या राजते जगन्मात्रे तस्यै स्यान्मङ्गलं श्रियै

अभयङ्करहस्तेन वरदेनापि पाणिना ।
प्रदर्शितानुकम्पायै गृहलक्ष्म्यै सुमङ्गलम्

यद्वलग्नात्सितक्षौमकलापो गगनादिव ।
गङ्गाप्रवाहः पतति स्यात्तस्यै मङ्गलं श्रियै

यन्मध्यमं वृतं काञ्चया भातीन्दुकलयेव खम् ।
पद्मनाभप्रियायै स्याच्छ्रियै तस्यै सुमङ्गलम्

यत्पादकमलद्वन्द्वं मणिमञ्जीरमञ्जुलम् ।
कल्पवृक्षायते तस्यै वरलक्ष्म्यै सुमङ्गलम्

यौ नखोस्रमिषाद्गंगां सृजतस्तापहारिणीम् ।
रमायाश्चरणाभ्यां स्यात्ताभ्यां नित्यं सुमङ्गलम् ॥ २२ ॥

विष्णुवक्षस्समारोहादिव शोणतलौ च यौ ।
ताभ्यामंघ्रिसरोजाभ्यां लक्ष्म्यास्स्यान्नित्यमङ्गलम् ॥ २३ ॥

सुपर्वाखर्वकोटीरमणिनीराजितौ च यौ ।
ताभ्यामंबुधिकन्यायाः पादाभ्यां नित्यमङ्गलम् ॥ २४ ॥

किरीटहारकेयूरकाञ्चीकंकणभूषणा ।
ऊर्मिकानूपुराढ्या सा जीयादम्बा हरिप्रिया ॥ २५ ॥

---

## सूर्यनारायणः

यत्प्रसादाद्भवेन्नृणां तेजस्सम्पदरोगता ।
नारायणात्मने तस्मै सवित्रे नित्यमङ्गलम् ॥ १ ॥

---

## हयग्रीवः

शारदेन्दुमयूखाभं शारदाभ्राच्छवाससम् ।
इन्दुतद्भगिनीकान्तं वन्देऽहं हयकन्धरम् ॥ १ ॥

शुद्धेन्दुमण्डलासीनं शुद्धस्फटिकविग्रहम् ।
शुद्धज्ञानप्रदातारं श्रिया वन्दे हयाननम् ॥ २ ॥

स्फाराक्षं प्रस्फुरत्प्रोथं रमाङ्कं शुद्धविग्रहम् ।
चन्द्रस्थमक्षस्रकण्ठं हयग्रीवमुपास्महे ॥ ३ ॥

रजतगिरिनिभाभं पूर्णचन्द्रान्तरस्थं
विशदवसनदीप्रं स्फाटिकाक्षस्रगीक्ष्यम् ।
निगमशिखरवेद्यं शङ्खचक्राब्जपाणिं
हयमुखमुपसेवे सिन्धुजामञ्जुलाङ्कम्

अज्ञाननिबिडध्वान्तमार्तण्डायेन्दुवासिने ।
रमाभिरामवामाय हयास्याय नमोनमः

तुहिनकिरणमध्ये भ्राजमानं रमेशं
स्फटिकशिखरिदेहं ज्ञानमुद्राभिरामम् ।
धवलवसनमम्भोजासनं साक्षमालं
हयवदनमुपासे शङ्खचक्राङ्कपाणिम्

कलानिधिमयूखाभसटाभारोच्चलत्कलः ।
स्फारेक्षणो रमापाङ्गी वाजिवक्त्रः पुनातु नः

यस्य प्रोथःप्रचलनगलत्पूतपाथःपृषद्भिः
सिक्तो मूढोऽप्यमलगुणभाग्गीष्पतिर्भाति मर्त्यः ।
वामाङ्कस्थस्फुटकमलभाग्भार्गवीवीक्ष्यमाणः
सोऽयं विद्यां वितरतु शुभां वाजिवक्त्रः कृपालुः

सितांशुमण्डले स्थितं सितं सिताम्बुजासनं
स्फुरत्सिताक्षमालकं सितांशुकोज्ज्वलाङ्गकम् ।
हयाननं श्रिया युतं सशङ्खचक्रपुस्तकं
नमामि तं नतादितेयसेवितांघ्रिपङ्कजम्

यदपाङ्गलवापाताद्विद्यावीचिपरम्पराः ।
मर्त्याद्रेः प्रस्रवन्त्याशु तं नमामि हयाननम्

शङ्खचक्रधरं चन्द्रमण्डलान्तस्स्थितं श्रिया ।
सिताब्जविष्टरासीनं हयग्रीवमुपास्महे

शुभ्राभ्रसन्निभतनुस्सितपद्मपीठः
    शङ्खी सितांशुनिलयस्स्फटिकाक्षमालः ।
चक्री रमामृदुकटाक्षकृतात्मतुष्टिः
    ज्ञानं ददातु नमते हयकन्धरोऽयम् ॥ १२ ॥

कौमुदीविशदविग्रहश्श्रिया पुण्डरीकमृदुलासनो विधौ ।
आवसन् जयति वाजिकन्धरः शङ्खचक्रधवलाक्षमाल्यवान् ॥ १३ ॥

इन्दिरासुन्दरं चन्द्रबिम्बालयं
    कौमुदीपाण्डरं शारदाभ्राम्बरम् ।
वेदमौल्याश्चितं वेधसा वन्दितं
    कन्धरासैन्धवं ज्ञानदं तं भजे ॥ १४ ॥

हयाननं दयानिधिं धियां प्रभुं भयापहम् ।
सितांशुकं सितांशुगं रमापतिं नमामि तम् ॥ १५ ॥

यदलाभान्नरो लोके पशुतां याति गर्हितः ।
तां विद्यां ददते भूयाद्धयग्रीवाय मङ्गलम् ॥ १६ ॥

---

## श्रीवराहः

घुर्घुरध्वाननिर्भिन्नशत्रुः पोत्रधुताम्बुधिः ।
सत्रगात्रो महापोत्री त्रस्तान्नस्त्रायतां भवात् ॥ १ ॥

उत्क्षिप्यार्रिं धरागोलं दंष्ट्रया भगवान् किटिः ।
घुर्घुरध्वाननिर्धूतश्रितपापः पुनातु नः ॥ २ ॥

जले मग्नां भुवं श्रीश ! पोत्रीभूत्वा समुद्धरन् ।
कथं वा क्व स्थितो नाथ ! हन्त ते सर्वशक्तता ॥ ३ ॥

महावराहरूपभाग्वसुन्धरां पयोनिधौ
उदस्य शुभ्रदंष्ट्रया निमज्जितां शिताग्रया ।
निहत्य दानवं श्रमप्रमार्जनाय मेदिनीं
उदूढवान्मनोहरस्वरूपमुग्धचेष्टिताम् ॥ ४ ॥

मेदिनीतनुसंस्पर्शसुखवश्यतयेव यः ।
स्तब्धरोमत्वमापन्नस्तस्मै स्याद्दंष्ट्रिणे नमः ॥ ५ ॥

पुरुषोत्तमोऽपि निजभक्तरक्षणे
कृतधीर्वराहतनुमप्यवाप्य तम् ।
असुरं निहत्य शितदंष्ट्रया धरां
जलधेरुदस्य समरक्षदाश्रिताम् ॥ ६ ॥

कृत्वा कर्दमितं सिन्धुं स्फीतकायप्रवेशनात् ।
क्रोडरूपी रमानाथ! भुवाश्लिष्टो ननन्दिथ ॥ ७ ॥

घुर्घुररवनिर्घातस्फुटितायतविपक्षवक्षास्त्वम् ।
प्रकटितकटुकिटिरूपो धरणिधरोऽभू रिरक्षया शार्ङ्गिन् ॥ ८ ॥

शारदाभ्रनिभपोत्रदंष्ट्रया कल्पसागरजलान्तरस्थिताम् ।
मेदिनीमुदवहद्य आदरात् तं नमामि सवनात्मकं हरिम् ॥ ९ ॥

घुर्घुरनिर्घातस्ते घनदुरिततिमिरनिकरपरिभेत्ता ।
सूते ज्ञानसुधांशुं पोत्रिन्! विवेकचन्द्रिकाकान्तम् ॥ १० ॥

वाराहीं तनुमाश्रित्य पारावारधराधरः ।
नारायणो हरत्वस्मत्क्रूराराततिमो महान् ॥ ११ ॥

भूगोलत्रिगुणाकारं तन्वन्नब्धिश्च पल्वलम् ।
दंष्ट्रयोद्धृत्य यो धात्रीं रेजे पोत्री स पातु नः ॥ १२ ॥

वाराहीं तनुमधिगम्य दंष्ट्रया यो
धात्रीं तां प्रलयपयोनिधौ निमग्नाम् ।

उद्धृत्य श्रमहरणाय रत्नगर्भा
आश्लिष्य प्रमुदितमानसस्स जीयात् ॥ १३ ॥

घोणी घृणी घनश्यामो घनरोमाघघातुकः ।
घुर्घुरैर्घूर्णितामित्रो जङ्घालयतु नस्तमः ॥ १४ ॥

धरोद्धाराय भूदाररूपिणे ज्ञानदायिने ।
यज्ञवस्तुप्रतीकाय विष्णवे नित्यमङ्गलम् ॥ १५ ॥

---

## श्रीनृसिंहः

स्थानं कालं क्रमं रूपमविचार्यारिनाशकृत् ।
भक्ताय स्तम्भडिम्भोऽभूद्यस्तं नरहरिं भजे ॥ १ ॥

योगासनसुखासीनं दयार्द्रायतलोचनम् ।
जानुशायिभुजद्वन्द्वं श्रीनृसिंहमहं भजे ॥ २ ॥

स्फुरन्नेत्रमहाज्वालालीढशत्रुबलो हरिः ।
नरकण्ठीरवः पातु प्रह्लादमिव नः प्रभुः ॥ ३ ॥

स्फूर्जथुध्वाननिर्भिन्नप्रत्यर्थिस्फीतवक्षसम् ।
प्रह्लादह्लादने दक्षं नृपिङ्गाक्षमुपास्महे ॥ ४ ॥

सुदृढपरमभक्तिप्रोक्तबालोक्तितुष्टः
विदलितदृढदीर्घस्तम्भसंरम्भजातः ।
नखरशिखरदीर्णक्षीबदैत्येन्द्रवक्षाः
समवतु नरसिंहः पापिनोऽस्मान् कृपालुः ॥ ५ ॥

कठोरनखरावलिप्रकटितात्मचक्रायुध-
क्रियस्सुवनमालिकास्थललसत्सिरामालिकः ।

तनोतु नरकेसरी रुधिरचन्दनस्स्तम्भजो
हिरण्यकशिपुं द्विधा विदलयन्भुवो मङ्गलम्

पिङ्गरकेसरजालं शिरसि तु कण्ठीरवं काये।
नरमरिदारणनखरं वन्देऽहं स्तम्भसम्भूतम्

उद्रिक्तरक्तनेत्रान्तश्शत्रुशोणितभाक्सटः।
भक्तरक्षाक्षमाक्षो नृहर्यक्षो रक्षतु श्रितान्

स्तम्भोद्भवेन वात्सल्यं भक्ते बाले प्रकाशयन्।
योऽहन्विपक्षं तस्मै स्यान्नरसिंहाय मङ्गलम्

---

## सीता

जगन्मातापि शक्तापि रामच्छायानुवर्तिनी।
प्राकाशयद्या स्त्रीधर्मं सा जीयाज्जानकी सदा

---

## श्रीरामः

जीयाद्दाशरथी रामो घनश्यामो धनुर्धरः।
हनूमत्सेवितांघ्रिश्श्रीसीतया लक्ष्मणेन च

जगद्धिताय सवितुः कुले जातो रघूद्वहः।
रामश्श्रीजानकीजानिः पातु नः पुरुषोत्तमः

श्रितानां रक्षार्थं दशरथसुतस्सन् भुवि हरिः
गृहीत्वा सीतायाः करमथ पितुर्वाचि निरतः।
महारण्ये सीताविरहविकलो वानरसखो
जघानामित्रं यो मुनिभिरभिषिक्तस्स जयति

दुष्टान्विनाश्य शिष्टानां रक्षणाय रघूद्वहः ।
अभिषिक्तो मुनिश्रेष्ठैरयोध्यायां विराजते ॥ ४ ॥

सर्वेश्वरोऽपि मेदिन्यां मानुषत्वं प्रकाशयन् ।
रामो राज्येऽभिषिक्तोऽभूत्संक्षोभापचिकीर्षया ॥ ५ ॥

मानुषत्वं समाश्रित्य जातो रघुकुले हरिः ।
लोकाभिरामरूपश्री रामो जयतु सीतया ॥ ६ ॥

जयति रघुवरेण्यस्सीतया लक्ष्मणेन
श्रितजनभवतापापोहनस्फीतचन्द्रः ।
निबिडनवपयोदश्यामलो मङ्गलाङ्गः
स्फुटसरसिजनेत्रो रामभद्रो धनुष्मान् ॥ ७ ॥

रमन्ते योगिनो यस्मिन् यश्च योगिहृदालयः ।
जानक्या मोदमानं तं रामचन्द्रं नमाम्यहम् ॥ ८ ॥

आश्रितार्तिनिहन्तारं कल्याणगुणभाजनम् ।
प्रपद्ये शरणं रामं सीतालक्ष्मणसेवितम् ॥ ९ ॥

द्वन्द्वानुभूतिमिह चेतनसंविभक्त्या
साक्षात्स्वयं समधिगम्य परीक्ष्य पश्चात् ।
तन्नाशनाय स भवान् किमु रामभद्रः
पद्मापते ! दशरथस्य सुतो बभूव ॥ १० ॥

श्रीरामनाम जगति प्रथितं पवित्रं
दाक्षायणीदयितजप्यमभीष्टदञ्च ।
श्रीजानकीहृदयसारसहासमित्रं
ध्यायामि मारुततनूजमनोविहारि ॥ ११ ॥

श्रीरामचन्द्र ! करुणालय ! दिव्यमूर्ते !
भक्ताघघस्मरदृढव्रतनामधेय ! ।
सीतापते ! पवननन्दनसेव्यपाद !
नीलाम्बुदाभ ! कमलाक्ष ! नमो नमस्ते

सीताविलोचनशिखावलकालमेघं
हंसं प्रभञ्जनतनूभवमानसेऽपि ।
श्रीलक्ष्मणात्मसरसीरुहचित्रभानुं
लोकाभिराममिह राममहं नमामि

रक्षःप्राणजगत्प्राणचूषणैकफणीश्वरः ।
श्रितसन्तापजीमूतः पातु सीताप्रियो जगत्

नीलाम्बुदाभमरविन्ददलायताक्षं
कोदण्डिनं जनकजापरिसेव्यमानम् ।
सौमित्रिपार्श्वममलेन्दुमुखञ्च रामं
भक्ताञ्जनेयकरपादमहं नमामि

सीतासितेतरदृगीक्षातिनीलतनुमालोलकुण्डलधरं
शेषावतारवरसौमित्रिसेवितपदाम्भोजयुग्मसुभगम् ।
श्रीराग्रगण्यवरभक्ताञ्जनासुतविशुद्धात्मवेश्मवसतिं
रामं दयानिधिममेयात्मसद्गुणमहं नौमि नम्रशिरसा

आजानुबाहुमिह कोसलजापवित्र-
गर्भाम्बुधौ कृतजनिं रघुवंशवीरम् ।
रामं दयानिधिमहं शरचापपाणिं
भक्त्या नमामि सततं सह सीतया तम्

## हनुमत्कृतश्रीरामस्तुतिः

परात्परोऽपि श्रीराम! मर्कटं चञ्चलात्मकम्।
अङ्गीचकर्थ दासं मां तद्धन्योऽस्मि दयानिधे! ॥ १ ॥

क्वाप्यटन्तं वने राम! मृगयन्मां मदन्तिकम्।
उपागम्य भवद्रूपं मह्यं दिव्यमदर्शयः ॥ २ ॥

क्वाहं शाखामृगो राम! क्व भवान् पुरुषोत्तमः।
मत्स्कन्धतलमारुह्य पूतमात्मानमातनोः ॥ ३ ॥

शौचाचारानपेक्षस्त्वं भक्तिक्रीतोऽसि राघव!।
यत्फलं शबरीदत्तं भुक्त्वाभूस्सुहितोऽनघ! ॥ ४ ॥

गणयन्मां रघूत्तंस! वस्तुत्वेन करे मम।
मुद्राङ्गुलीयकं दत्वा प्राहिणोर्जानकीं प्रति ॥ ५ ॥

सीतावृत्तान्तहर्त्रा यन्मया ते रघुपुङ्गव!।
मुखोल्लासोऽभवच्छ्रीमन्! धन्यधन्योऽस्म्यकिञ्चनः ॥ ६ ॥

यदर्थं योगिनो नित्यं भजन्ति त्वां जितेन्द्रियाः।
त्वदालिङ्गनतो राम! स मोदोऽधिगतो मया ॥ ७ ॥

मादृशोज्जीवनार्थं त्वं सीताकारणतोऽनघ!।
अद्भुतं जलधौ राम! पूतं सेतुमकारयः ॥ ८ ॥

धन्योऽहमभिषिक्तेन त्वदानन्दाश्रुचक्षुषा।
कण्ठाश्लेषितमुक्तालिर्यत्कृतोऽस्मि रघूत्तम! ॥ ९ ॥

# तारकरामायणम्

भगवानपि पुण्डरीकदृक् श्रीपतिरत्यद्भुतवैभवोऽपि भूमौ ।
प्रकृतिप्रभुताप्रकाशनाय स्वयमास्ते तदधीन एव मर्त्यः ॥ १ ॥

जगदेकगुरुस्स्वयं रघूणां कुलदीपः कुशिकात्मजानुयायी ।
गुरुरेव समस्तभाग्यदायीत्यवनौ दर्शयति स्म साधु शार्ङ्गी ॥ २ ॥

शिवचापविभञ्जनात्तसीतामृदुपाणिग्रहणो रघूद्वहोऽयम् ।
प्रकटीकुरुते स्म सर्वशक्तो निजवर्णोचितकर्मणः फलं हि ॥ ३ ॥

युवराजपदान्तरायमुक्तस्वपुरो दाशरथिर्वनं प्रयातः ।
पिशुनेषु सुदूरवर्जनीया स्थितिरित्यादिशति स्म तातभक्तः ॥ ४ ॥

विपिने कृतचित्रकूटवासो ऋषिभिस्सेवितपादपङ्कजोऽयम् ।
व्यसनेषु कृती यथोचितात्मस्थितिसौख्यो हि भवेदितीव शंसन् ॥

भरतार्पितपादुको नरेशो दृढसङ्कल्पवशीकृतात्मभक्तः ।
न कदाप्यवकीर्णितां भजेतेत्यनुशास्ति स्म हि सङ्कटेऽपि धीरः ॥

कनकाजिनयोनिमोहितात्मा हरिणाक्षीरहितो निहत्य तञ्च ।
विलपन्विधिवश्यता जनानामनिवार्येत्यवनावबोधयद्धि ॥ ७ ॥

कपिसख्यनिराकृतात्मदुःखो हनुमल्लब्धसुवल्लभाप्रवृत्तिः ।
वनतिर्यगपि स्वधर्मभाजो ह्युपकारीति स शंसति स्म कृच्छ्रे ॥ ८ ॥

उपसत्तिपराङ्मुखे प्रसन्ने धृतदण्डेन कृतोऽम्बुधौ च सेतुः ।
सदुपायसमुद्धतोऽपि दण्डैरनुकूलो भवतीति दर्शितं हि ॥ ९ ॥

हत्वा रावणमाहवे सह बलैस्सीतासमेतो मुदा
साकेतं समुपागतो रघुपतिश्श्रीपुष्पकेण द्रुतम् ।
अण्डानामधिपोऽपि तातमततस्तत्राभिषिक्तोम्बुभिः
पुण्यैस्तापससेवितश्चिरमवेद्भूमण्डलं धर्मतः ॥ १० ॥

# श्रीराममङ्गलम्

सुराणां भूसुराणाञ्च वाञ्छापूरणतत्परः।
कौसल्यातनयोऽभूद्यस्तस्मै रामाय मङ्गलम् ॥ १ ॥

कौशिकाध्वररक्षार्थं पित्रा सम्प्रेषितो वनम्।
योऽरक्षत्सानुजस्तत्र तस्मै रामाय मङ्गलम् ॥ २ ॥

अहल्यापूजितो वीरो भङ्क्त्वा शैवशरासनम्।
योऽग्रहीज्जानकीपाणिं तस्मै रामाय मङ्गलम् ॥ ३ ॥

आकृष्य भार्गवाच्छक्तिं साकेतं प्राप यो मुदा।
सभार्यस्सानुजः पित्रा तस्मै रामाय मङ्गलम् ॥ ४ ॥

स्वाभिषेकविघातार्तं कैकेयीर्ष्यापनुत्तये।
त्यक्त्वा तातं वनं योऽगात्तस्मै रामाय मङ्गलम् ॥ ५ ॥

गुहद्रोण्या समुत्तीर्णगङ्गो मङ्गलविग्रहः।
चित्रकूटविहारी यस्तस्मै रामाय मङ्गलम् ॥ ६ ॥

भरताय वितीर्णात्मपादुको भक्तवत्सलः।
तापसैस्सेव्यमानो यस्तस्मै रामाय मङ्गलम् ॥ ७ ॥

ततः पञ्चवटीं प्राप्य जटायुसहितोऽनघः।
यश्च शूर्पणखाशास्ता तस्मै रामाय मङ्गलम् ॥ ८ ॥

एक एव निहन्ता यः खरदूषणयोस्तथा।
त्रिशीर्षस्य महावीरस्तस्मै रामाय मङ्गलम् ॥ ९ ॥

सीताविरहसन्तप्तो विलपन् यो जटायुषे।
सद्गतिं प्रददौ तस्मै रामभद्राय मङ्गलम् ॥ १० ॥

शबर्या योऽर्पितं भोग्यं विघसं फलमादरात् ।
भुक्त्वाभूत्सुहितस्तस्मै रामचन्द्राय मङ्गलम्

पम्पातीरविलापी यो हनुमत्साह्वतो बली ।
सुग्रीवसख्यपुष्टोऽभूत्तस्मै रामाय मङ्गलम्

सप्तसालविभेत्ता यो वालिवारणकेसरी ।
सुग्रीवार्पितराज्योऽभूत्तस्मै रामाय मङ्गलम्

संप्रेष्य वानरान्दिक्षु सीतान्वेषणतत्परान् ।
हनूमन्न्यस्तमुद्रो यस्तस्मै रामाय मङ्गलम्

उल्लङ्घिताब्धिनानीतं चूडारत्नं हनूमता ।
विलोक्य बाष्पदिग्धो यस्तस्मै रामाय मङ्गलम्

अभिषिच्याथ तं नम्रं विभीषणमरिन्दमम् ।
तन्मताद्बद्धसेतुर्यस्तस्मै रामाय मङ्गलम्

सेतुनासाद्य लङ्कां यो मार्गणैर्युधि कोणपान् ।
प्राणैर्वियोजयामास तस्मै रामाय मङ्गलम्

विमानेनागतो भक्तं भरतं सान्त्वयन्मुदा ।
प्राप यस्स्वपुरं पत्न्या तस्मै रामाय मङ्गलम्

सिंहासनसमारूढो वसिष्ठप्रमुखैर्द्विजैः ।
अभिषिक्तस्ससीतो यस्तस्मै रामाय मङ्गलम्

पूर्वाचार्यकृतैश्चैव मङ्गलैरभिनन्दितः ।
अरक्षद्यश्चिरं राज्यं तस्मै रामाय मङ्गलम्

## श्रीकृष्णः

देवकीवसुदेवान्तःक्लेशध्वान्तापनोदनः ।
आविरासीद्विधुश्श्रीमान् कृष्णाख्यो बन्धनालये ॥ १ ॥

पिञ्छावतंसमंसाञ्चत्काञ्चनाम्बरमच्युतम् ।
स्वभासा सूतिकागेहं भासयन्तं नमाम्यहम् ॥ २ ॥

जातोऽसि साधुरक्षार्थं गोकुले गोभिराकुले ।
माधवार्घ्यमिदं दुग्धं वासुदेवाय तेऽर्पितम् ॥ ३ ॥

चौर्ये क्षीरपृषत्सिक्तं नक्षत्रैरिव सत्पथम् ।
भासमानमहं वन्दे नन्दनन्दनमच्युतम् ॥ ४ ॥

मुरलीवादनानन्दमुग्धभ्रूजिह्मचित्रकम् ।
श्रितमन्दारसच्छायं वन्देहं नन्दनन्दनम् ॥ ५ ॥

रुक्मिणीसत्यभामादृक्कटाक्षद्युतिमज्जितः ।
आनन्दयतु नन्दस्य नन्दनो मन्दिरेऽत्र नः ॥ ६ ॥

पीताम्बरो मकुटमौलिरनल्पफालः
श्रीपुण्डरीकनयनो धृतशङ्खचक्रः ।
कान्त्या प्रसूतिगृहमुज्ज्वलयन् श्रितानां
भद्राय नीलतनुराविरभून्मुकुन्दः ॥ ७ ॥

विश्वम्भराभाग्यवशात्स्वभूस्स्वयं
क्षीराब्धितश्श्रीमधुरामुपेयिवान् ।
आविर्बभूवाम्बुजपत्रलोचनः
पीताम्बरश्चक्रगदाब्जशङ्खभृत् ॥ ८ ॥

मौग्ध्यमुद्गारयन्नेत्रपद्माभ्यां मधुराधरम् ।
कटिन्यस्तकरः पायादाश्रितान्नन्दनन्दनः ॥ ९ ॥

मुग्धेक्षणं कुटिलकुन्तलमानतभ्रू-
कान्तं कनत्कनकवाससमुन्नसं तम् ।
पञ्चायुधं घनरुचिं शिशुभावमुग्धं
कृष्णं मुदाददृशतुः पितरौ निबद्धौ

नन्दानन्दबृहत्कन्दमिन्द्रेष्टहरिचन्दनम् ।
इन्दिरासुन्दरं वन्दे बृन्दावनमदावलम्

ताण्डवावर्जितानेकगोपिकाजनमानसम् ।
नवनीतकरं वन्दे घनाभं नन्दनन्दनम्

पूतनास्फीतवक्षोजकुम्भपीतविषोज्ज्वलः ।
रुदन्नाश्वासितो मात्रा नः पुनातु शिशुर्हरिः

ऊधस्स्रवत्पयोमुग्धो धेनुरक्षणतत्परः ।
वन्यपुष्पपरिष्कारः कृष्णो रक्षतु नस्सदा

भुक्त्वान्नं प्रस्थितो गेहात्पुष्पगुम्भनतत्पराः ।
बालिकाः प्राप्य मालां तां याचमानोऽसि वारितः

कालिन्दीपूरमासाद्य घनश्यामलविग्रहः ।
गोपीः प्रतारयन्मज्जन् नः पुनातु स माधवः

वृक्षादुत्प्लुत्य बालोऽस्याप्यवलोड्य विषह्रदम् ।
कृतसर्पशिरोनृत्यो गर्वं हरतु नस्स्वभूः

भीष्मबाणव्रणार्तो यद्रयादुत्प्लुत्य चक्रभृत् ।
तं जिघांसू रुषा धावन् कृष्णो रक्षतु नः प्रभुः

चेदिराजं सदानिन्दापरं कण्ठे विलूय यः ।
अनयत्स्वपदं सोऽस्मद्भवबन्धं लुनात्वयम्

युद्धान्ते स्यन्दनात्पार्थमवतार्य बलाद्भुवि ।
अग्निसादकरोद्यस्तं रथं नः पातु स स्वभूः ॥

नित्यानपायिनीं यस्तामपहृत्यात्र रुक्मिणीम् ।
उपयेमे मुदा तस्मै कृष्णायास्तु सुमङ्गलम् ॥ २१ ॥

रुक्मिणीसत्यभामाभ्यां स्वर्णन्यस्तेन्द्रनीलवत् ।
यो भाति घननीलाङ्गः तस्मै कृष्णाय मङ्गलम् ॥ २२ ॥

सौलभ्यं दर्शयन् श्रीमान् यशोदायाः प्रचोदितः ।
दाम्नोदरे निबद्धो यस्तस्मै कृष्णाय मङ्गलम् ॥ २३ ॥

नवनीताय यो नित्यं नृत्यति स्म गृहे गृहे ।
गोपगोपीप्रियाय स्यात्तस्मै कृष्णाय मङ्गलम् ॥ २४ ॥

---

## श्रीरङ्गनायिका

श्रीरङ्गकल्पवल्लीं तां जगन्मङ्गलदीपिकाम् ।
रङ्गिहृत्कमलावासां वन्दे श्रीरङ्गनायकीम् ॥ १ ॥

भ्रूभङ्गकारितजगत्त्रयसारभूते
श्रीरङ्गदिव्यनगरे कृतनित्यवासा ।
पापीयसामपि विलोचनदृश्यरूपा
श्रीरङ्गराजमहिषी मनसीयुषी स्यात् ॥ २ ॥

श्रीरङ्गे वासरसिका विष्णुवक्षस्स्थले यथा ।
लोकावनाय माता श्रीर्जीयाद्रङ्गेशवल्लभा ॥ ३ ॥

श्रीरङ्गरङ्गरसिकापि च काञ्चनाश्म-
काञ्चीप्रकाशिततनुस्सरिदीशकन्या ।

।चलाच्छहृदयावसथावलम्बा
सम्पत्सुतापहरणप्रवणास्तु सा मे ॥ ४ ॥

श्रीरङ्गं रङ्गमापाद्य जगद्रङ्गप्रवर्तिनी।
पत्या या क्रीडति प्राज्ञी तस्यै स्यान्मङ्गलं श्रियै ॥ ५ ॥

कारुण्यमूर्तिः कमनीयगात्री विलोलनेत्रप्रवणाच्युताक्षी।
श्रीरङ्गरङ्गाङ्गणलासकी श्रीः पुनातु पापान् मधुरैः कटाक्षैः ॥६॥

श्रीरङ्गदीपकलिका श्रितकल्पवल्ली
श्रीरङ्गराजमहिषी वितनोतु भद्रम्।
यस्याः कटाक्षलहरी चिरदुर्गतानां
दौर्गत्यनोदनचणा विलसत्यमोघा ॥ ७ ॥

श्रीरङ्गनायकीं वन्दे श्रीरङ्गाम्बरतारकाम्।
यद्वीक्षेन्दुकलेवारात् शिशिरीकुरुते जगत् ॥ ८ ॥

श्रीरङ्गनाथदयिते! ननु ते कटाक्षं
पुत्राविशेषतनुमस्तु समानरीत्या।
सम्पातयेर्यदि तदा कथमत्र सर्वे
निम्नोन्नतस्थितिजुषो वद जन्तवस्स्युः ॥ ९ ॥

रङ्गिणमपाङ्गभङ्ग्या मङ्गलरिङ्गत्तरङ्गिणं कमलाम्।
सङ्गमयन्तीं जङ्गमभङ्गुरताभङ्गिनीं वन्दे ॥ १० ॥

श्रीरङ्गरङ्गतटमङ्गललासकी या
दैत्यारिमानससरश्चरराजहंसी।
दारिद्र्यसान्द्रतिमिरोज्ज्वलचन्द्रिका या
श्रीरंगराजमहिषीं समुपास्महे ताम् ॥ ११ ॥

## श्री श्रीनिवासः

श्रीरङ्गनायकि ! तव क्वणदंघ्रिपद्म-
मञ्जीरमञ्जुलरवः क्षणमात्रमेव । ॥
यत्राविरस्ति गजवाजिरवोऽपि तत्र
प्रादुर्भवत्यनुदिनं किमिदं विचित्रम् ॥ १२

---

## पद्मावती

मङ्गलानां निधिर्मुग्धा श्रीनिवासानुवर्तिनी ।
पावयन्ती दृशा मर्त्यान् जीयात्पद्मावती सदा ॥ १ ॥

भ्रूलताचालनेनैव द्वन्द्वात्मकमिदं जगत् ।
क्रीडार्थं कारयन्त्यै स्यात्पद्मावत्यै सुमङ्गलम् ॥ २ ॥

पद्मावतीति विख्याता श्रीनिवासप्रिया च या ।
पद्मावासा जगद्वन्द्या तस्यै स्यान्मङ्गलं श्रियै ॥ ३ ॥

---

## श्री श्रीनिवासः

द्रव्यमूलानि पापानि हरन्नहिमहीधरे ।
योऽनुगृह्णाति मर्त्यांस्तं श्रीनिवासमुपास्महे ॥ १ ॥

पटीरोशीरकाश्मीरजन्मकर्पूरवासितैः ।
तीर्थैश्श्रियाभिषिक्तश्श्रीवेङ्कटेशो जयत्वसौ ॥ २ ॥

शङ्खचक्राङ्कितश्श्रीमान् भाष्यकारस्य शिष्यताम् ।
भेजे भुजङ्गशैले यश्श्रीनिवासं नमामि तम् ॥ ३ ॥

मधुरस्मितमात्रेण कृताश्वासमिव श्रिया ।
अङ्कितोरस्स्थलं देवं श्रीनिवासमुपास्महे ॥ ४ ॥

## श्री श्रीनिवासः

प्रदर्श्य यस्त्वीयौ श्रयतेत्यादिशत्यहो।
वासं भजामस्तं प्रयच्छन्तं सदेप्सितम् ॥ ५ ॥

सकलार्थप्रदश्श्रीमान् वेङ्कटाचलमाश्रितः।
भक्तावनैकसक्तात्मा श्रीनिवासो जयत्वयम् ॥ ६ ॥

श्रिया कारुण्यमूर्त्या यस्सिषेवे शयनोत्सवम्।
लोककल्याणदो भूयाद्भगवान्नः श्रियः पतिः ॥ ७ ॥

यत्कटाक्षो जनत्रासमपास्य परिरक्षति।
गम्भीरमुग्धवदनं तं वेङ्कटविभुं भजे ॥ ८ ॥

अस्मद्भाग्यविशेषाद्भि श्रीगवेषणकैतवात्।
वेङ्कटाद्रौ स्थितश्श्रीमन्! रक्षस्यस्मान् कृपापरः ॥ ९ ॥

अहिशैलात्स्वयं साक्षाच्छुश्रूषाङ्गीचिकीर्षया।
अनन्तार्यगृहे स्थास्नुं श्रीनिवासमहं भजे ॥ १० ॥

परात्परोऽपि सुलभश्शेषाद्रिशिखरे मुदा।
यो राजते नमस्तस्मै श्रीनिवासाय मङ्गलम् ॥ ११ ॥

अष्टशक्तिविशिष्टाय शिष्टेष्टार्थप्रदायिने।
दर्शयित्रे प्रपत्तिं स्याद्वेङ्कटेशाय मङ्गलम् ॥ १२ ॥

देवतार्चितपादाब्ज! कल्यघध्वान्तभास्कर!
श्रीनिवास! नमस्तुभ्यं भूयोभूयोऽस्तु मङ्गलम् ॥ १३ ॥

पद्मावतीसमेताय शेषशैलविहारिणे।
सर्वाभीष्टप्रदात्रे स्याच्छ्रीनिवासाय मङ्गलम् ॥ १४ ॥

कलावात्ममहिम्नैव वशीकृत्य जनान्भुवि।
भक्ताभीष्टप्रदात्रे स्याच्छ्रीनिवासाय मङ्गलम् ॥ १५ ॥

---

## श्रीयदुगिरिनायिका

दृग्भ्यां कारुण्यमास्येन शान्तिं मन्दस्मितेन च ।
मुदं विदधतीं वन्दे यदुशैलेशनायकीम् ॥ १ ॥

मन्दस्मितेन वैकुण्ठं वशीकृत्य श्रितान्नरान् ।
तस्मै प्रदर्श्य रक्षन्तीं वन्दे यद्वद्रिनायकीम् ॥ २ ॥

यद्वद्रौ धृतदिव्यमङ्गलतनुर्नारायणप्रेयसी
निस्सीमाद्भुतवैभवा भवभयप्रध्वंसिनी मानिता ।
भक्तेभ्यः प्रवितीर्णसर्वविभवाप्यानम्रवक्त्राम्बुजा
किञ्चिन्नैव वितीर्णमित्यतितरां लज्जाभराद्राजते ॥ ३ ॥

यद्वद्रिनाथदयिता विहिताहिनाशा
कर्मानुयातचिरदैन्यकुठारधारा ।
तीर्थाष्टकोदकपृषत्परिषिच्यमाना
श्रीयादवाचलमणिर्जयतात्स्मितास्या ॥ ४ ॥

मातेव या सकलचेतनवत्सला श्रीः
यद्वद्रिशृङ्गविततोज्ज्वलदीपमाला ।
नारायणे पुरुषकारपरा सलीलं
तामिन्दिरां शरणमेमि सरोजपीठाम् ॥ ५ ॥

---

## सम्पत्कुमारस्य श्रीभुवौ नायिके

किलिकिञ्चितनम्रास्या कराम्बुजभरादिव ।
लम्बिवामप्रवेष्टा श्रीर्नः पातु कमलेक्षणा ॥ १ ॥

वन्द्ये अपि स्वयं लोकसंग्रहायैव चक्रतुः ।
कल्याण्याः श्रीभुवौ पूजां कल्याणस्नानभूषणे ॥ २ ॥

मातृगेहं जिगमिषू श्रीभुवौ भूषणाञ्चिते ।
स्तोकस्मितमुखाब्जे ते विराजेते लते इव ॥ ३ ॥

## यादवाद्रिश्रीनारायणः

यादवाद्रिमहासानौ तटित्वानिव नीलरुक् ।
श्रिया नारायणो युक्तो रक्षत्वस्मान् कृपारसः

यादवाद्रिशिरश्श्रञ्चच्छीतलामृतघृष्टये ।
नमो नारायणायास्तु कमलाकलितोरसे

परत्वमपि सौलभ्यं दर्शयन्यदुभूधरे ।
नारायणो विशालाक्षो राजते पञ्चहेतिभाक्

धन्योऽस्म्यानन्दपाथोधिमग्नोस्म्यम्बुजलोचनम् ।
यादवाद्रौ यदद्राक्षं श्रीनारायणमुत्स्मितम्

---

## यादवाद्रिश्रीसम्पत्कुमारः

श्रीभूविमर्दसंस्तब्धगात्रं सम्पत्सुतं भजे ।
वल्लीद्वयसमारूढं कल्पवृक्षमिवार्थदम्

श्रीभूकटाक्षकबलीकृतवक्त्रचन्द्रो
मन्दस्मितप्रकटितात्मगभीरभावः ।
रामानुजार्यतनयश्श्रितवत्सलोऽयं
सम्पत्सुतो वितरतु श्रियमाश्रितेभ्यः

श्रीभूदृगन्तरश्मिभ्यां कृष्यमाण इवाचलः ।
द्विकलत्रस्थितिं शंसन् सम्पत्पुत्र ! स्थितोऽसि किम् ?

लक्ष्मीसेवितपादाय शङ्खचक्रगदाजुषे ।
मन्दस्मितसुमुग्धाय नमस्सम्पत्सुताय ते

मकुटहीरमणिप्रभया कनत्कनकमण्डलसिंहमुखद्वयः ।
गरुडवाहनपाणिकृतांघ्रिको यतिसुतो विलसत्युभयाङ्गनः

बालवन्मौग्ध्यगम्भीरो भक्तैराह्वानितो हसन् ।
लक्ष्मणार्यसुतश्श्रीमान् मण्टपेषु विराजते ॥ ६ ॥

सारथ्येन पुरा श्रान्तस्सम्पत्सुत ! रथी भवन् ।
सदारोऽद्य कनद्भूषो रथे नटसि किं कलौ ॥ ७ ॥

बलराममुकुन्दाभ्यां नारायणपुरोऽर्चितः ।
सम्पत्सुतस्तथाद्यापि यद्वद्रौ परिदृश्यते ॥ ८ ॥

पट्टाभिषेकोचितदिव्यभूषः
सम्पत्कुमारो रघुपुङ्गवाख्यः ।
ब्रह्मोत्सवान्तावभृथे रराज
यद्वद्रिशृङ्गे श्रितरक्षकस्सन् ॥ ९ ॥

अनिरुद्धकिरीटमम्बुजाक्षो
निजमौलावुभयोस्तु पार्श्वयोस्ते ।
कमलाधरणी दधद्वरुत्म-
द्गमनः पातु यतीशसूनुरस्मान् ॥ १० ॥

---

## गुरुवायुपुराधीशः

गुरुवायुपुरेश ! वासुदेव !
प्रणतार्तिप्रशमैकबद्धदीक्ष ! ।
शरणागतवत्सलत्वमर्चा-
कृतिमेत्य प्रकटीकरोषि कृष्ण ! ॥

---

## जनार्दनः

जनार्दनोऽपि सन्तानसन्तानो यश्श्रियःपतिः ।
माण्डव्यक्षेत्रवासाय तस्मै स्यान्नित्यमङ्गलम् ॥

## बिन्दुमाधवः

कल्याणं कलयतु बिन्दुमाधवोऽयं
कल्याणीप्रथ ततटे वसन् श्रितानाम् ।
यन्नामस्मरणविधूतपापवर्गाः
मोदन्ते भुवि मनुजा विशुद्धभावाः ॥

## कल्याणाख्यद्वारपालः

लोककल्याणकृच्छ्रीमान् कल्याणात्मा कलामहान् ।
तत्वोपदेशसक्तात्मा जीयात्सोऽयं दयामयः ॥

## निरसनाख्यद्वारपालकृतप्रार्थना

गुरवस्सरोरुहनिभेक्षणे हरौ
वितरन्तु भक्तिमितरानपेक्षिणीम् ।
समरात्तसाध्वसमपोहतु स्वभूः
सकलाः प्रजाश्च मुदिता भवन्त्विह ॥

## हेतिराजः श्रीसुदर्शनः

ज्वलज्ज्वालाकरालाग्रधारात्तारातिकन्धरः ।
वन्दारुजनमन्दारश्चक्रराजो विराजते ।
नाभिस्फुलिङ्गकिञ्जल्कं नेमिज्वालोज्ज्वलच्छदम् ।
नारायणकराम्भोजं पुनात्वस्मान् सुदर्शनम्

गरुडध्वजाग्रकरसम्भ्रमभ्रमत्
सुरवैरिकण्ठरुधिराङ्गरागवत् ।
निजभक्तबृन्ददुरितौघघस्मरं
प्रणमामि चक्रमघकृन्तनाय मे

स्फुरत्स्फुलिङ्गज्वलनज्वालामालातिभासुरः ।
मुकुन्दतर्जनीलोलश्चक्रराजो जयत्वयम् ॥ ४ ॥

कनत्किरीटभासुरं नमत्सुरेशभूसुरं
निकृत्तदैत्यकन्धरं ज्वलत्कृशानुबन्धुरम् ।
मुकुन्दपाणिमन्दिरं सुशोणचेलसुन्दरं
स्वकीयसौम्यदर्शनं नमामि तं सुदर्शनम् ॥ ५ ॥

निर्धूताश्रितपाप्मानं निर्द्धूनासुरकन्धरम् ।
निर्णिक्तभासमानारं सुदर्शनमहं भजे ॥ ६ ॥

दोर्दण्डस्फीतदर्पप्रशमितविबुधस्फारभोगान् मदान्धान्
दैत्यान्नारायणेन भ्रमणपरिचलत्तर्जनीचोदितो द्राक् ।
छित्वा कण्ठेषु कोष्णप्रसृमररुधिरक्लिन्नधारो दृढारो
ज्वालामालाकरालो दलयतु दुरितं चक्रराजश्श्रितानाम् ॥ ७ ॥

श्रितक्लेशनिहन्त्रे श्रीविष्णुसङ्कल्परूपिणे ।
जाज्वल्यमानधाराय चक्रराजाय मङ्गलम् ॥ ८ ॥

दीप्रभूषोज्ज्वलाङ्गाय षोडशाद्भुतबाहवे ।
दैत्यासृक्चन्दनाय स्याच्चक्रराजाय मङ्गलम् ॥ ९ ॥

प्रवर्तितजगच्चक्रो विष्णुपाणिनिकेतनः ।
निकृत्तदैत्यचक्रोऽयं चक्रराजो विराजते ॥ १० ॥

---

## अनन्तः

अनल्पसौकुमार्याय तल्पाय कमलापतेः ।
जितेन्द्रियाय शुद्धाय स्यादनन्ताय मङ्गलम् ॥

## श्रीगरुडः

भगवत्सर्वकैङ्कर्यनिष्पादनधुरन्धरः ।
गरुत्मान्मेरुसङ्काशो जयत्याम्नायविग्रहः

नागान्तकोऽमृताहर्ता सत्पथाचारपूजितः ।
दैत्यारातिरिव श्रीमानस्मत्पापं व्यपोहतु

भगवत्सर्वकैङ्कर्यधुरीणं मेरुसन्निभम् ।
वैनतेयमहं वन्दे परतत्त्वप्रकाशिनम्

गरुदुद्गतमरुदाहतपवनाशननिकरः
कनकाचलकनदद्भुतपृथुलोन्नततनुभृत् ।
कमलापतिचरणाहतिपरिनोदनकिणभाक्
परिरक्षतु विनतान्भुवि विनताजठरभवः

श्रियःपतिपदास्फालकिणालङ्कृतवक्षसे ।
आशीविषविभूषाय वैनतेयाय ते नमः

वहन्नपि हरिं तस्य केतने यः प्रकाशते ।
वेदात्मने खगेशाय तस्मै स्यान्नित्यमङ्गलम्

विहायसि विहारभाक्कनकगोत्रगात्रप्रभः
खगाधिपतिरच्युतप्रवहणैकबद्धादरः ।
तटिन्निभगरुद्द्युतिर्गुरुगरुद्धतारिव्रजः
त्रयीमयतनुस्तनोत्वमृतभाक्सदा मङ्गलम्

## श्रीलक्ष्मीदासः

शार्ङ्गी चक्री विधृतमकुटः कुण्डली चोन्नसोऽयं
दंष्ट्री प्रांशुः कमलनयनश्शुभ्रमृत्स्नोर्ध्वपुण्ड्रः।
गाङ्गेयाभो गलचलमहापद्मबीजाक्षमालो
लक्ष्मीदासो वसतु हृदि मे बद्धकौशेयकच्छः ॥ १ ॥

वीरलक्ष्मीपदाम्भोजजीवातुर्यो दयानिधिः।
पूर्वाषाढाजुषे तस्मै लक्ष्मीदासाय मङ्गलम् ॥ २ ॥

वनितातनुभाग्जनमध्यगतः कृपया जनतादुरितानि हरन्।
कमलाचरणप्रवणो गरुडध्वजसैन्यपतिर्भुवि भाति बत ॥ ३ ॥

इन्दिरानेत्रशुक्तिभ्यां पायंपायं कृपारसम्।
तन्मयत्वमिवापन्नं लक्ष्मीदासमुपास्महे ॥ ४ ॥

अज्ञानध्वान्तदिङ्मूढान्निनीषुस्सत्पथं नरान्।
ददाति ज्ञानदीपं यो लक्ष्मीदासं नमामि तम् ॥ ५ ॥

अदृश्यमानरूपोऽपि स्वसङ्कल्पं प्रवर्तयन्।
दयादाक्ष्यक्षमायुक्तो लक्ष्मीदासो जयत्वसौ ॥ ६ ॥

तप्तजाम्बूनदाभो यश्शङ्खचक्रगदायुधः।
रमांघ्रिकिङ्करस्तस्मै लक्ष्मीदासाय मङ्गलम् ॥ ७ ॥

दैत्यारिदत्तमैश्वर्यं बिभ्रते शिरसेव तत्।
किरीटं दीप्ररत्नाढ्यं विष्वक्सेनाय मङ्गलम् ॥ ८ ॥

चतुर्थीचन्द्रचारूर्ध्वपुण्ड्रफालो विराजते।
विवस्वानिव यस्तस्मै लक्ष्मीदासाय मङ्गलम् ॥ ९ ॥

दृग्दण्डचाल्यमानाभ्यां कशाभ्यामिव राजते ।
यो भ्रूलताभ्यां तस्मै स्याद्विष्वक्सेनाय मङ्गलम्

तारकाद्वयमध्यस्थं चन्द्रबिम्बं मुखेन यः ।
द्वेष्टि कुण्डलकान्तेन तस्मै भद्रं रमाजुषे

स्वनाथासनवाल्लभ्यादिव तन्मयतां गते ।
बिभ्रते नयने तस्मै विष्वक्सेनाय मङ्गलम्

नयनाब्जबिसाभेन नासावंशेन हारिणा ।
यो राजते सदा तस्मै लक्ष्मीदासाय मङ्गलम्

अधरोष्ठपुटं धत्ते यो वा विद्रुमसम्पुटम् ।
स्मितकान्ताय तस्मै स्याद्विष्वक्सेनाय मङ्गलम्

द्राक्षाद्वयमिवाधस्स्थं सूक्तिमाधुर्यकांक्षया ।
बिभ्रते चुबुकं मुग्धं लक्ष्मीदासाय मङ्गलम्

पाञ्चजन्यनिभां पुष्टां जीमूतध्वानदायिनीं ।
बिभ्रते कन्धरां वृत्तां विष्वक्सेनाय मङ्गलम्

मांसलस्फीतसुस्निग्धककुद्भ्यामिव राजते ।
अंसाभ्यां यस्सदा तस्मै लक्ष्मीदासाय मङ्गलम्

धैर्यस्थैर्यमहादाक्ष्यशंसि वक्षस्स्थलं महत् ।
बिभ्रते रत्नमालाढ्यं लक्ष्मीदासाय मङ्गलम्

बालातपकनत्सानुरत्नसानुसमत्विषे ।
पीताम्बरवलग्नाय विष्वक्सेनाय मङ्गलम्

मृगेन्द्रमध्यमध्याञ्चत्काञ्चीदाम्ना विभाति यः ।
अहिबद्धाचलप्रख्यस्तस्मै भद्रं रमाजुषे

शरदिन्दुद्युतिस्निग्धमेरुपादनिभप्रभः ।
सितकौशेयकच्छो यस्तस्मै भद्रं रमाजुषे ॥ २१ ॥

सर्वोपसेव्यमानाभ्यामञ्चिताभ्याञ्च हंसकैः ।
भात्यंघ्रिसारसाभ्यां यस्तस्मै भद्रं रमाजुषे ॥ २२ ॥

सर्वशक्तोऽपि कैङ्कर्ये रमायाः प्रह्वतां गतः ।
श्रीशसैन्याधिपश्श्रीमान् जयत्यम्बुजलोचनः ॥ २३ ॥

पुराणदम्पतिस्वान्तमिङ्गितज्ञः प्रवर्तयन् ।
कार्यरूपेण दक्षश्श्रीविष्वक्सेनो जयत्ययम् ॥ २४ ॥

स्मितपूर्वं श्रितान्पश्यन् दिव्येनायतचक्षुषा ।
कृपयाघनिहन्ता श्रीविष्वक्सेनो जयत्ययम् ॥ २५ ॥

सैन्याधिपत्ययोग्येन दिव्यवस्त्रेण मण्डितः ।
श्रीशसेनाग्रगामी श्रीविष्वक्सेनो जयत्ययम् ॥ २६ ॥

विस्मयावहकर्मापि भक्तानां तु वशंवदः ।
श्रीशकैङ्कर्यसक्तात्मा विष्वक्सेनो जयत्ययम् ॥ २७ ॥

दिव्याद्भुतसुवर्णाभप्रांशुसुन्दरविग्रहम्
लक्ष्मीवल्लभसेनेशं विष्वक्सेनं नमाम्यहम् ॥ २८ ॥

तेजसैव दुराचारान् स्थापयन्तं स्वसत्पथे ।
सर्वान्तरायभेत्तारं विष्वक्सेनं नमाम्यहम् ॥ २९ ॥

विशालस्निग्धनेत्राभ्यां पावयन्तं नरान्नतान् ।
दैत्याहिवैनतेयं तं विष्वक्सेनं नमाम्यहम् ॥ ३० ॥

दासभावेन लक्ष्मीशं सेवमानं गुणोज्ज्वलम् ।
चेतनेषु दयापूर्णं लक्ष्मीदासं नमाम्यहम् ॥ ३१ ॥

वैकुण्ठे रमया सार्धं भोगासक्तं हरिं सदा।
यस्तनोति च दास्येन विष्वक्सेनं नमामि तम् ॥ ३२ ॥

वैभवद्योतनायैव सर्वशक्तस्य शार्ङ्गिणः।
सेनाग्रयायिनं वन्दे विष्वक्सेनं कृपाकरम् ॥ ३३ ॥

निजहस्तगतं श्रीशसङ्कल्पमिव मूर्तिमत्।
धरन्तं चक्रमीडे तं विष्वक्सेनं दयानिधिम् ॥ ३४ ॥

मुखोल्लासाय दैत्यारेस्सर्वाङ्गीणविभूषणः।
यस्स्वामिनिष्ठतां शास्ति विष्वक्सेनं नमामि तम् ॥ ३५ ॥

शङ्खचक्रकरश्श्रीमानेतल्लक्ष्मवतां नृणाम्।
भवादभीतिं ब्रूते यो विष्वक्सेनं नमामि तम् ॥ ३६ ॥

विष्णुं जलयतीयं हि मुद्रेत्यञ्जलिमुद्रया।
यश्शंसत्यनभिज्ञानां विष्वक्सेनं नमामि तम् ॥ ३७ ॥

आज्ञामुद्रां दधानो यो विष्णोराज्ञाप्रवर्तनम्।
शंसतीव मनुष्याणां विष्वक्सेनं नमामि तम् ॥ ३८ ॥

एको नारायणः पूज्यः प्राप्यो नान्य इति स्वयम्।
आज्ञामुद्रापदेशेन सूचयन्तं नमामि तम् ॥ ३९ ॥

प्रांशुमब्जविशालाक्षमक्षमालोच्चवक्षसम्।
शङ्खचक्राञ्चितं लक्ष्मीदासमीडे कृताञ्जलिम् ॥ ४० ॥

स्वाश्रितान् करुणादृष्ट्या पश्यन्तं भक्तवत्सलम्।
लक्ष्मीसङ्कल्पकल्पं तं विष्वक्सेनमुपास्महे ॥ ४१ ॥

भगवद्ध्यानसम्मोदं सन्मार्गगमनस्पृहाम्।
वर्धयन्सूक्तिधोरण्या विष्वक्सेनो विभात्यसौ ॥ ४२ ॥

दिव्यरूपोऽपि शान्तात्मा प्रविष्टश्रीतनुर्मुदा ।
ज्ञानदीपप्रदाता श्रीविष्वक्सेनो विराजते ॥ ४३ ॥

सर्वशक्तोऽपि लोकेऽस्मिन् प्रकृत्यनुगुणस्थितिः ।
दर्शयन् प्रार्थनाशक्तिं लक्ष्मीदासो जयत्वसौ ॥ ४४ ॥

प्रवर्तिताच्युतासक्तगोदादिव्यमहोत्सवः ।
विस्मयं जनयन् नृणां विष्वक्सेनो जयत्ययम् ॥ ४५ ॥

गोदाया जनिमहमादरेण विष्णोः
सेनेशो भुवि वरवर्णिनीशरीरे ।
सन्दर्श्य प्रवरगुणं जनेषु तन्वन्
जीयाच्छ्रीचरणसरोजकिङ्करोऽयम् ॥ ४६ ॥

---

## लक्ष्मीदासदण्डकम्

स्फारहीरमकुटाञ्चितं कनत्कर्णकुण्डलमुदग्रनासिकम् ।
मन्दहासमधुराननं श्रियो दासमञ्जलिमनोहरं भजे ॥

जयजय देवदेवचतुरङ्गचमूचयचक्रनिचयविचालनचतुरचञ्चच्चारुविकचलोचनरुचिमरीचिवीचिनिचोलिताशाचतुष्टय ! इन्दिरासुन्दरचरणारविन्दवन्दनकन्दलितविदलितचामीकरतामरसासनपरागरागराजिरञ्जितमणिगणरुचिर - किरीटरुचिमण्डलविडम्बितोद्यन्मार्तण्डमण्डल ! सूत्रवतीकोमलतरकरकिसलयोपलाल्यमानकरकमलोपलालितजातरूपमयोद्दण्डदण्डप्रकटितनियोगवैभव ! निखिलजगन्निदानदानवारिभावगम्भीर सुन्दरनयनपुण्डरीकशैवललेखायमानमनोहरभ्रूलतापरिस्पन्दनसन्दर्शनैकताननिष्पन्दनयनारविन्दवैनतेयकेतनानीकिनीनायकतापिशुनशुनासीरशरासननिकाशकाशमानकमनीयदिव्यवर्मपरि - कर्मितनिर्मर्यादसौन्दर्याकरचामीकररुचिरदिव्यशरीर ! दयापारावारनीरपूर-

तरङ्गितचन्द्रकितनखरपरम्परारुचिरमृदुलतरचरणकिसलययुगलरमारमणरमणी-नयनरमणीयपुण्डरीकवीक्षणैकतान ! देवदेवसेनानायक ! नमस्ते, नमस्ते, पुनस्ते नमः ।

---

## श्री आञ्जनेयः

रामनामबलादेव सर्वशत्रुनिहन्तृताम् ।
लेभे वायुसुतश्श्रीमान् यस्तस्य पदमाश्रये ॥ १ ॥

श्रीरामसम्मदाम्भोधिपूर्णचन्द्रं जितेन्द्रियम् ।
जानकीदिव्यजीवातुं आञ्जनेयं भजाम्यहम् ॥ २ ॥

श्रीरामनामजीवातू रामसेवोदरम्भरिः ।
अञ्जनातनयः पातु दम्भोलिर्यातुभूभृताम् ॥ ३ ॥

सर्वशास्त्रार्थतत्त्वज्ञं रामकार्यधुरन्धरम् ।
रक्षोवृक्षकुठारन्तमाञ्जनेयमुपास्महे ॥ ४ ॥

विजितेन्द्रियसन्दोहं कार्यनिर्वाहकोविदम् ।
आञ्जनेयमहं वन्दे रामनामकुशीलवम् ॥ ५ ॥

हेमाद्रिनिभगात्राय सीताशोकविनाशिने ।
रामांघ्रिसेवकाय स्यादाञ्जनेयाय मङ्गलम् ॥ ६ ॥

---

## मधुरकविः

शठकोपमुनीन्द्रस्य पदपङ्कजषट्पदम् ।
ज्ञातद्राविडगाथन्तं वन्देहं मधुरं कविम् ॥

---

## श्री शठकोपः

मुकुन्दपदनिध्यानबन्धुरानन्दमन्थरम् ।
किल्बिषद्रुकुठारं श्रीशठारिं शरणं भजे ॥ १ ॥

यद्गाधाब्धेरगाधार्थसुधां तां वसुधासुराः ।
पीत्वा नन्दन्ति तं वन्दे प्रसन्नं शठवैरिणम् ॥ २ ॥

परमपुरुषकृत्यैर्हेतुशून्यप्रसादैः
प्रशमितचिररूढाज्ञानगाढान्धकारः ।
जननसमयलब्धज्ञानभक्तिप्रशान्तः
शठरिपुमुनिवर्यः पापिनोऽस्मान्पुनातु ॥ ३ ॥

द्राविडाम्नायगाधाभिस्स्वायत्तीकृतमाधवः ।
भक्तिमार्गप्रदर्शी श्रीशठारिः पातु नस्सदा ॥ ४ ॥

निर्हेतुककृपावीक्षापात्रं यो मुरवैरिणः ।
प्रपन्नानां शिरोरत्नं तं वन्दे शठवैरिणम् ॥ ५ ॥

दामोदरदयोदारलब्धभक्तिविभूषणम् ।
शठवैरिमुनिं वन्दे पठितद्राविडश्रुतिम् ॥ ६ ॥

नारायणकृपालब्धतत्त्वार्थाय शठद्विषे ।
भगवद्ध्यानतान्ताय मुनये नित्यमङ्गलम् ॥ ७ ॥

---

## कुलशेखरः

ज्ञानी जनकवद्राजा निर्लिप्तो रघुपुङ्गवे ।
न्यस्तात्मसर्वभारो यस्तं वन्दे कुलशेखरम् ॥ १ ॥

श्रीरामनामजीवातुं मारुतात्मजवत्सदा ।
श्रीवैष्णवकुलोत्तंसं वन्देऽहं कुलशेखरम् ॥ २ ॥

## श्री विष्णुचित्तः

पिताप्यनुसरन्मोदाद्गोदामतमनुत्तमम् ।
स्वं धन्यंमन्यमानश्श्रीविष्णुचित्तः पुनातु नः

गोदालापमहानन्दमग्नचित्तं शमोज्ज्वलम् ।
तद्भक्तिभावितात्मानं विष्णुचित्तं नमाम्यहम्

भावयन्भगवद्भक्तिं गोदाया मन्यते स्म यः ।
धन्यमात्मानमानन्दाद्विष्णुचित्तं भजामि तम्

विष्णुचित्तमहं वन्दे यच्चित्तं विष्णुमन्दिरम् ।
श्रीकृष्णबाल्यलीलायां मग्नं यच्चित्तमादरात्

परित्यक्तैहिकसुखः विष्णुमङ्गलभावुकः ।
स्थापिताच्युतपारम्यः विष्णुचित्तो जयत्वसौ

श्रीकृष्णचरितध्यानलीनचित्ताय सर्वदा ।
स्रग्वश्यरङ्गनाथाय विष्णुचित्ताय मङ्गलम्

---

## श्रीगोदा

विष्णुचित्तो हृदि ध्यायन्नच्युतांघ्रिसरोरुहम् ।
श्रीधन्विनूतनाभिख्ये वसति स्म पुरे पुरा

तुलसीहृद्यमारामं तत्र कुर्वन्निरन्तरम् ।
वटच्छदे शयानाय माल्यमार्पयदादरात्

एकदा तुलसीक्षेत्रं खनतानेन तत्र हि ।
लब्धस्सुन्दररूपस्त्रीशिशुः कान्तिसमुज्ज्वलः

तमादाय मुदा श्रीमान् स्वकुटीरे कथञ्चन ।
पालयामास वात्सल्यात्सर्वस्वं तन्त्वमन्यत

शैशवक्रीडया सा तु भगवद्भक्तिगर्भया ।
विस्मापयन्ती पितरं ववृधे मृदुभाषिणी ॥ ५ ॥

बाल्य एव विशालाक्षी क्रीडायां कृष्णविग्रहे ।
दर्शयन्ती महाभक्तिं आर्पयत्स्वशिरस्सुमम् ॥ ६ ॥

एवं प्रवृद्धा मुग्धा सा गोदा तद्भक्तिभावतः ।
वृद्धेन गुम्फितं माल्यं परिधृत्य शिरस्यसौ ॥ ७ ॥

ततो भगवते नित्यमार्पयामास भक्तितः ।
क्रुद्धोऽथ केशमिश्रं तन्माल्यमालोक्य भाजने ॥ ८ ॥

भगवत्संमतिं स्वप्ने ज्ञात्वा तुष्टो बभूव सः ।
गोदा विश्वपतिं नित्यं रङ्गेशं दृढभक्तितः ॥ ९ ॥

सदापि कामयाना सा तद्वियोगेन दुःखिता ।
गाथाभिर्द्राविडीभिस्सा रङ्गेशकरपीडनम् ॥ १० ॥

स्वप्ने दृष्टं जगादाथ सोपयेमे जगत्पतिम् ॥

वैधग्ध्यमौग्ध्यचातुर्यगाम्भीर्यस्मेरमाननम् ।
बिभ्रतीं मुग्धसंस्थानां वन्दे गोदां प्रवेणिकाम् ॥ ११ ॥

जगदुज्जीवनायैव भूम्यंशप्रभवानघा ।
योपादिशद्गुरौ भक्तिं तां गोदां समुपास्महे ॥ १२ ॥

सर्वं हेयं क्षणिकमिति या दर्शयन्त्यैहिकं यत्
श्रीशध्यानादितरदखिलं पापवृध्द्यै भवेद्धि ।
लोकायैवं प्रकटनचणा भूतधात्र्यंशभूता
गोदा ज्ञानप्रवितरणतो मानवान् संपुनातु ॥ १३ ॥

सर्वंसहा स्वयं गोदा चेतनोद्धरणे रता ।
धन्विनूत्नपुरे जाता तनोतु जगतां शुभम् ॥ १४ ॥

कादम्बिनीव कृतविष्णुपदावलम्बा
सीतेव भूमिजननी कमनीयनेत्री।
तारेव सत्पथरुचिर्विधुसम्मुखीना
गोदाविरास भवुकाय नृभाग्यपङ्क्तिः

चन्द्राविर्भवनं यथा जनमनःप्रह्लादसम्पादकं
गोदे! त्वज्जनिरप्युपेयजननी नृणां तथा भूमिजे!।
सीता रामकरग्रहं कृतव्रती क्षेमाय सद्धर्मिनां
त्वं तावद्व्रत! रङ्गराजमहिषी ज्ञानाभिवृध्द्यै ह्यभूः

सीतेव क्षेत्रजा विष्णुचित्तस्य ज्ञानिनस्सुता।
जनकस्येव या तस्यै गोदायै नित्यमङ्गलम्

सिद्धोपायमुपेयञ्च साधयामास माधवम्।
गाधाभिर्द्राविडीभिर्या श्रीगोदां तामुपास्महे

कृष्णानुभूतिसम्भूतां गाधामालां गुणोज्वलाम्।
कृष्णायार्पितवत्यै स्याद्गोदायै नित्यमङ्गलम्

पुरुषोत्तमकृते स्रग्भूषिता भूषणैस्स्वयम्।
यो गोदा मोदमापन्ना नित्यं तां प्रणतोऽस्म्यहम्

तुलसीव क्षितौ जाता कृष्णसंश्लेषमोदिनी।
शिरोधार्या च या तस्यै गोदायै नित्यमङ्गलम्

विप्रलब्धा मुकुन्देन तद्विश्लेषासहिष्णुताम्।
जगाद गोदा गाधाभिर्या स्यात्तस्यै सुमङ्गलम्

तुलसीवनसम्भूता तुलसीस्रगिवाच्युतम्।
यालिलिङ्ग मुदा तस्यै गोदायै नित्यमङ्गलम्

कृष्णान्ना कृष्णपानीया कृष्णायैवात्मधारिणी।
यानन्याहा बभौ तस्यै गोदायै नित्यमङ्गलम्

प्राप्य रङ्गपतिं गोदा रमेवाद्भुतरूपभाक् ।
संप्राप परमानन्दमाम्नायस्याप्यगोचरम् ॥ २५ ॥

या त्वनन्यार्हशेषत्वभोग्यत्वादिनिरूपिणी ।
कल्याणरूपिणी तस्यै गोदायै नित्यमङ्गलम् ॥ २६ ॥

कृष्णानुभवमार्गं या दर्शयामास सूक्तिभिः ।
विष्णुचित्ततनूजायै तस्यै स्यान्नित्यमङ्गलम् ॥ २७ ॥

गाथाभिर्द्राविडीभिर्या माधवार्चाविधिं क्रमात् ।
अनुजग्राह तस्यै स्याद्गोदायै नित्यमङ्गलम् ॥ २८ ॥

यशोदाभावमासाद्य शौरेर्डोलाविधिं जगौ ।
गाथाभिर्या मुदा तस्यै गोदायै नित्यमङ्गलम् ॥ २९ ॥

गोदापुरुषकारोक्तिं श्रीकृष्णोत्तरमङ्गलाम् ।
यः पठेत्प्रार्थनां नित्यं तस्य सम्पत्स्थिरा भवेत् ॥ ३० ॥

यशोदाभावनाहृष्टा कृष्णं डोलाविधानतः ।
या जगावस्तु तस्यै श्रीगोदायै नित्यमङ्गलम् ॥ ३१ ॥

प्रबोधनेन कृष्णस्य धन्यतामभिदर्श्य या ।
यशोदाभावमापन्ना गोदां तां समुपास्महे ॥ ३२ ॥

श्रीकृष्णपादवीक्षात्तहर्षोत्पुलकिताङ्गका ।
तद्गानपरतन्त्रा सा गोदा नः पावयत्विह ॥ ३३ ॥

मानसानुभवावेद्यहृद्यार्थां गोदयेरिताम् ।
गाथामालां पठेन्नित्यं सर्वसम्पत्समृद्धये ॥ ३४ ॥

बालकृष्णानुभावेन वर्धितानन्दबन्धुरा ।
गाथाभिरनुजग्राह या गोदा तामुपास्महे ॥ ३५ ॥

उज्जीवनक्रमं गोदा गाधाभिः प्रत्यबोधयत् ।
अहो! तस्याः कृपा बद्धचेतनेषु ह्यनुत्तमा ॥ ३६ ॥

गोदे!- त्वया भुक्तसमुज्झितायाः पुष्पस्रजो वैभवमुक्तिदूरम् ।
यद्वक्षसि श्रीपतिरादरेण श्रीवैजयन्तीमिव तां बभार ॥ ३७ ॥

मुरवैरिमहोरसि प्रफुल्लां वनमालामपहाय दिव्यभृङ्गाः ।
चिकुरादवतार्य गोदया यत् प्रवितीर्णां स्रजमाविशन् स्वभोग्याम् ॥

भगवन्नाममाहात्म्यबोधनानन्दितात्मिकाम् ।
विष्णुचित्तसुतां गोदां वन्दे गोविन्दमानसाम् ॥ ३९ ॥

देवतान्तरसन्त्यागपूर्वकं कमलापतेः ।
सेवामुपदिशन्त्यै स्याद्गोदायै नित्यमङ्गलम् ॥ ४० ॥

तत्त्वबोधाय गाधाळिमनुजग्राह या मुदा ।
श्रीशांघ्रिभक्तिदां तस्यै गोदायै नित्यमङ्गलम् ॥ ४१ ॥

कृष्णान्ना कृष्णपानीया कृष्णपुष्टिरसायना ।
श्रीकृष्णनिजजीवातुः श्रीगोदा काशतेतराम् ॥ ४२ ॥

गोदागाधानुसन्धानधावितध्वान्तमानसाः ।
भवन्ति वैष्णवास्सर्वे धरायां धनिनस्सदा ॥ ४३ ॥

गोदा वेदान्तवेद्यं तं माधवं मायिनं मुदा ।
सत्त्वपुष्पाञ्जलिस्स्तुत्वा स्वायत्तमनयद्धरिम् ॥ ४४ ॥

परतत्त्वोपदेशाय प्रोक्तां सूक्तिन्तु गोदया ।
प्रत्यहं योऽनुसन्धत्ते स देवे (भवेत्) त्यक्तसंशयः ॥ ४५ ॥

विश्वंभरेव गोदेयं विश्वरक्षाभरक्षमा ।
कृष्णदोर्दण्डसंश्लिष्टा सिञ्चत्वस्मान् कृपामृतैः ॥ ४६ ॥

सन्मार्गदर्शिनीं गाथां वेदान्तार्थप्रकाशिनीं ।
द्राविडीं गीतवत्यै स्याद्गोदायै नित्यमङ्गलम् ॥ ४७ ॥

या गाथया यदुक्ष्माभृद्दीपं स्तुत्वा श्रियःपतिम् ।
तुष्टा बभूव तस्यै स्याद्गोदायै नित्यमङ्गलम् ॥ ४८ ॥

सम्यगादिश्य तत्त्वार्थं ज्ञानबुद्धान् क्षितौ नरान् ।
विष्णुभक्तान् विदधतीं गोदां तां समुपास्महे ॥ ४९ ॥

सौलभ्यादिगुणान्विष्णोर्गायति स्म सुभक्तितः ।
गाथाभिर्द्राविडीभिर्या गोदां तां समुपास्महे ॥ ५० ॥

विष्णुकैङ्कर्यनिर्वाहसिध्यर्थं मानुषीं तनुम् ।
जीवात्मने ददातीति प्रोक्तवत्यै नमोऽस्तु ते ॥ ५१ ॥

स्वपनोदन्तमाख्याय या तु कृष्णस्य सादरम् ।
तल्लीलालीनसुस्वान्ता तां गोदां समुपास्महे ॥ ५२ ॥

जगतीभाग्यसम्भूता गोदाकादम्बिनी हरेः ।
गाथामृतोरुधारां या वर्षत्यात्माभितुष्टये ॥ ५३ ॥

भगवन्नामपीयूषवर्षिणीर्द्राविडात्मिकाः ।
गाथाः बोधितवत्यै स्याद्गोदायै नित्यमङ्गलम् ॥ ५४ ॥

अज्ञाननाशिनीर्गाथाः कृष्णभक्तिविवर्धिनीः ।
गोदायै प्रोक्तवत्यै स्यान्मङ्गलं मङ्गलात्मने ॥ ५५ ॥

मुकुन्दलीलासूक्तिं या रम्यद्राविडगाथया ।
बोधयामास तस्यै स्याद्गोदायै नित्यमङ्गलम् ॥ ५६ ॥

बहुप्रकारतो नृणां द्राविडाम्नायसूक्तिभिः ।
प्रावर्तयत चित्तं या गोदां तां समुपास्महे ॥ ५७ ॥

एकस्स्वादु न भुञ्जीतैवेति रीत्यनुयायिनी।
यादाद्गाधामृतं नृभ्यस्तां गोदां समुपास्महे ॥ ५८ ॥

सर्वकारणतां विष्णोः सर्ववन्द्यत्वमेव या।
स्थापयामास गाधाभिर्गोदां तां प्रणमाम्यहम् ॥ ५९ ॥

विष्णुपारम्यसम्पूर्णाः (सुश्राव्याः) जनाज्ञानविनाशिनीः।
बोधयन्त्यै च गाधास्ताः गोदायै नित्यमङ्गलम् ॥ ६० ॥

सर्वकारणतां तस्य साधयन्ती श्रियःपतेः।
गाधा जगाद या भक्त्या गोदां तां समुपास्महे ॥ ६१ ॥

---

## श्रीगोदाकृष्णसंवादः

**(यशोदाभावेन गोदादेव्या प्रोक्तास्सूक्तयः द्राविडपद्येषु वर्तन्ते)**

**श्रीकृष्णः**

न यामिनी गता मातः नयामि कथमद्य गाः।
समुन्मीलितनेत्रोऽहं तदोत्तिष्ठाम्यहो यदा ॥ १ ॥

मथिताद्भाण्डदध्नोम्ब! नवनीतं समुद्धृतम्।
स्यात्ततोऽहं समुत्थाय चारयामि गवां व्रजम् ॥ २ ॥

आह्वयन्तु मम स्निग्धाः मातः पर्युषिताशिनः।
अथोत्थाय समं मित्रैश्चारयामि वने पशून् ॥ ३ ॥

नाहं स्नात्वा गमिष्यामि पशूंश्चारयितुं वने।
रजन्यां स्नातुमिच्छामि देह्युत्तिष्ठामि भोजनम् ॥ ४ ॥

वशीकरोमि तानम्ब! वृषभान्वेणुनादतः।
देहि मे मुरलीमद्य तामुत्तिष्ठाम्यहं ततः ॥ ५ ॥

बहिर्गतन्तु मामम्ब ! गृहीत्वा गोपिकाः बलात् ।
चुम्बन्ति तदहं शय्यां न त्यजाम्यानयात्र तत् ॥ ६ ॥

प्रतीक्षन्ते मुदा मुग्धाः ज्योत्स्नायां यमुनातटे ।
तदुत्तिष्ठाम्यहं मातः कुरु मे दन्तधावनम् ॥ ७ ॥

भुक्त्वाहं पायसं मातः मालालङ्कृतकुन्तलः ।
गच्छामि बालकैस्सार्धं चारयन्गा वने मुदा ॥ ८ ॥

---

## श्रीगोदालक्ष्मीदाससंवादः

**श्रीगोदा—**

विहायास्मान् कुतो नाथ ! हिमवद्गिरिमाश्रितः ।
न कार्यकारि सौलभ्यमिति निर्वेदतः किमु ? ॥ १ ॥

दयालोरपि दुःखेषु मग्नान् संवीक्ष्य चेतनान् ।
उचितं ते किमौदास्यं दास्यवृत्तिं प्रकल्पय ॥ २ ॥

**लक्ष्मीदासः —**

दत्तो मयोपदेशोऽपि कृत्यतः परिदर्शितम् ।
नाज्ञासिषुरिमे मुग्धाः मत्प्रयत्नो हि निष्फलः ॥ ३ ॥

**श्रीगोदा—**

न लगत्युपदेशस्ते चेतनानां तु मानसे ।
यतः प्रकृतिबद्धास्ते मन्वते विषयं सुखम् ॥ ४ ॥

**श्रीदासः —**

स्वभावं प्रकृतेर्बुध्द्वा चेतनानां तु वासनाम् ।
निर्वेदश्लथचित्तोऽहं हिमवद्गिरिमाश्रितः ॥ ५ ॥

**श्रीगोदा—**

शश्वत्कृतोपदेशस्त्वं दुष्कृताद्विनिवार्य च ।
चेतनान्वशयेर्धीमान् गजानिव वनोद्धतान् ॥ ६ ॥

**श्रीदासः** —

सत्वोद्रेकात्कदाप्यस्मद्वचः कोऽपि शृणोति यः।
स एव रजसा पश्चात् विषयान्बहु मन्यते

**श्रीगोदा**—

ऐहिकं कांक्षमाणेभ्यः फलं देहि तदिच्छया।
तदा दासा भवेयुस्ते भवत्कांक्षापि पूर्यते

**श्रीदासः** —

अर्थार्थिनस्तु तावन्मां सेवन्ते स्वार्थतत्पराः।
यावदर्थाभिसम्प्राप्ति ततस्ते स्वार्थगामिनः

**श्रीगोदा**—

यद्यप्युक्तं त्वया तथ्यं तथापि प्रकृतिस्थितिम्।
विचार्य कार्यमार्येण तदिच्छापूरणं सदा

**श्रीदासः** —

विस्मरन्ति जना लोके कृतामुपकृतिं पुनः।
कामयन्ते नवं स्वीयं कर्माज्ञात्वा चिरन्तनम्

**श्रीगोदा**—

आचार्यानुग्रहादेव चेतनोज्जीवनं किल।
अनुग्रहपरो जन्तुमन्तुं क्षन्तुं त्वमर्हसि

**श्रीदासः** —

न ह्याभिमुख्यमप्येते दर्शयन्ति जना भुवि।
कथं वावर्जयाम्येतानिति चिन्ताकुलोऽस्म्यहम्

**श्रीगोदा**—

चेतनोज्जीवनायैव सदाचार्यसमुद्भवः।
तदवश्यं त्वया कार्यं चेतनोद्धरणं किल !

**श्रीदासः —**

जीविकाकलनोद्युक्तान् सदा गुरुपराङ्मुखान् ।
कथं वा त्वत्पदासक्तान् करोमि करुणालये ! ॥ १५ ॥

**श्रीगोदा —**

सर्वथा चेतनेषु त्वं गुरुप्रवणतां सदा ।
कल्पयन्नल्पसंवित्सु प्रसादसुमुखो भव ॥ १६ ॥

**श्रीदासः —**

यथादिशसि वात्सल्यकारुण्यश्लथमानसे !
देवि ! दासस्तथा सिद्धस्तनोमि त्वदधीनधीः ॥ १७ ॥

---

## श्रीगोदाकृष्णसंवादः

**(श्रीगोदोक्तिः द्राविडपद्यमयी ; कृष्णोक्तिः संस्कृतपद्यमयी)**

**श्रीकृष्णः—आम् , शृणु ॥**

अनादिवासनादिग्धमानसाः प्राणिनः प्रिये !
कर्मानुरूपतो जन्म लभन्ते दुःखभाजनम् ॥ १ ॥

**इदं ननु दयाकार्यम् ? शृणु ॥**

दत्तो मयेन्द्रियग्रामो मनुष्यत्वं तथात्मने ।
शास्त्रं विवेकमतये दयाकार्यमिदं ननु ? ॥ २ ॥

**शृणु प्रिये शृणु ॥**

अल्पास्थिरत्वमेतेषां विषयाणामजानता ।
क्रियते मनुजेनैवं दुर्ग्रहाणीन्द्रियाणि हि ? ॥ ३ ॥

**आम् , शृणु ॥**

प्राकृतं वस्तु भोग्यं सत्प्राकृता मन्वते ध्रुवम् ।
अप्राकृते कथं चित्तं प्रवर्तेताजितेन्द्रियम् ॥ ४ ॥

**श्रीकृष्णः—अनघे! सुन्दरि! शृणु॥**

दयाकार्यमिदं सर्वं ननु जानासि सुन्दरि!
तथाप्यारोपयस्यद्य मयि दोषं मुधानघे!

**मुग्धे! शृणु॥**

उल्लङ्घते मदाज्ञां यस्स मे द्रोहीति निश्चितम्।
तत्कथं तत्र मे मुग्धे! प्रवर्षति कृपामृतम्

मुख्यं मय्याभिमुख्यं हि चेतनानां निरन्तरम्।
शृणु—रक्षकत्वेन मां ज्ञात्वा कोऽपि मामभिगच्छति!

**देवि! शृणु॥**

शृणु देवि! प्रवक्ष्यामि सदाचार्यमुखान्मुहुः।
श्रुत्वोपदिष्टं शास्त्रार्थं क्षालयेन्मनसो मलम्

**आम्, शृणु॥**

विषमिश्रमिति ज्ञात्वा कस्स्वाद्वन्नमिहाश्नुते।
तद्वद्विवेकिना भाव्यं विषयेषु कृतात्मना

**शृणु; सुन्दरि! शृणु;**

ऐहिकन्तु सुखाभासं भोग्यं जानन्ति मानवाः।
अनुभूतं तदेवान्ते यतो ग्लानिप्रदं भवेत्

**शृणु,**

विवेकायैव शास्त्रं हि तदुक्तं कर्म चाचरन्।
फलसङ्गं विना पापाद्विनिर्मुक्तो भवेध्द्रुवम्

**देवि! शृणु;**

आश्रित्य सद्गुरुं नम्रस्तत्वनिर्णयपारगम्।
उपदेशाद्विजानीयात्सारमर्थं तदुद्धृतम्

भवन्नाचार्यदेवो यो विश्वासी शुद्धशीलवान्।
अन्तेवासी जितामर्षस्तस्य सर्वं हि सिद्धिदम्

आचार्योऽपि वितृष्णस्स्यादनहङ्कृतिरात्मवान् ।
श्रोत्रियस्स्वाश्रितच्छात्रशुभोदर्कैकमानसः ॥ १४ ॥

**आम्, मुग्धे !**

मुग्धे ! मुग्धतरं ब्रूषे मच्छासनवशंवदः ।
अभ्यासेन भवेत्तीर्णस्त्यक्तमोहो विकिल्बिषः ॥ १५ ॥

**देवि ! आम् ॥**

अरिषड्वर्गसम्पुष्टं देवि ! चित्तं चलाचलम् ।
सद्गुरोरुपदेशाच्छजलेन क्षालयेन्नरः ॥ १६ ॥

ततश्शुद्धेन मनसा कर्म मद्यागसंविदा ।
कुर्वन् ज्ञानमवाप्नोति तत्त्वयाथार्थ्यदायकम् ॥ १७ ॥

**मुग्धे ! सुन्दरि ! देवि !**

सर्वत्र समबुद्धिं यः कुर्वन् द्वन्द्वसहोऽनघः ।
जपन्मन्त्रं मदीयं स मदीयस्स्याद्दृढव्रतः ॥ १८ ॥

**देवि !**

अप्रमत्तस्सदा धीरो मनःप्रग्रहसंयतान् ।
इन्द्रियाश्वान् वशे कुर्वन् मयि न्यस्तभरो भवेत् ॥ १९ ॥

**आम्, अनघे !**

जातास्ते मम सङ्कल्पाल्लोककण्टकनाशकाः ।
आर्तत्राणाय तत्सर्वं कृतं ननु मयानघे ! ॥ २० ॥

**शृणु, देवि !**

यदा भवति धर्मज्ञे ! धर्मग्लानिर्महीतले ।
तदाहमाश्रयाम्यत्र मानुषीं तनुमादरात् ॥ २१ ॥

**कान्ते ! शृणु ॥**

कदाचित्कस्यचित्कान्ते ! कुत्रचिद्दर्शयाम्यहम् ।
तादृशीं तनुमप्यत्र सर्वेषां दुर्लभं हि तत् ॥ २२ ॥

**श्रीकृष्णः—कान्ते !**

हन्त ! ते करुणा कान्ते ! कथमद्याचराम्यहम् ।
पारयन्ति कथं द्रष्टुं दिव्यं मे रूपमीदृशाः

**मुग्धे ! शृणु ;**

अत एव मयोक्तं ते विराड्रूपं ममानघे !
पारयन्ति कथं द्रष्टुमिति मायाविमोहिताः

**मुग्धे ! शृणु ;**

अविश्वासाद्विमूढा मां जारं चोरञ्च मानुषम् ।
मायावृता विजानन्ति सौलभ्यं मम निष्फलम्

**पद्माक्षि ! शृणु ;**

कारणान्तरमुत्पाद्य तत्र पद्मायतेक्षणे !
अमानुषं न जानन्ति प्रतिबध्नात्यघं नरान्

**शृणु ; मुग्धे !**

निष्फलं मे परत्वञ्च सौलभ्यमपि निष्फलम् ।
ज्ञानी मां शरणं प्राप्य लभते परमां मुदम्

**सुन्दरि !**

धर्मानशेषान् सन्त्यज्य निस्संशयमनालसः ।
प्रपद्यते यो मामेव तस्य पापं हराम्यहम्

**अनघे ! सुन्दरि ! शृणु ;**

न जीवति विना कर्म कर्तव्यं कर्म तत्सदा ।
कुर्वन् मदर्पणधिया भक्त्या जीवेद्विकिल्बिषः

**सुन्दरि !**

दुरत्यया हि माया मे मामेव शरणं व्रजन् ।
कुरुते प्रार्थनां यस्स त्यक्तमायो भवेध्द्रुवम्

**श्रीकृष्णः—सुन्दरि! अनघे!**

विषयेषु विमूढानां या प्रीतिर्वर्ततेऽनघे !
मयि तां कुरुते यस्तु स मे भक्तो न संशयः ॥ ३१ ॥

**सुन्दरि! तथास्तु ॥**

चेतनेषु कृपापूर्णे ! वात्सल्यान्मञ्जुभाषिणि !
प्रीतोऽस्मि मङ्गलं तेऽस्तु घनश्यामलकुन्तले ! ॥ ३२ ॥

---

## भक्तांघ्रिरेणुसूरिः

अन्यासङ्गप्रसक्ताय यस्मै भक्ताय रङ्गराट् ।
साक्षात् ज्ञानं ददौ तस्मै नमो भक्तांघ्रिरेणवे ॥ १ ॥

सदा रङ्गिदृढस्वान्तोऽप्यन्ततो रङ्गिचोदितः ।
भक्तांघ्रिरेणुतां प्राप यस्तस्मै नित्यमङ्गलम् ॥ २ ॥

## श्रीपाणसूरिः

सार्थयन् भगवन्नामकीर्तनाद्गानवैखरीम् ।
आहूतो रङ्गिणागाद्यो मुनिवाहं भजामि तम् ॥ १ ॥

वीणागानेन रङ्गेशं वशीकृत्यातिभक्तितः ।
यः प्राप तत्पदाम्भोजं तं वन्दे मुनिवाहनम् ॥ २ ॥

गायन्तं रङ्गनाथस्य भक्तं द्राविडगाधिकाः ।
तदनुग्रहपात्रं तं मुनिवाहनमाश्रये ॥ ३ ॥

अनन्यमनसा नित्यं कावेरीमध्यशायिनम् ।
ध्यायते रङ्गनाथन्तु मुनिवाहाय मङ्गलम् ॥ ४ ॥

---

## श्रीपरकालसूरिः

कलिमातङ्गपञ्चास्यमज्ञानतिमिरारुणम् ।
नारायणैकप्रवणं परकालमहं भजे ॥ १ ॥

चौर्याडम्बरसम्प्राप्तनारायणपरत्ववित् ।
तमेव शरणं प्राप यस्तं कलिरिपुं भजे

कवितापथसञ्चारी दुरितद्विपकेसरी ।
कुमतायतिसंहारी पातु नः कलिमत्सरी

भार्योक्त्या भोजयामास योऽन्नं भागवतोत्तमान् ।
तत्सेवा हरिसेवेति परकालं नमामि तम्

श्रीरङ्गराजप्रवणं कलिकल्मषमोषकम् ।
गीतद्राविडगाथं तं परकालमहं भजे

कैङ्कर्यमुख्यतां विष्णोश्शंसन् भक्तिविभूषणः ।
चौर्यकार्यसपर्यो यो नमस्तस्मै कलिद्विषे

निर्णीतपरतत्त्वो यो विष्णुकारुण्यभाजनम् ।
कालयामास दुर्मार्गान् परकालं नमामि तम्

चोरवृत्त्यापि रङ्गेशसालसौधविधायिने ।
कार्तिके मासि जाताय प्रणतोऽस्मि कलिद्विषे

कलिकलुषनिहन्ता द्राविडाम्नायगाथा-
नुतिकृतहरिकीर्तिस्त्यक्तदेवांतरोक्तिः ।
स जयति परकालः कालयन्मानवानां
हृदयकुहरगूढं गाढमोहान्धकारम्

चतुष्टयाय शिष्याणां निजच्छायानुवर्तिनाम् ।
सद्गतिं दापितवते परकालाय मङ्गलम्

हेयताज्ञानतस्त्यक्त्वा विषयानैहिकान् सदा ।
माधवध्यानतृप्ताय परकालाय मङ्गलम्

## यामुनार्यः

वेदान्ततत्वसारार्थदीपेनान्तस्तमो नृणाम् ।
सान्द्रं बिभेद यस्तस्मै यामुनार्याय मङ्गलम् ॥ १ ॥

## श्रीरामानुजार्यः

रामानुजमुनिर्जीयाद्रामप्रियपिता गुरुः ।
इन्द्रनीलममूल्यं यो यादवाद्रौ व्यदर्शयत् ॥ १ ॥

ओं नमो नारायणायेत्यनुसन्धानतत्परः ।
शेषोऽभूद्यो यतीन्द्राय तस्मै स्यान्नित्यमङ्गलम् ॥ २ ॥

सुकृतं कृतमत्र किन्नु मर्त्यैः यतिराजस्सविता तमोनिहन्ता ।
स तु विष्णुपदैकसक्तचित्तोऽप्यनुकम्पावशतोऽवनौ विभाति ॥ ३ ॥

ध्येयौ मुकुन्दचरणाम्बुजभक्तिहेतू
संसारसिन्धुपरितारणभव्यपोतौ ।
उज्जीवनप्रथितरस्यतरौषधौ तौ
रामानुजार्यचरणौ शरणं प्रपद्ये ॥ ४ ॥

भूमण्डले निगमभूरुहदर्शनीये
पाषण्डषण्डदवचण्डशिखावलीढे ।
आविर्बभूव करुणामृतभारनम्रः
रामानुजार्यजलदो ननु तापशान्त्यै ॥ ५ ॥

मुखेन दर्शयन् स्वान्तशान्तिवैदग्ध्यधोरणीम् ।
यद्वद्रिशृङ्गदीपरश्रीयतिराजः पुनातु नः ॥ ६ ॥

दुःखे सुखत्वबुध्या यः क्लेशिनो मनुजान् भुवि ।
दयार्द्रोऽन्वग्रहीत् दृष्ट्वा पुनात्वस्मान् स लक्ष्मणः ॥ ७ ॥

नानामताभिमतयुक्तिविलोडनोत्थ-
दोषप्रदर्शननियन्त्रिततत्वबोधः ।
सर्वात्मशेषिभगवद्गुणकीर्तनेन
सन्तोषयन्विजयते यतिराजराजः

यद्वद्रिनाथरमणीयगुणाम्बुराशि-
मीनायमानमृदुमानसलब्धमोदम् ।
श्वेतोर्ध्वपुण्ड्रमधुराननमायताक्षं
रामानुजं यतिवरं शरणं प्रपद्ये

मकुटमण्डितमञ्जुलमस्तकः
प्रकटवादिमतङ्गजकेसरी ।
विरचिताञ्जलिरूर्ध्वसुपुण्ड्रकः
जयति लक्ष्मण एष यतीश्वरः

रथवरमधिरुह्य लक्ष्मणोऽयं
विविधपटाञ्चितमभ्रचुम्बिशृङ्गम् ।
शुचिरुचिरमनीषिवैष्णवाग्र्यैः
विजयमहोत्सवमाचरन्विवास्ते

कृत्वा कर्तव्यमेकः प्रकटितविभवो द्राविडाम्नायविद्भिः
श्रीमद्भाष्यप्रवीणैरधिगतनिगमैर्वैष्णवैस्सेव्यमानः ।
मृत्स्नाशुद्धोर्ध्वपुण्ड्रैस्स्मितमधुरमुखो भव्यबद्धाञ्जलिस्स-
न्नासीनस्सिंहपीठे जयति यतिपतिर्लक्ष्मणो यादवाद्रौ

मन्दस्मितप्रकटिताश्रितभीतिनाशं
श्वेतोर्ध्वपुण्ड्रपरिदर्शितसत्वभावम् ।
बद्धाञ्जलिप्रकटितात्मविनीतभावं
रामानुजं यतिवरं शरणं प्रपद्ये

अनुक्रोशस्साक्षाद्यदुगिरिपतेर्मर्त्यतनुतां
प्रपन्नो मेदिन्यां समभवदहो! लक्ष्मणमुनिः ।
यदंघ्रिस्पर्शेन प्रयतमभवद्विश्वमखिलं
पुनीता नीता तां जगति जनता विष्णुरतताम् ॥ १४ ॥

नारायणाय कमलारमणस्य नाना-
कल्याणदिव्यगुणबृन्दनिवेदनेन ।
अत्रैव मोक्षसुखदानकृतादरं तं
रामानुजं मुनिवरं प्रणमामि मूर्ध्ना ॥ १५ ॥

यदुगिरीशपदार्चनतत्परश्शुभसरोवरनिर्मितमज्जनः ।
यतिपतिः पृथुनाकुगतं हरिं नयनगोचरतामनयन्नृणाम् ॥ १६ ॥

अर्चाकृतिरपि विभवं यद्वद्रो दर्शयन्यतीन्द्रोऽयम् ।
सर्वेश्वरशेषित्वप्रकाशनायैव साञ्जलिर्जयति ॥ १७ ॥

दक्षिणाशाकृतावासो यतीशोऽपि सिताम्बरः ।
नाकुनारायण श्रीशं योऽद्राक्षीत्तमुपास्महे ॥ १८ ॥

कान्तारमुन्मूल्य यदुक्षमाधरे
रामानुजश्शुद्धतरांशुकोज्ज्वलः ।
वल्मीकवासं कमलासखं तं
प्रादर्शयद्यस्तमहं (मिमं) भजामि (मः) ॥ १९ ॥

रामानुजमुनिं वन्दे दयाशान्तिसरित्पतिम् ।
भूश्रुत्या यदुशैले यो नारायणमदर्शयत् ॥ २० ॥

कल्याणीस्नानपूतोऽयं लक्ष्मणो यदुभूधरे ।
क्षीरक्षपितवल्मीको नारायणमपूजयत् ॥ २१ ॥

❖

कलिना तामसे लोके तमोनिर्वापणाय यः ।
जातो रामानुजब्रह्मः तस्मै स्यान्नित्यमङ्गलम् ॥ २२ ॥

सार्थयन् सर्ववेदांश्च सामञ्जस्यसमन्वयात् ।
तत्त्वं प्राख्यापयद्यस्स्यात् तस्मै संयमिने शुभम् ॥ २३ ॥

अहिशैलनिवासाय श्रीनिवासाय शार्ङ्गिणे ।
शङ्खचक्रप्रदात्रे स्याद्यतिराजाय मङ्गलम् ॥ २४ ॥

शठारिमुनिवर्यस्य सूक्तिमाधुर्यमादरात् ।
आस्वाद्य तुष्टचित्ताय यतिराजाय मङ्गलम् ॥ २५ ॥

सङ्कल्पं यामुनार्यस्य जगदुद्धरणाय यः ।
पूरयामास तस्मै स्याद्यतिराजाय मङ्गलम् ॥ २६ ॥

गोष्ठीपूर्णाद्रिहस्यं तत् कृच्छ्रात् ज्ञात्वोच्चगोपुरे ।
उच्चैर्जगाद यस्तस्मै मङ्गलं करुणाब्धये ॥ २७ ॥

श्रीभाष्यं व्याससूत्राणां विष्णुभक्तिविवर्धकम् ।
अनुजग्राह यस्तस्मै भाष्यकाराय मङ्गलम् ॥ २८ ॥

गद्यत्रयमनल्पार्थं तापत्रयनिबर्हणम् ।
योऽन्वग्रहीत्सदा तस्मै यतीशायास्तु मङ्गलम् ॥ २९ ॥

गीतायथार्थवक्तायमिति गीता मनीषिभिः ।
यस्य कीर्तिस्सदा तस्मै भाष्यकाराय मङ्गलम् ॥ ३० ॥

यौ सर्वदा मननमात्रकृतात्मशुद्धी
संसारतापहरणे कमलायमानौ ।
नारायणांघ्रिपरिसेवनशिक्षकौ तौ
रामानुजस्य चरणौ शरणं प्रपद्ये ॥ ३१ ॥

❖

कृपामूर्तिस्स्वयं श्रीशकृपाकांक्षी जगद्गुरुः ।
अस्माद्रामानुजश्श्रीमान् पुनातु स्वांघ्रिवारिभिः ॥ ३२ ॥

तमो विवस्वानिव मानसं तमो यः कालयत्यार्द्रमनाश्श्रितानाम् ।
जगद्गुरोस्तस्य यतीश्वरस्य पुनातु नः पादसरोरुहोदकम् ॥ ३३ ॥

यत्पादस्मरणान्मर्त्यास्त्यजन्ति भवसाध्वसम् ।
रामानुजस्य तस्य श्रीपादतीर्थं पुनातु नः ॥ ३४ ॥

यन्नामस्मरणान्नृणां सर्वसिद्धिर्भवेदिह ।
पुनातु लक्ष्मणार्यस्य तस्य पादोदकं तु नः ॥ ३५ ॥

रामानुजमहीभृच्छ्रीपादप्रस्रुतनिर्झरः ।
स्नापयन्नात्मनः पापान् पुनातु जगतीतले ॥ ३६ ॥

विशिष्टाद्वैतसिद्धान्तदर्शनेन जनेक्षणम् ।
उन्मीलितवतस्तस्य पादतीर्थं पुनातु नः ॥ ३७ ॥

अकर्मनिष्ठताविष्टपिशाचोच्चाटनक्षमम् ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ३८ ॥

स्वांघ्री प्रदर्श्य मूकाय यश्शशंसात्मसद्गतिम् ।
तस्य श्रीलक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ३९ ॥

वर्णाश्रमाविभेदेन रहस्यार्थप्रदो नृणाम् ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४० ॥

उपादिशज्जनौघाय यस्स्वानन्यार्हशेषताम् ।
तस्य रामानुजार्यस्य पादतीर्थं पुनातु नः ॥ ४१ ॥

हरेर्निष्कामकैङ्कर्यमादिदेश जनाय यः ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ४२ ॥

पञ्चाचार्याश्रयाद्योऽभूत्साम्प्रदायिकतत्त्ववित् ।
तस्य श्रीलक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४३ ॥

द्वयध्यानप्रशान्ताक्षो यस्तोषयति सज्जनान् ।
तस्य श्रीलक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४४ ॥

द्वादशोर्ध्वाच्छपुण्ड्राङ्कश्चन्द्रमा इव भाति यः ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ४५ ॥

काषायाम्बरसंवीतो भास्कराभो विराजते ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४६ ॥

पवित्राङ्कुरसंवीतपल्लवाङ्गुलिमञ्जुलः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४७ ॥

त्रिदण्डदर्शितश्रीशापारम्यविजयध्वजः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४८ ॥

अक्षमालालसद्वक्षाः कटिबद्धोज्ज्वलाम्बरः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ४९ ॥

श्रीनिवासपुरस्सूपन्यस्तवेदार्थसंग्रहः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५० ॥

यश्श्रीभाष्यसमुद्घुष्टसर्वसत्यत्वसुप्रथः ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ५१ ॥

मृदुमन्दस्मिताभाषी शिष्यानुग्रहतत्परः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५२ ॥

श्रीवैष्णवसमृद्धिं यो वर्धयामास सर्वतः ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ५३ ॥

स्वपाण्यर्पितशालाम्बुतोषितेभगिरिप्रभुः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५४ ॥

त्रयेण गद्यश्रीदण्डतत्त्वानां ज्ञानवर्धकः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५५ ॥

शान्तात्मा करुणापूर्णः पूर्णचन्द्रसमप्रभः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५६ ॥

शुभ्रयज्ञोपवीताञ्चत्काञ्चनाभतनुद्युतिः ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५७ ॥

अत्रोभयच्छ्रुतीनां यस्सामञ्जस्यं सुसंमतम् ।
रामानुजमुनेस्तस्य पादतीर्थं पुनातु नः ॥ ५८ ॥

अर्चाकृतौ मुकुन्दस्य चक्रे प्रावण्यमादरात् ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ५९ ॥

बद्धाञ्जलिं वशीकारमुद्रां विष्णोरबोधयत् ।
यस्तस्य लक्ष्मणार्यस्य पादतीर्थं पुनातु नः ॥ ६० ॥

यत्पादाश्रयतुच्छोच्चपुण्यलोकविभूतयः ।
नरास्तस्य यतीन्द्रस्य पादतीर्थं पुनातु नः ॥ ६१ ॥

---

## कूरनाथः

श्रीभाष्यकारपादाब्जप्रवणो यो दयामयः ।
हस्तोद्भवाय तस्मै स्यात्कूरनाथाय मङ्गलम् ॥ १ ॥

शान्तात्मा गुरुभक्तो यो विशिष्टाद्वैततत्परः ।
मूर्तिमानप्यनुक्रोशः कूरनाथं नमामि तम् ॥ २ ॥

विशिष्टाद्वैतसिद्धान्तं लक्ष्मणार्यगुरोः पुरः ।
न्यवेदयद्यो विनयात्तं कूरेशमहं भजे ॥ ३ ॥

त्यक्तस्वत्वाभिमानं श्रीरामानुजपदाश्रयम् ।
तदर्थध्वंसिताक्षं श्रीकूरनाथं नमामि तम् ॥ ४ ॥

## दाशरथ्यार्यः—(मुदलियाण्डान्)

रामानुजपदच्छायापरित्यक्तभवातपम्।
वन्दे दाशरथिं वन्द्यं लक्ष्मणार्यपदात्मकम्

यतीन्द्ररामानुजपादरेणुपूतात्मभव्यं शमिनं विनीतम्।
ज्ञानप्रदीपाहतगाढमोहध्वान्तं भजे दाशरथिं प्रसन्नम्

रामानुजपदाम्भोजरूपिणं ज्ञानदायिनम्।
शान्तं दाशरथिं वन्दे स्वाचार्यासक्तमानसम्

## अनन्तार्यः—(अनन्दाळवान्)

वेङ्कटेशसदासेवासक्तचित्तं मनीषिणम्।
कृतपुष्पवनं श्रीमदनन्तार्यमहं भजे

## श्रीलोकाचार्यः

दूरीकृतैहिकसुखं विजितेन्द्रियौघं
वाग्भूषणद्युतिविशोधितमर्त्यदोषम्।
संसारिचेतनसमुद्धरणात्तदीक्षं
मान्यं जगद्गुरुवरं शरणं प्रपद्ये

श्रीवैष्णवमहातत्वसारगूढार्थबोधकम्।
लोकाचार्यगुरुं वन्दे विजितेन्द्रियचापलम्

निष्कृष्टज्ञानचर्याभ्यां लोकाचार्यत्वसम्पदम्।
उपेयुषे नमस्तस्मै कृष्णपादस्य सूनवे

श्रवणश्रवणान्नृणां श्रवणं याति पूतताम्।
यस्माच्छ्रवणसम्भूतो लोकाचार्यगुरुर्महान्

लोकालोकविवस्वन्तं लोकोज्जीवनकाङ्क्षिणम्!
इन्द्रियग्रामजयिनं लोकाचार्यमहं भजे

## श्रीवेदान्तदेशिकः

श्रीभाष्यकारचरणाम्बुजचञ्चरीकं
रामानुजार्यमतघोषणबद्धदीक्षम् ।
सर्वेषु तन्त्रविषयेषु निरङ्कुशन्तं
वेदान्तदेशिकमहं शरणं प्रपद्ये ॥ १ ॥

रामानुजपदाम्भोजचञ्चरीकं महाकविम् ।
दान्तं वेदान्तनिष्णातं वन्दे वेदान्तदेशिकम् ॥ २ ॥

वेङ्कटेशदयाध्यानलीनचित्तं महाकविम् ।
सर्वदर्शननिष्णातं वन्दे वेदान्तदेशिकम् ॥ ३ ॥

निगमान्तसमुद्रान्तरर्थरत्नप्रकाशकः ।
रामानुजांघ्रिपाथोजभृङ्गराजो विराजते ॥ ४ ॥

## श्रीवरवरमुनिः

शमदमगुणपूर्णं शेषभोगाच्छगात्रं
यतिपतिचरणाब्जन्यस्तसर्वात्मभारम् ।
द्वयमननतदर्थध्यानसम्फुल्लवक्त्रं
वरवरमुनिवर्यं सत्त्वशुद्धं भजामः ॥ १ ॥

द्राविडाम्नायसुव्याख्यावशीकृतजगत्पतिम् ।
रामानुजांघ्रिजीवातुं रम्यजामातरं भजे ॥ २ ॥

वन्दे सुन्दररङ्गेशपदाम्भोजमधुव्रतम् ।
यतीन्द्रपदपाथेयं रम्यजामातरं गुरुम् ॥ ३ ॥

शान्तात्मा दिव्यवाणीभिस्तत्त्वार्थप्रतिपादकः ।
जीयात् ज्ञाननिधिश्श्रीमान् रम्यजामातृयोगिराट् ॥ ४ ॥

अन्तर्बहिश्च सत्वाख्यगुणं प्रकटयन्निव ।
सर्वशुद्धो गुरुर्जीयाद्रम्यजामातृयोगिराट् ॥ ५ ॥

रामानुजपदध्यानपुलकाङ्कितविग्रहम्।
रम्यजामातृयोगीन्द्रं वन्दे वन्दारुमोददम्

द्राविडाम्नायसुव्याख्यासमावर्जितरङ्गराट्।
रम्यजामातृयोगीन्द्रो जीयाद्रामानुजांघ्रिभाक्

ज्ञानानुष्ठितिसंसिद्धं निश्रेणिं शिष्यसद्गतेः।
लक्ष्मणध्यायिनं वन्दे रम्यजामातृयोगिनम्

रामानुजार्यनिर्व्याजकरुणापात्रतां गतम्।
शुद्धं ज्ञाननिधिं वन्दे रम्यजामातरं मुनिम्

सर्वेशापेक्षया नित्यमुपायोपेयताधिया।
रामानुजांघ्रिप्रवणं वन्दे वरवरं मुनिम्

कौमुदीविशदवाक्तनुप्रभः स्वाश्रितात्मगतमःप्रभाकरः।
रामसोदरमुनीन्द्रपादहृत् ज्ञानदोऽस्तु वरवर्यसंयमी

रामानुजार्यपदपद्ममरन्दपायी
श्रुत्येकभोग्यमधुरस्वनचित्तहारी।
अत्युच्चविष्णुपदसक्तगतिश्च रम्य-
जामातृयोगिमधुलिट् भ्रमताद्दृगग्रे

रामानुजार्यमुनिवर्यपदाब्जचिन्ता-
सन्तानकन्दलितमोदविकस्वरास्यम्।
योगीन्द्रमात्मगुणभव्यतमञ्च रम्य-
जामातृवर्यमनिशं शरणं भजामि

यतिपतिपदसेवासक्तचित्तं प्रशान्तं
फणिपतितनुकान्तिस्पर्धिकायप्रकाशम्।
धवलमृदुलमृत्स्नाद्वादशाच्छोर्ध्वपुण्ड्रं
वरवरमुनिवर्यं ज्ञानिनं तं प्रपद्ये

रम्यजामातृयोगीन्द्रं वन्दे वाग्भूषणाञ्चितम् ।
ज्ञानानुष्ठानसत्पक्षद्वयसत्पथगामिनम् ॥ १५ ॥

अनुष्ठानेन यश्श्रीमानाचार्यत्वं प्रदर्शयन् ।
विराजते नमस्तस्मै रम्यजामातृयोगिने ॥ १६ ॥

चिरन्तनाचार्यकृतान्प्रबन्धान्
तत्वार्थनिर्णेतृतया स्वयं यः ।
व्याख्यानरीत्या विशदीचकार
तं रम्यजामातृमुनिं नमामि ॥ १७ ॥

## यादवाद्रिमहाचार्यः

गद्यत्रयानुसन्धानबाष्पपूरितलोचनम् ।
यद्वद्रिश्रीशवन्दारुं महाचार्यमहं भजे ॥ १ ॥

## बालधन्विवेङ्कटार्यगुरुवर्यः

कृष्णाश्लेषपरत्वसूचकशुभाश्लेषर्क्षलब्धोदयं
श्रीरामानुजदिव्यसूक्तिविशदीकारैकसक्तं गुरुं ।
आम्नायान्तयुगार्थसारमननप्रध्वस्तपाप्मावलिं
चक्राद्यद्भुतदिव्यमन्त्रजपिनं श्रीवेङ्कटार्यं भजे ॥ १ ॥

रामानुजमुनेर्मान्ये बालधन्विकुलाम्बुधौ ।
कौस्तुभोऽप्यद्य वाधूलकुलेन्दुप्रवणोऽस्ति यः ॥ २ ॥

यादवाद्रिकुटीरोऽयमाम्नायान्तविशारदः ।
जीयाद्वेङ्कटवर्यश्श्री शिङ्गरार्यतनूभवः ॥ ३ ॥

कर्मज्ञानसुनिष्ठन्तं भगवद्ध्यानतत्परम् ।
सदाचारपवित्राङ्गं वेङ्कटार्यमहं भजे ॥ ४ ॥

शास्त्रोक्तकर्मनिष्णातो ज्ञाता भक्तिवशंवदः ।
नारायणांघ्रिसक्तात्मा वेङ्कटार्यो विभात्ययम् ॥ ५ ॥

दिवंगतोऽपि कीर्त्यायं वेङ्कटार्यो महामतिः।
भुवं गतो जनश्रोत्रेष्वटत्यद्भुतवैभवः

परवासुदेवपरिचर्यया सदा
परवानुपैति परमां मुदन्तु यः।
शरणं व्रजामि करुणाकरं गुरुं
वरवेङ्कटार्यमनिशं तमादरात्

रामानुजपदाम्भोजसक्तचित्तो बुधाग्रणीः।
वेङ्कटार्यः पदं प्राप विष्णोः कैङ्कर्यकांक्षया

यदुक्ष्माभृन्नाथे विनिहितभरं लक्ष्मणमुनेः
सदा श्रीसूक्तार्थस्मरणविधुतस्वान्तकलुषम्।
पवित्राक्षस्रग्भिः परिकलितकण्ठं निजगुरोः
भजे ध्यानासक्तं यदुगिरिगृहं वेङ्कटगुरुम्

रामानुजांघ्रिसरसीरुहचञ्चरीकं
यद्वद्रिनिलयवसतिं निगमान्तचित्तम्।
श्रीवेङ्कटार्यशतमानमहोत्सवे तं
वन्दामहे यदुगिरीशपदात्तमोदम्

वेङ्कटार्यममलात्मविचारं सर्वशास्त्रपरिशीलनदक्षम्।
यादवाद्रिनिलयं यतिराजश्रीपदाब्जहृदयं गुरुमीडे

वेदान्ततत्त्ववेत्तारं वेदान्ताचार्यसन्निभम्।
वेदान्तवेद्यचित्तं तं वेङ्कटार्यगुरुं भजे

रामानुजपदाश्लेषशंसदाश्लेषिकोद्भवम्।
दान्तं वेदान्तिनं वन्दे वेङ्कटार्यगुरूत्तमम्

यादवाद्रिकुटीरश्री वेङ्कटार्यकुटुम्बिनी।
यद्वद्रिनायिकाभिख्या स्वाचार्यपदमन्वगात्

## श्रीवरवर्णिनी

दिव्यरत्नकिरीटेन देवीदत्तेन भासुरा ।
अलकालिलसत्फालतिलकभ्रूलतादला ॥ १ ॥

ताटङ्कोत्सकनद्गण्डा नासारत्नोज्ज्वलाधरा ।
ग्रैवेयकांशुसंश्लिष्टकम्बुकण्ठी स्रगुज्ज्वला ॥ २ ॥

भार्गवीदर्शनानन्दप्लावितायतताम्रदृक् ।
प्रशान्तदीप्रगम्भीरदर्शनीयाननाम्बुजा ॥ ३ ॥

सर्वाङ्गीणोडुसङ्काशदिव्यभूषा नितम्बिनी ।
स्वर्णवर्णशरीराभा धृतदिव्यमहाधना ॥ ४ ॥

शान्तिर्मूर्तिमती भक्तिस्सशरीरा गुणोज्ज्वला ।
अरिषड्वर्गसम्पुष्टानाशापाशनियन्त्रितान् ॥ ५ ॥

तुच्छैहिकसुखासक्तान् भगवद्विमुखान्नरान् ।
पश्यन्ती करुणाभाजा कटाक्षेणानुतापतः ॥ ६ ॥

वीरलक्ष्म्याज्ञया साध्वी श्रीलोकाद्वरवर्णिनी ।
श्रीरङ्गाहिमहीध्रेभपर्वतानागता क्रमात् ॥ ७ ॥

तत्र तत्र विलोक्यैषा श्रीशानर्चाकृतींस्ततः ।
यादवाद्रिं समासाद्य नारायणमुपास्य च ॥ ८ ॥

तद्दर्शनप्रहृष्टाथ सौभाग्यभवनं मुदा ।
गत्वा प्रणम्य भक्त्यात्मप्राचीनगृहदेवताम् ॥ ९ ॥

दृष्ट्वा पतिमपत्यञ्च बाष्पदिग्धेन चक्षुषा ।
नम्रा भक्तिविलासं सा प्रविश्यालोक्य बान्धवान् ॥ १० ॥

तद्देवतां प्रणम्याथ वृद्धगेहे सविष्टरे ।
ध्यायन्ती कमलावासां राजते साञ्जलिर्मुदा ॥ ११ ॥

## कावेरी

जगन्मातुस्स्थिता पार्श्वे जगन्मङ्गलमब्जदृक् ।
साञ्जलिर्याचमाना सा जयताद्वरवर्णिनी

सुधांशुवदनन्यस्ततिलका दीप्रभूषणा ।
गुरुपादाहिताक्षी सा जीयाच्छ्रीवरवर्णिनी

इन्दुशीतलदिव्यास्या दिव्यस्रग्वरभूषणा ।
विष्वक्सेनपदासक्ता जीयात्सा वरवर्णिनी

दर्शयन्ती स्वकायेऽस्मिन् या गोदावैभवं महत् ।
ददात्यानन्दमन्येभ्यस्सा जीयाद्वरवर्णिनी

निरन्तरायं यद्वद्वौ धनुर्मासमहोत्सवम् ।
निर्वर्तय शरीरेऽस्मिन् लक्ष्मीदास! नमोऽस्तु ते

मासेऽस्मिन् वरवर्णिन्याश्शरीरारोग्यमेधताम् ।
इति त्वां प्रार्थये लक्ष्मि! निर्वर्तय कृपामयि!

ज्ञानध्यानलसन्मौनक्षमादमदयोदयाः ।
ये भक्ताश्च सदाचार्यास्तेभ्यस्तेभ्योऽस्तु मङ्गलम्

पूर्वाचार्याश्च भक्ताश्च मिळन्त्वत्र महोत्सवे ।
निरन्तरायं कृपया पूरयन्त्वमुमादरात्

## कावेरी

सह्याद्रिजाते! कावेरि! सर्वसह्यत्वदर्शिनी ।
मातेव सर्वरक्षार्थं दयया धावसि क्षितौ

कावेरीं पूतलहरीं सरीसृपझरीचरीम् ।
गह्वरीं मुत्करीं गौरीं दूरीकृतमलां भजे

मातेव तोषयन्त्यन्नप्रदानेन शरीरिणः ।
दूरीकरोतु कावेरी गङ्गेव दुरितानि नः

कावेरीयं तुलाकोटिमञ्जुला विभ्रमाकुला ।
लसद्दण्डकपालिश्च सुन्दरीव विराजते ॥ ४ ॥

कावेरीलहरी दूरीकरोतु दुरितं मम ।
यस्या धारापरामर्शात् प्राप्ता केदारतां धरा ॥ ५ ॥

सह्यत्वं जन्तुदोषाणां दर्शयन्ती प्रवाहतः ।
जातासि सह्यदुहिता वात्सल्यं हन्त ! जन्तुषु ॥ ६ ॥

## श्रीवीरलक्ष्मी-लक्ष्मीदाससंवादः

कृत्वा स्वयं दुरितकर्म यथेच्छमम्ब !
शास्त्रं प्रदत्तमतिलङ्घ्य सुखेप्सयैव ।
त्वय्यर्पिताखिलभरोऽस्मि समुद्धरेति
भक्तिं विनाभिदधतीह नराः किमेतत् ? ॥ १ ॥

एवं तर्हि जगत्यम्ब ! कोऽपि पापी न हि क्वचित् ।
अनुक्तश्रीशनामास्ति को वा क्लेशे विमूढधीः ॥ २ ॥

यद्यप्यम्ब ! तवास्त्येव निर्हेतुकदयानघा ।
तथाप्यात्मगुणोपेतैः नृभिर्भाव्यं श्रुतिध्वजैः ॥ ३ ॥

मदधिष्ठानतोऽप्यम्ब ! सदा त्वदनुभूतितः ।
बहिर्व्यापारशून्योऽस्मिन् आत्मासत्कल्प एव हि ॥ ४ ॥

रामकृष्णादयस्त्वम्ब ! पञ्चोपनिषदात्मकाः ।
प्राकृतैश्चर्मचक्षुर्भिः कथं दृष्टा निवेदय ॥ ५ ॥

अप्रार्थितो रविरुदेति तमो हिनस्ति
सत्येवमप्यतिनिगूढगुहान्तरस्थम् ।
शक्नोति नैव परिहर्तुमहो ! तथास्याः
सान्द्राघसन्ततिततौ मनुजे कटाक्षः ॥ ६ ॥

## गुरूपदेशः (उपन्याससारः)

उज्जीवनं नृणां नास्ति सद्गुरोराश्रयं विना।
असद्गुरुं समाश्रित्य निरयं यान्ति मानवाः

गुरुरेव गतिर्नान्यो भवकान्तारचारिणाम्।
ऊर्ध्वारोहणनिश्रेणी यस्य वाणी सुखावहा

गुरुर्मूलं हि सर्वासां सम्पदां त्रिजगत्स्वपि।
अतस्सर्वोऽपि तं नित्यं पूजयेत्प्रणमेत्स्मरेत्

ऊर्ध्वारोहणनिश्रेणी ह्याचार्यस्त्यक्तषड्रिपुः।
ईदृशं गुरुमाश्रित्य मुक्तबन्धो भवेन्नरः

गुरुं नित्यं भजेन्मर्त्यस्तत्कृपाभाजनं भवेत्।
सर्वकामफलप्राप्तिस्तस्य भूयादतन्द्रिता

आचार्यो भगवत्प्राप्तौ हेतुर्ज्ञानप्रदीपदः।
तस्मात्तं समुपासीत करणत्रयतोऽनिशम्

ऐहिकामुष्मिकं सौख्यं विवेकज्ञानवर्त्मना।
आश्रितेभ्यो ददात्यत्र गुरुरेव विशुद्धधीः

श्रितानुग्रहनिष्ठो यस्स एव गुरुरीर्यते।
अरिषड्वर्गनिर्मुक्तं तादृशं गुरुमाश्रयेत्

ज्ञानेन गौरवं यस्य स गुरुस्स्यान्न संशयः।
गुरुत्वं नान्यथा सिध्येत् तादृशं गुरुमाश्रयेत्

## अनुबन्धः

अंशुमालिनिवासोऽयं वनमाली किरीटभृत्।
श्रितामयापहर्तास्तु तेजस्सम्पद्यशःप्रदः ॥ १ ॥

परस्परजिगीषात्तभूषणे इव भूषिते।
कल्याणतीर्थसिष्णासू जग्मतुर्भार्गवीभुवौ ॥ २ ॥

रामनामामृतास्वादमत्ताः उन्मत्ततां गताः।
नृत्यन्ति ये नरास्तेषां स्तन्यपानं सुदुर्लभम् ॥ ३ ॥

रङ्गनाथदयिता हितैषिणी भृङ्गकुन्तलचलाचलालका।
भङ्गुरामलकटाक्षवीक्षणा मङ्गलाय भवतु श्रितात्मनाम् ॥ ४ ॥

चटुलकर्णपुटे नमयन्किटिः प्रकटितात्मतनूरुहपीवरः।
कुटिलचन्द्रमनोहरदंष्ट्रया निटिलदेशकृतावनिराबभौ ॥ ५ ॥

निरवधिकगुणौघोदारनिघ्नान् कृतघ्नान्
विकसितकमलाक्षो वीक्षमाणो यतीन्द्रः।
मुररिपुवरिवस्याप्राप्तनित्यप्रमोदः
विलसति भुवनेऽस्मिन् लक्ष्मणो वैष्णवाग्र्यैः ॥ ६ ॥

सिद्धं नारायणं श्रीशं प्राप्यप्रापकरूपतः।
उपादिशत्क्षितौ यस्तु तं वन्दे शठवैरिणम् ॥ ७ ॥

दलितस्तम्भभाङ्कारगुम्फितोत्तुङ्गसत्पथम्।
दलितारिकटूरस्कं नरकण्ठीरवं भजे ॥ ८ ॥

आधिव्याधिनिवारणैकनिरतो भक्त्याश्रितानां नृणाम्
श्रीनारायणमानसानुसरणे श्रद्धातिबद्धादरः।
क्षीबक्षुब्धसमुद्धतासुरदृढग्रीवाक्षरच्छोणित-
प्राप्तारुण्यतनुर्ज्वलन् विजयते श्रीचक्रराजो भ्रमन् ॥ ९ ॥

आचार्यतां समाश्रित्य वेदमौळिर्विरक्तिभाक् ।
सशरीर इव क्षोण्यां वेङ्कटार्यो विराजते ॥ १० ॥

उपन्यासेन रङ्गेशं वशीकृत्य स्तुतस्तु यः ।
तेन तं मधुरालापं वन्दे वरवरं मुनिम् ॥ ११ ॥

करुणापूर्णहृदयः परोज्जीवनदत्तदृक् ।
योऽनुष्ठानपरो वेत्ता तादृशं गुरुमाश्रयेत् ॥ १२ ॥

लक्ष्मीदासकृपाक्षिप्रप्राप्तश्रीलोकसम्पदम् ।
अमन्दानन्दपूर्णं तं कृपापूर्णमहं भजे ॥ १३ ॥

---

## पत्राणि

श्रीः

आयुष्मते सुदर्शनायेदमावेद्यते। भवता तावन्निर्वर्तितं कर्म श्लाघ्यतमं किल? एवमेव भवान् अहङ्कारममकारवर्जितं सर्वमपि कर्म भगवत्कैङ्कर्यरूपं मन्वानः दृढभक्तितः कर्तुमर्हति। नित्यानपायिन्या भगवत्या जगज्जनन्या सालशैलावासं श्रीश्रीनिवासं योजितवतो भवतः कर्म को वा न श्लाघते। भगवान् श्रीनिवासोऽपि सानन्दमङ्गीचकार भवता समुद्रेणेव समर्पितां कमलालयां वनमालामिव वक्षसा। मयाप्यनुभूतस्तद्दर्शनानन्दः। इतः परं भवानेवमेव जितेन्द्रियः दूरीकृतकामक्रोधः भगवत्कैङ्कर्यैकतानो भवतु । निरन्तरमपि ते मनः शान्तं भूयात्। इति। **लक्ष्मीदासः**

कुशलम् श्रीः यादवाद्रिः

श्रीमते रामानुजाय नमः **२०-१२-५४**

श्री लक्ष्मीदासाय नमः

आयुष्मतो लेखमवलोक्य प्रमुदितोऽस्मि। अस्मद्गुरौ भक्तिरनन्य-

साधारणा तावदेवमेव सुस्थिरा भूयादित्याशास्महे। वक्तव्यं बहु वर्तते। अधुना तावदिदमेकमभिधीयते। भगवतोऽस्मदाचार्यस्य हितप्रदानसुसूक्तिषु यथार्थदृष्टिर्भूयात्। इति।

कल्याणः
(श्रीलोकम्)

कुशलम् श्रीः यादवाद्रिः

श्री लक्ष्मीदासाय नमः ६–२–५५

आयुष्मते तावत्कर्तव्यमावेदयामि। क्रियमाणं सर्वमपि धर्माविरुद्धं कर्म भगवदाराधनात्मकमेव। मा तावदत्र विचिकित्सा। त्वत्सङ्कल्पस्तु स्यादेवमेव। संशयात्मा विनश्यति। दृढसङ्कल्पेन भवता भाव्यम्। मा भूः कदापि परुषवाक्। करणत्रयमप्येकरूपमस्तु। यथाशक्ति प्रवितरणेन जहीहि दुरितमबुद्धिकृतम्। एक एवैकान्ते स्वादुभोजनपरो मा भूः। निरन्तरमप्यमृताशी भव। मितभाषी मिताशी मितनिद्रश्च कालमतिवाहय। निधेहि धर्मसूक्ष्मे दृष्टिम्। मा भव गतानुगतिकः। मा मुञ्च सुसमयममुम्। अस्मदाचार्यस्य सूक्तिपीयूषपानेन तद्रीत्यानुष्ठानेन च सन्तुष्टो भव। एतत्सर्वमपि भगवदाराधनमेव। त्यक्तक्रोधश्शान्तचित्तो निष्कामो भगवति न्यस्तभरोऽस्मदाचार्योक्तिषु दृढविश्वासो यथार्थग्राही भूत्वा चिरञ्जीव। इति।

कल्याणः

---

कुशलम् श्रीः यादवाद्रिः

श्रीवीरलक्ष्म्यै नमः १०–४–५५

श्रीमते लक्ष्मीदासाय नमः

आयुष्मते तावदिदमनुशासनम्। जननमरणचक्रे विचार्यतां तावत्सावधानं हृदि। "इह जगति जननमरणचक्रे किं वा स्थिरम्? किं वा

सुखम्? किं वा स्वम्? किमानीतम्? किं वा नीयते?" इति। बहूनां जन्मनामन्ते चेतनो लभते मानुषीं तनुं विवेकास्पदम्। तत्रापि सुकृतविशेषाद्ब्राह्मण्यम्। तत्रापि आचार्यानुग्रहबलाद्वैष्णवत्वम्। एवं वैष्णवत्वप्राप्त्या मानी विवेकविकलः कामादिदोषाभिहतः, तदनुकूलकर्मरतो भगवच्चरणारविन्दविमुखः आरूढः पतितो भवति। अतो वैष्णवेन विवेकिना भाव्यम्।

यदापि भगवन्मायातिरोहितो जीवोऽयं लब्धशास्त्रज्ञानोऽपि, अहङ्कारममकारवासनातरङ्गाभिहतः दुःखबहुलं विषयमेवात्मभोग्यं मन्वानः, तदर्थमकृत्यकरणैकतानो मुह्यति; अमलोऽपि मलकलुषितो भवति; तदा सदाचार्यचरणारविन्दसमाश्रयः, तदनुग्रहलब्धविवेकजलप्रक्षालितमलः, विदितस्वस्वरूपः, शास्त्रदृष्टात्मगुणसमलङ्कृतः, कर्मानुगुणोपनतविषयमात्रसुहितः, शान्तात्मा भवेत्।

तस्मादिदमभिधीयते। आशैव निदानं बन्धस्य। आशया क्रोधो, लोभो, मोहः। ततोऽकृत्यकरणम्। ततः करणत्रयभिन्नता। ततो हिंसा। ततो विनिपातः। पुनश्च जननमरणचक्राभिघातः। तस्मान्मुमुक्षुः विनिर्मुक्ताशो यथालाभसन्तुष्टो जगन्मङ्गलाकांक्षी शमदमादिसद्गुणैकनिलयः परोपकारी करणत्रयेणापि भगवदाराधनसुहितः सदाचार्यसूक्तिबद्धश्रद्धः विवेकी भवेत्।

अधुना तावन्मध्यमलोकभाग्यविशेषात्, अस्मदाचार्यास्सन्मार्गप्रवर्तयितारस्सुकृतलभ्यास्सन्निहिताः। तत्सूक्तिसारामृतेन प्रक्षाल्य मलमखिलमपि सुखीभूयाः। इति।

**कल्याणः**

(**श्रीलोकम्**)

कुशलम् श्रीः यादवाद्रिः

१-९-५५

आयुष्मते किं मया तावदुपदेष्टव्यम्? सर्वमप्यस्मदाचार्यैरेव समुपदिष्टं किल? अनादिवासनावासितं हृदयं जनमपि स्वमार्गमाकर्षति। चिरन्तनवासनानुगुणं प्रवर्तते जनः। देवैरप्यपेक्षणीयेऽस्मिन्मध्यमलोके लब्धजनुषां मर्त्यानां यदि स्वकर्तव्यनिष्ठा स्यात्, तदा समुत्तीर्णा एव स्युः। तदितःपरं वा स्वाचार्योपदिष्टेन वर्त्मना गन्तुमुद्युक्तो भवतु भवान्। प्रथमतस्तावदात्मगुणालङ्कृतैश्श्रीवैष्णवैर्भाव्यम्।

**परिपूर्णः**

## (लक्ष्मीमन्दिरनिर्माणविषये)

श्रीः भक्तमन्दिरम्

श्रीमते रामानुजाय नमः २९-११-१९७०

भगवत्सृष्टिमात्मज्ञास्सार्थयन्तो नरा भुवि।
धन्या भवन्तु तच्छेषास्तत्कृपापात्रतां गताः॥

हन्त! भोः!! किं ब्रूमः श्रियःपतेर्भगवतो वासुदेवस्य कृपाकटाक्षविशेषातिशयं, यदसत्कल्पं चेतनवर्गं समुज्जीवयितुकामः करणकलेबरैस्संयोज्य नवविधभक्तिद्वारा स्वभजनानुकूल्यं कल्पयामास। चेतनाः पुनः भगवत्पराङ्मुखाः विषयलम्पटाः भगवत्सङ्कल्पमन्यथा चक्रुरिति महदिदमाश्चर्यम्। तदावर्जनार्थं चिरन्तनैर्ज्ञानिमूर्धन्यैः तत्र तत्र देवमन्दिराणि कल्पितानि। कलिकल्मषाविष्टाः जनास्तु आहारनिद्राद्यैकतानाः चक्षुषापि नेक्षन्ते तद्वर्त्मापि। अतो नूत्नतया बाह्यसौन्दर्यस्पृहणीये भगवन्मन्दिरे कल्पिते तद्दिदृक्षया वा मन्दिरप्राङ्गणमासाद्य यया कया च विधया सकृत्कृताञ्जलयस्सार्थयन्तु स्वजन्मेत्ययमारम्भः। इति।

**लक्ष्मीदासः**

## श्रीरङ्गनाथविषये (परकालानुगृहीतम्)

धन्योऽस्मि, धन्योऽस्मि, अनुगृहीतोऽस्म्यनुगृहीतोऽस्मि, एन्नैप्पोलिङ्गु यारुमिल्लै। पात्तियानाहिलुं नोक्किनेन्, दिव्यदेदीप्यमानवरङ्गविमानत्तै। कनककलशपरम्परातरङ्गिताभ्रङ्कषशिखरविराजमानगोपुरपरम्परैयैप्पार्तु विस्मयत्ताल् स्तम्भितगात्रनाय् निन्नेन्॥

निरतिशयनिरन्तरसुरतरुसदृशाभ्रङ्कषतरुवरपरिवृतपरिसररमणीयमायुं, क्षीरपरीवाहसध्रीचिवीचिनिचयपरम्पराकरम्बितकावेरीलहरीपरीतमायुं, उदारकेदारोदरदरीदृश्यमानकलममञ्जरीराजिमञ्जुलपर्यन्तदर्शनीयहृदयङ्गममायुमिरुन्दुळ्ळ श्रीरङ्गत्तै नोक्कि महिऴ्न्दु निन्नेन्॥

प्रणवाकारदिव्यविमानत्तै नोक्किनेन् नोक्किनेन्। नोक्किनपिन् पिन्सुकृतविशेषत्तै भावयन्मनत्तिल्, परमभागवतोत्तमचरणारविन्दसंस्पर्शपवित्रतममान शुद्धपद्धतिधूळियै धरित्तु शिरस्सिले श्रीरङ्गाभ्यन्तरप्रवेशोत्फुल्लहृदयकमलनाय् महिऴ्न्दु निन्नेन्॥

मन्दमन्दममन्दानन्दतुन्दिलहृदयोऽहं सप्रदक्षिणमभ्यन्तरं प्रविश्य, सहस्रोस्रसहस्रदीप्तिदेदीप्यमानस्य क्षीरपारावारतरङ्गफेनपुञ्जधवलवलयितभोगस्य तारागणरुचिरुचिरशिखरमणिगणदिव्यद्युतिप्रसरणरमणीयविचित्रवितानायितफणासहस्रस्य, भोगप्रभाधवलतराभ्यन्तरस्य भगवतो भोगिराजस्य शेषस्य भोगे शयानं, अखण्डब्रह्माण्डषण्डाधिपत्यद्योतकदेदीप्यमानमानातीतदिव्यदीप्ररत्ननिकररुचिरचिकुररमणीयदिव्यमकुटसमलङ्कृतदिव्यमौलिं, शुरिढुळल्परम्परास्पृहणीयसुधांशुसन्देहजनकमान ललाटविलसदमलदिव्यभव्योर्ध्वपुण्ड्रभासुरं, संसारमहाकान्तारान्तरसञ्चारपरिखिन्नचेतनश्रमपरिहरणनिपुणकरुणामृतवर्षिसद्योविकसितपुण्डरीकदलामलविशालदृगासेचनकलोचनयुगलं, तिहळुं नीलमणिफलकायमानकोमलकपोलफलकप्रतिबिम्बितरुचिरदिव्यमणिवरनिपुणकिरण करम्बितमकरकुण्डलरुचिमण्डलनीराजितमुखकमलमण्डलं, निरतिशयसुभगङ्कर-

शंखडम्बरहरदिव्यदृगासेचनकभासुरनिस्तलकण्ठं, कमलालयाविलासलीलायमान श्रीवत्सकौस्तुभवैजयन्तीदर्शनीयदिव्यविविधनिरुपममणिमालासमलङ्कृतविशाल - वक्षस्स्थलं, विततपृथुलमृदुलतरकशिपुविलसदमलकोमलकपोलफलकनिकटोत्तानशायितविविधविचित्रकेयूरकङ्कणरमणीयभुजगभोगनिभभुजसुकुमारपाणिं,

अजानुविनीतापरकरकमलं, कटितटावेष्टिततटित्त्विड्भासुरपीताम्बरं, पाण्डरतरकौशेयकच्छं, दिव्यस्पृहणीयमणिनूपुरपरिष्कृतश्रितमन्दारचरणारविन्दं भगवन्तं ममनाथं श्रीरङ्गनाथं कण्डेन् कण्डुहोण्डेनिङ्गिरुन्दुळ्ळ तोण्डरहळरुळाले ॥

---

## श्रीकृष्णविषये (गोदानुगृहीतम्)

चञ्चच्चन्द्रकचारुभासुरमकुटतटपटुनटनजटिलकुटिलकुन्तलपङ्क्तिकमनीयकलधौतपट्टिकाकान्तविशालललाटत्तिल् निलैकोण्डदेन्कण्गळ् पुण्डरीहक्कण्णा ! वानवरीशने ! मलर्महळ्मणाळा !

निरतिशयलास्यभङ्गुरमारशरासनसौभाग्यनिरसनपरापरिमितकषायदूरोत्सारचतुरकशायमानमानातीत हृदयङ्गमसौन्दर्यपरवशीकृतव्रजमत्तकाशिनीव्रजशीलपरिशीलनकुशलतिरुप्पुरुवत्तै नोक्कि कण्गळेन्तन्नङ्गेयशङ्गामल् निलैकोण्डदन्दो !

गाम्भीर्यमाधुर्यसौन्दर्यलावण्यागण्यपण्यमाय् , उद्यद्दिवाकरकोमलकरदरविकस्वररुचिरसरसिजरुचिस्पृहणीयकान्तिकान्तमाय् , मत्तवृषभवरगम्भीरसुभगनयनसौभाग्यहरमाय् , मुरलीवादननादसमयसमुज्जृम्भितगम्भीरगानरसमुकुलितमाय् , स्मरपरवशवल्लवीहृदयहारिप्रफुल्लशोणकोणरागरञ्जितमानववन् तिरुक्कण्मलर्पार्वै शुरुळिनुळ्ळहप्पट्टदेन्मनं एन्नैयुमाळ्कोण्डदन्दो !

भवभयहरभव्यगम्भीरमुखसरोरुहागण्यलावण्यपारावारापारकल्लोलपर-
स्परखेलनपरनयनशफरयुगलकूलाघातलीलानुकूलसमुन्नतनासातटनिवर्तनप्रवर्ति-
तावर्तसन्देहदायिश्रवणयुगलमवन्तन् एन्मनं कवर्न्ददन्दो !

मधुराधराधीश्वरमधुराधरभासुररुचिरचुबुकचारुश्रवणलम्बिमकरकुण्डल-
ताण्डवशिक्षणविचक्षणमुरलीनादधारासंपातपरवशासुरभिश्रवणं पोलेन् शेवियुं
तन्मयमायेन्मनं पाडियुहन्ददनुळ् नीराहक्कलन्ददन्दो !

कम्बुडम्बरहरमाय् , शम्बररिपुजयकम्बुशङ्कापिशुनमान दिव्यकण्ट-
त्तिल् डोलायमानकमलालयाडोलालीलानुकूलामलातिपरिमलालोलरोलम्बमाला-
लापाकुलिताम्बरवनमालालङ्कृतमांसलामलनीलायतफलकायमानववन् वक्षस्स्थलं
नोक्कि पयन्पेत्तदन्दो ! येन्तनिरुक्कण्गळुम् ॥

मत्तवारणशुण्डादण्डडम्बरहरमाय् , पुरुषार्थचतुष्टयवितरणनिपुणमाय् ,
इन्दिरासुन्दरकन्धरापरिरम्भणाभरणांकितमाय् , रमणीयकेयूरमनोहरमाय् ,
